CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.B.P.13.
Coll. No. 860

Title

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 860 Subject: Grammar.

Title: Laghuśabdenduśekhara (पूर्वार्ध)

Author: Nāgojī Bhaṭṭa Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 12" by 5" Extent: 225 foll (No 1 to 5 missing)

Language: Sanskrit. Script: Devanāgarī

Remarks: Begins abruptly.

द्दिशेरुच्चारणक्रियात्वात्। अतएवएकाचउपदेशइतिसूत्रेकैयटेनोक्तमित्संज्ञाविधावुच्चारणवचनउपदिशिर्गृह्यते
इति। आदेचइतिसूत्रेपियेषांस्वरूपज्ञापनायापूर्वमुच्चारणंतेषामेवोपदेशव्यवहारइति। तत्रसूत्रेभाष्येपिउद्देश
श्चप्रातिपदिकानांनोपदेशइतिप्रकृतसूत्रेभाष्येपिप्रत्ययस्यमारव्यानमुपदेशइत्युक्तं। तस्यचोक्तएवार्थः। परेतु
उपदेशइतिकिमर्थमभ्रआंअपः। कःपुनरुद्देशोपदेशयोर्विशेषइतिभाष्येउक्तं। यदिप्रत्ययस्यमारव्यानमुप
देशोगुणैःप्रापणमुद्देशस्तर्हिट्टरःसद्यानिष्टेतिविहितानांशल्टशान्चत्क्तक्वतूनामवयवस्येत्संज्ञानापत्तिः।
तथाराजसूयसूर्यचित्याग्निचित्येत्यादिनिपातनानुमितक्यबादीनांपादेरित्वानापत्तिः। वदःसुपीत्यत्रोच्चारितसु
नेतत्संबंधीअतएवतत्स्यापत्यमतइञितिन्यासेऽन्यशब्दसंबद्धापत्यार्थस्यानुक्तरूपंशेषत्वमुक्तमाकरेतस्मात्
त्रसूत्रेउपदेशशब्देनोद्देशस्यापिग्रहणंवक्तव्यमेवंचाभ्रआंइत्यादावपिप्राप्नोतीति। तेषांसंग्रहोऽस्यव्याप्ति
र्भवितियेनसविशेषःकइतिप्रश्नःतत्संग्रहार्थमेवलोकव्यवहारेणापितयोःसंकीर्णत्वमुपपाद्यतेप्राव्य
येतत्संग्रहायचोपदेशेऽजनुनासिकइतिवक्तव्यं। किंपुनरुपदेशनशास्त्रमित्युक्तंवार्त्तिककृता। तत्रशास्त्र
पदेनप्रयोगशासनकरणभूताधातुप्रातिपदिकप्रत्ययनिपातागमादेशाःहलंत्यसूत्रेव्यवसितपदार्थत्वेनना
प्युक्तागृह्यंतेएवंचतत्संग्रहोअभ्रआंइत्येतप्राप्तिश्चसिद्धातस्यचवार्त्तिकस्यबाहुलकाकरणेघआप
एरव्यानंभगवताकृतं। किंचहलंत्यसूत्रेभावघञंतोपदेशपदानुवृत्तौभवतह्स्कुछंसावित्यादिविहितेष्ट्रि

दिशोरुच्चारणक्रियात्वात्।अतएवएऐकाचउपदेशइतिसूत्रेकैयटेनोक्तमित्संज्ञाविधावुच्चारणवचनउपदिशिर्दृष्टत्ते
इति।आदेचइतिसूत्रेपियेषांस्वरूपज्ञापनायापूर्वमुच्चारणंतेषामेवोपदेशव्यवहारइति।तत्रसूत्रेभाष्येपि उद्देश
श्चप्रातिपदिकानांनोपदेशइति प्रकृतसूत्रेभाष्येपि प्रत्ययहमाख्यानमुपदेशइत्युक्तं।तस्यचोक्तएवार्थः।परेतु
उपदेशइतिकिमर्थमभ्रआंअपः।कःपुनरुद्देशोपदेशयोर्विशेषइतिभाष्येउक्त।यदिप्रत्ययहमाख्यानमुप
देशोगुणेःआपणमुद्देशस्तर्हिस्टरःसद्धानिष्ठेतिविहितानांशत्रशानच्क्तक्तवतूनामवयवस्येत्संज्ञानापत्तिः।
तथाराजसूयसूर्यचित्याग्निचित्येत्यादिनिपातनानुमितक्यबादीनांपादेशित्वानापत्तिः।वदःसुपीत्यत्रोच्चारितत्त
नेतत्संबंधी।अतएवतस्यापत्यमतइञितिन्यासेऽन्यशब्दसंबद्धापत्यार्थस्यानुक्तरूपंशेषत्वमुक्तमाकरेतस्मात्
त्रसूत्रेउपदेशशब्देनोद्देशस्यापिग्रहणंवक्तव्यमेवंचाभ्रआंइत्यादावपिप्राप्नोतीति।तेषांसंग्रहेऽस्यव्यावृत्ति
र्भवितियेनसविशेषःकइतिप्रश्नःतत्संग्रहार्थमेवलोकव्यवहारेणापितयोःसंकीर्णत्वमुपपाद्यैतद्याव्यव
येतत्संग्रहायचोपदेशेऽजनुनासिकइतिवक्तव्यं।किंपुनरुपदेशनमशास्त्रमित्युक्तंवार्त्तिककृता।तत्रशास्त्र
पदेनप्रयोगशासनकरणभूताधातुप्रातिपदिकप्रत्ययनिपातागमादेशाहलंत्यसूत्रेव्यवस्थितपदार्थत्वेनना
घ्येउक्ताग्रहंतेएवंचतत्संग्रहोऽभ्रआंइत्येतद्यावृत्तिश्चसिद्धा।तस्यचवार्त्तिकस्यबाहुल्यकालकरणेघञाप
याख्यानंभगवताकृतं।किंचहलंत्यसूत्रेभावघञंतोपदेशपदानुवृत्तौभवतष्ठक्छसावित्यादिविहितेत्रि

र्त्तव्यःमंचकोमंजकइतिमाभूदितिभाष्येउपदेशशब्दोग्रहणंकर्त्तव्यमित्यर्थकः।तच्चानुवादरूपमेवसंदेहनिवर्त्तकमितिबो
ध्यं।नन्वेवंतस्मिन्निति निर्दिष्टइतिसूत्रेषष्ठीप्रकल्पकत्वंतस्येतिपदेगुणितिजकिंभ्यइत्यादिवपिषष्ठीप्रकल्पापत्तिः। ८२
नचसनःसनेवादेशोभविष्यतीतिबाधकाभावइतिवाच्यं।उपदेशइत्युच्यमानेइत्संज्ञानप्रकल्प्येतेत्युक्तंभाष्ये
तद्विरुध्येतात्रोपदेशपदाननुवृत्तावितिचेन्न।तस्यैकदेश्युक्तित्वेनासाधकत्वात्।तथाहि।तत्रङ्मोह्रस्वा
दचीत्यादौयत्रसप्तमीपंचमीचेत्युभयंनिर्दिश्यतेतत्रकिंपूर्वस्यकार्यमथपरस्येतिसंदेहेपरत्वानवका
शत्वाभ्यांपंचमीनिर्देशोबलवानितिसिद्धांतिनोक्तं।ततएकदेशिनायथार्थंवाषष्ठीनिर्देशःकर्त्तव्यइतिसमाधा
सप्तेषु नांतरमुक्तंयथाविषयंप्रोगुक्तेषुकार्यिणःषष्ठ्यानिर्देष्टव्याइतितदर्थः।तेषुसप्तमीनिर्देशस्यक्वचित्पूर्वत्रक्वचिदुत्त
षु रत्रावश्यकत्वेनोभयनिर्देशेगौरवेणैषैकदेश्युक्तिः।ततःपरेणैकदेशिनाषष्ठीपदानुवृत्यातस्मिन्नित्यादेरेवषष्ठी
प्रकल्पकत्वमाश्रित्ययथार्थंवाषष्ठीत्येकदेश्युक्तिःप्रत्याख्याता।षष्ठीपदानुवृत्तौगौरवादुभयोःप्रकल्पकत्व
नारणायपरत्वानवकाशत्वयोरेकःपूर्वपरयोरितिपूर्वपरग्रहणस्ययुगपत्प्रकल्पकत्वाभावेज्ञापकस्यचावश्य
कत्वाच्चेयमप्येकदेश्युक्तिः।ततःपूर्वेणैकदेशिनातत्पदेगुणितिजित्यादौदोषःशंकितः।ततःषष्ठीप्रकल्पितिवादिनैक
षदेषो २ देशिनोक्तंस्यादेशौयदीसंज्ञाआदेशंप्रतीहेत्तत्रखलुकृतायामित्संज्ञायांलोपेचकृतेआदेशोभविष्यतिउपदेशइतिहीत्संज्ञो
च्यतेइति।एवंचत्वदुक्तिर्व्याहतेत्याशयः।तदग्रेउपदेशपदाननुवृत्तिमभिप्रेत्यअथवानानुत्पन्नेसनिप्रकल्पाभवितव्यं।
यदाचोत्पन्नःसन्तदाकृतसामर्थ्यात्पंचमीतिप्रकल्पिर्नभविष्यतीतिसमाधानांतरंकृतं।तत्रपरत्वविशिष्टस्यतन्

[illegible]

७ उत्पादनेपंचम्याउपदेश्यात्प्रवर्त्यंतत्राभावान्नास्तितस्याःप्रकल्पकत्वमितितदर्थंकैयटआह।एवंचप्रकृतसूत्रस्यस्यसू
त्रार्थप्रतिपिपादयिषयाप्रवृत्तस्यभाष्यवार्त्तिकस्यैकदेशयुक्तत्वाद्भाष्यबलेनप्रौढिवादत्वकल्पनंनोचितं लक्ष्या
सिद्धेश्च।अइउणित्यादीनामपिक्रमबोधकत्वेनार्थवत्त्वात्प्रातिपदिकत्वं चित्रङश्चोःकुरित्यादेरपिप्रातिप
दिकत्वं।लोपश्चेत्यत्रापिशाकारस्यस्वरूपेणार्थवत्त्वात्प्रातिपदिकत्वं अनुबंधानामेकांतत्वेनतुलोपोपीत्यतोलो
पग्रहणेअनुवर्त्तमानेपुनर्लोपग्रहणंसर्वादेशत्वंबोध्यं।एकाचउपदेशइत्यत्रकैयटोपिचिंत्यएव।अन्योपितज्ज्ञानी
यश्चिंत्यएव।एकाचउपदेशेआदेचउपदेशेइत्यादौतुभावसाधनएवेतिसुधियोविभावयंत्वित्याहुः।ननुशास्त्रेनु
नासिकोच्चारणाभावात्तज्ज्ञानंदुर्लभमतआह।प्रतिज्ञेति।प्रतिज्ञाविषयानुनासिकवंतइत्यर्थः।पाणिनीयाइ
त्यस्यपाणिनिप्रभृतिभिरुक्तावर्णाइत्यर्थः।प्रतिज्ञाचायमेवमितिकथनंवर्णानांतत्त्वज्ञापकोव्यवहारश्चता
भ्यांतज्ज्ञानंसुलभमितिभावः।प्रतिज्ञातारश्चप्रत्यासत्त्यैतच्छास्त्रकर्त्तारएवेतिदिक्।निर्देशादिति।तेषां
तत्रग्रहणेहिनासिकादौयणप्रवृत्तिरितिभावः।नचेत्त्वविधानसामर्थ्याद्यणभावःसिद्धः तस्यापिप्रत्या
हारेष्वनुबंधाग्रहणज्ञापनद्वारैवयणभावकल्पकत्वौचित्यात्साक्षाच्छास्त्रबाधकल्पनापेक्षयास्यार्थ
स्यौचित्यात्।निर्देशादित्यस्यतन्मूलभूतेत्त्वविधानसामर्थ्यादित्यर्थइतितात्पर्यं।आदिनात्रधिमृपिरूपेरेकःपूर्वे
त्यादिसंग्रहः।ननुप्रत्याहारेष्वनुबंधानांकथमज्ग्रहणेषुनेतिवार्त्तिकेप्रत्याहारशब्दस्यवर्णसमाम्नायेप्रसिद्धेः

॥७॥

प्रत्याहारेष्वितामित्यनुपपन्नमतआह।आदिरंत्येनेतीति।वार्त्तिकेतादर्थ्यात्ताच्छब्द्यमितिभावः।ऊकालोज्॥
कुक्कुटरुते उकारएकद्वित्रिमात्रत्वप्रसिद्धेरुकारादयोनोक्ताः।ऊइतिएकद्वित्रिमात्राणांक्रमेणप्रश्लेष
निर्देशः।व्याख्यानात्तेनस्वोच्चारणकालसदृशोलक्ष्यतेसकालोयस्येतिबहुव्रीहिस्तत्फलितमाहोश्च
ऊश्चेति।ननुउकालोज्ह्रस्वइतिवाक्येऽणत्वात्सवर्णग्रहणेद्वित्रिमात्रयोरपिह्रस्वसंज्ञायांप्रदायप्रलूयेत्यादौह
स्येतितुक्स्यादितिचेन्न।ऊअजित्येवाज्ग्रहणसामर्थ्यात्सदृशोजित्यर्थेसादृश्यस्यव्याख्यानात्कालकृत
स्यैवग्रहणमितिसिद्धेअधिकंकालग्रहणमुच्चारितसंबंधिकालसदृशकालकस्यैवसंज्ञानतुतेनग्रही
तसंबंधिकालसदृशकालकस्यापीत्यर्थेनादोषात्।तदुक्तंभाष्येयावत्तपरकरणंतावदज्कालग्रहण
मिति।नचाजितिवर्णग्रहणेजातिग्रहणस्यदुर्वारत्वात्तितउछत्रमित्यत्रदीर्घात्पदांताद्वेतितुगापत्ति
रितिवाच्यं।ज्ञापकसिद्धत्वेनतस्यासार्वत्रिकत्वात्।अंतरंगत्वेनह्रस्वत्वनिमित्तनित्यतुकएवप्रासेश्च
अज्ग्रहणंप्रतत्स्येत्यादौह्रस्वस्येतितुगव्याप्त्यर्थं।उच्चैरु॥नात्रश्रुतिकृतमुच्चैस्त्वमुपात्तंप्रयो
गेऽव्याप्तेःश्रुतिप्रकर्षस्याव्यवस्थितत्वाच्च।किंतुस्थानकृतंउच्चैरित्यधिकरणशक्तिप्रधानमधिकरणत्वंवो
च्चारणंप्रतितच्चताल्वादीनांसभागत्वेएवेत्याशयेनाह।ताल्वादीति।इदंप्राचामनुरोधेनवर्णसमाम्ना

येऽकारस्य प्राथम्यात् कंठादीति वक्तुमुचितं एवमन्यत्रापि बोध्यं। प्रयत्नप्रेरितो वायुर्यदोर्ध्वभागे प्रतिहतोऽचं
व्यंजयति तदा स उदात्त इति भावः। अजिति। ऊकाल इत्यतस्तदनुवर्त्तते। उदात्तत्वादीनामज्धर्मताया ए
व लोकप्रसिद्धत्वेन ह्रस्वरप्रासो व्यंजनस्याविद्यमानत्वाच्चेदं स्वरूपकल्पनपरं बोध्यं। आद्य इति। यश्छ्वः फिषोंत इ
त्यंतोदात्तः जस्सु स्यादनुदात्तः एकादेश उदात्तेनेत्येकार उदात्तः। अर्वाङ्‌ इत्यभिमुखवाच्यव्युत्पन्नं फिषोंत इत्यं
तोदात्तं। आद्यस्य शेषनिघातेनानुदात्तत्वं अर्वतमं चतीत्यर्थे कृदुत्तरपदप्रकृतिस्वरेण वांतोदात्तत्वं। एक
स्मिन्नच्युदात्तानुदात्तयोर्धर्मिणोर्नैसन विरोधादाह। वर्णधर्माविति। बाहुलकादधिकरणे घञ्। अर्श आद्य
जित्यन्ये। इयं त्रिसूत्री स्पष्टार्था लोकवेदयोरुदात्तादिव्यवहारस्य प्रसिद्धत्वात्। ह्रस्वग्रहणमिति। ह्रस्व
पदघटितग्रहणमित्यर्थः। अतं च मिति। स्वशास्त्रसंकेतितरूपेण बोधकमित्यर्थः। किंत्वर्द्धमात्रारूपार्थबोधकमि
ति भावः। एवं च दीर्घादिष्वप्यर्धमात्रैवोदात्ता। इत आरभ्य नवसूत्र्या अप्रद्युतः प्रागुत्कर्षेणास्य त्रिपाद्याम
पि प्रवृत्तिः। सर्वं चेदं भाष्ये स्पष्टं। अर्द्धमुदात्तमिति। वृत्तिस्तु सत्या सत्यभामेतिवत् व्याख्येया। उत्तरार्द्धमित्य
स्य चार्धमात्रातो वशिष्ट उत्तरो भाग इत्यर्थः। वेदे तु यथाप्रयोगं प्रातिशाख्यादस्माच्च व्यवस्था। तस्य चेति॥
अनुदात्तस्येत्यर्थः। उदात्तेति। उदात्तस्वरितयोः परत्वे सतीत्यर्थः। तयोः परत्वं चोपस्थितानुदात्तापेक्षयैव।
अन्यत्र उदात्तस्वरितयोः परत्वाभावे। प्रातिशाख्ये इति। लोके त्वनुदात्त एवेति भावः। ह्रस्वस्वरितमुदाहरति।

केति। किमोदित्यत्। क्वातीति क्वा देशेति स्वरितमिति स्वरितः दीर्घतमुदाहरति। रथानामिति। ये या इति। स्वरितो वानु
दात्ते पदादावित्येकारः स्वरितः। नोदात्तः स्वरितोदयमिति निषेधस्तु उदात्तादनुदात्तस्य स्वरित इत्यस्यैवानं
तरस्येति न्यायात्। स्वरितपरमुदाहरति। शतचक्रमिति। अहेरित्यर्थेऽस्यः छत्रस्येत्यर्थः छंदसि वा वच
नं प्राङ्‌णौ च क्ष्णुपधाया इति वचनाद्गुणाभावः। उदात्तस्वरितयोरिति स्वरितः उदात्तयणो हल्पूर्वादिति तु न छंदसत्वा
त्। यश्छ्वः फिष इत्यंतोदात्तस्त्वादेकादेशश्च वा स्वरितः। स इति। उदात्तादि ह्रस्वादिसंज्ञक इत्यर्थः। मुख। उच्यते
सो वचनः बाहुलकात्कर्मणि ल्युट्। मुखसहिता नासिकेति विग्रहः तया वचन इति साधनं कृत्तेति समासस्तदाह।
मुखसहितेत्यादि। मुखेति किं यमानुस्वाराणामेव प्रसज्येत एवं चाङ्गेनुनासिक इत्यत्रानुस्वारः स्यात्। नासि
केति किं। शक्तेत्यादावनुदात्तोपदेशेत्यादिना कलोपो माभूत्। अण्दश्येति। यद्यपीदं न व्यक्तिपक्षे व्यक्तीनामा
नंत्यात् तथाप्यण्दशधर्मवत्त्वमकारजातीयादेरित्यर्थः। ह्रस्वत्वादीनां तत्तत्समानाधिकरणोदात्तत्वानुना
सिकत्वादीनां च भेदमाश्रित्येदं बोध्यं। एवमग्रेपि। ऌवर्णस्येति। विवृतस्येत्यर्थः तेन ऌति ऌ वेति विधेयस्ये
षत्स्पृष्टस्य दीर्घत्वेपि न क्षतिः। दीर्घाभावादिति। अत एव तुल्यास्यसूत्रे भाष्ये ऌति सवर्णे इत्यनेन पक्षे द्विलका
रकाभावेऽकः सवर्णे इति दीर्घत्वे ह्लृकार इति ऌकारघटितप्रयोगः संगच्छते। ह्रस्वाभावादिति। इदमेऽओङित्यादौ

सि०कौ०टी०
९

भाष्ये स्पष्टं। गानरोदनादौ चतुर्मात्रार्धमात्रादीनामुपलंभेपि शास्त्रीयकार्ये उपयोगाभावाल्लोके प्रयोगेप्य प्रयोगाच्च
नोक्ताः अत एवानुदात्ततरस्यानुक्तिः एकश्रुतेः स्वरांतरस्येव तदनुपलक्षणं। तस्या लोकेपि सत्वात्।। तुल्यास्य।। तु
ल्यावास्यप्रयत्नौ यस्येत्यर्थः आस्ये भवमास्यं व्याख्यानात् तच्च वर्णोपयोगित्वात् स्थानमेव प्रयत्नस्य पृथगुपादा
नात्। प्रकृष्टो यत्न आभ्यंतरः तस्य वर्णोत्पत्त्यव्यवहितप्राग्भावित्वरूपप्रकर्षवत्वात्। जनकत्वं षष्ठ्यर्थः तच्च
सा कार्यगतभेदं स्थाने [illegible]रोप्य भेदघटितं तुल्यत्वस्य निर्वाहः स्पष्टं चेदं भाष्ये। तदाहुस्तात्वादीति। शिक्षायां कंगदी
नां कंठत्वादिनैव स्थानत्वोक्त्या तद्रूपेणैवास्यभवशब्देन ग्रहणमिति तद्भागभेदमादाय नोदात्तादिषु सावर्ण्यभं
ग इति बोध्यं यस्यैतद्द्वयं येन यदीयेनैतद्द्वयेन तुल्यमित्यर्थः यत्नुष्येकेषामिति निर्देशाद्यावदास्यभवतुल्यत्वं ग्राह्यं
अत एवैचोः सावर्ण्यमाशंक्य नैतौ तुल्यस्थानाविति भाष्ये समाहितं अत एव वलयोर्न सावर्ण्यं तेन तद्धानासा
मित्यादौ तोर्लिरिति न अत एव प्रयत्नशब्देन यत्नमात्रग्रहणमिति पदृय किंचित्प्रयत्नभेदे यत्किंचित्प्रयत्नै
क्यमादाय सवर्णसंज्ञेत्यर्थो ऋरो ऋरि सवर्ण इति सवर्ग्रहणेन ज्ञापकेन साधितो भाष्ये तेन स्थानांशे यावत्त
स्थानसाम्ये इत्येव स्वारस्विको र्थ इति प्रतीयते। न च यावदास्यभवतुल्यत्वविवक्षणे प्रयत्नग्रहणं व्यर्थं प्रयत्नस्याप्या
स्यभवत्वादिति वाच्यं। ह्रस्वदीर्घयोः सावर्ण्यानापत्तेः तयोर्जनकानामास्यभवानां वायुसंयोगानामतुल्यत्वात्।
तस्मादास्यभवानां कंगदीनामेव ग्रहणमिति बोधनाय तत्सार्थक्यात्। आस्येति किं त[illegible]ऋरो ऋरीति लोपोनाभूत्।
॥९॥ रमा ९ ॥९॥

प्रयत्नेति किं वाक् श्चोतति। श्चेति किं शवयोः श्वासाघोषविवारास्य बाह्यप्रयत्नसाम्येन तत्रैव दोषात्। कस्य किं स्थानमित्याशंका
यामाह। अकुहेति।। यद्यपि सर्ववर्णोच्चारणे कंठव्यापार आवश्यकस्तथापि चकाराद्युच्चारणे तात्वादिव्यापारोपि तथा
अकारादीनामुच्चारणे तु नेति भावः कचयोस्तु न सावर्ण्यं यावत्स्थानसाम्याभावात्। भिन्नस्थानकथनवैयर्थ्यापत्तेश्च।
अत्र कंठपदं कंठस्थानतत्समीपजिह्वामूलस्थानोभयपरं। तेन कंठ्यावहौ जिह्वामूलेतु कुः प्रोक्त इति शिक्षया न विरो
धः जिह्वामूलीयपदस्य च वर्णविशेषे रूढिरिति न व्यवहारातिप्रसंगः अत एवायोगवाहेषु जिह्वामूलीयगणनं
भाष्ये तत्तद्वर्णोत्पत्तेः प्राक् तत्तत्स्थानादौ जिह्वा [illegible] स्पर्शाद्यनुभवेन तत्तद्वर्णानां तत्तत्स्थानत्व
निर्णये प्यकुहेत्यादिकथनं साधारणधर्मबोधनायानुवादकं न त्वेतदेवं कगादिस्थानविधायकमिति भ्रमितव्यं
विसर्जनीयपदेनात्र साहचर्याद् काराश्रयस्य तस्य ग्रहणमत एवायोगवाहा विज्ञेया आश्रयस्थानभागिन इति शि
क्षया न विरोधः। दंतादिति। दंतसंयुक्तदेशादित्यर्थः अतो भग्नदंतस्याप्युच्चारणं भवत्येव। उपूपध्मायेते नेनतत्र
व इति योगेनोपध्मानीयस्योष्ठ्यत्वमित्याहोपूपेति। रूढत्वाच्च न व्यवहारातिप्रसंगः। नासिका चेति। चेन स्वस्ववर्गा
नुकूलं तात्वादिग्रहणं। अत एवैषां प्रातिशाख्ये नासिकायां भव इत्यर्थक नासिक्यशब्देन व्यवहारः। यत्त्वनुस्वा
रयमानां च नासिकास्थानमिष्यत इति शिक्षोक्तेरेषां नासिका [illegible] करणं किं च स्थानत्वे कङयोः सावर्ण्यानाप
त्तिः यावत्स्थानैक्याभावात्। यत्किंचित्स्थानैक्ये न तत्त्वे तु यमानामपि परस्परं सावर्ण्यापत्तिरिति तन्न। कंगदी
नामपि करणत्वस्यैवास्यं त्यनेन वर्णानिति भाष्यात् प्रतीतेः। स्थानत्वव्यवहारस्तु वर्णाभिव्यक्तिजनकत्वाद्या

शेवर्णजनकवायुसंयोगाधारेवर्णाधारत्वारोपेण तत्तत्स्थाने जिह्वाग्रादिसंबंधेन वर्णोत्पत्या जिह्वाग्रादेस्तत्संबंधजनक
प्रयत्नविशेषस्पृष्टतादेश्च करणत्वव्यवहारः। वर्णाभिव्यक्त्यनंतरभावी सावर्ण्यानुपयुक्तः पांतरतम्यपरी
क्षोपयुक्तश्च कंठविवरादिनिष्ठविकासादेरास्याद्बहिर्देशावच्छिन्नकार्यस्य जनको यत्नो गुणशब्देनोच्यते अ
कारादिनिष्ठानुनासिक्यस्य भेदकत्वाद्गुणस्येत्यादौ गुणत्वेन व्यवहारस्तु कंठाद्यवच्छिन्नवायुसंयोगेतो
त्पन्नेषु नासावच्छिन्नवायुसंयोगेन तद्रूपधर्मोत्पत्त्या एवं च नासिकायास्तत्र गुणजनकत्वादनुनासिका
कारादीनां नासिकास्थानं नोक्तं मूले एकोयमात्मोदकं नाम तत्स्य गुणभेदादन्यत्वं भवति अन्यदिदं श्री
तमन्यदिदमुष्णमितिदृष्टांतपरभाष्येण तथैव प्रतीतेः आत्मा त्र द्रव्यं उदात्तत्वादीनां गुणत्वव्यवहारस्तु सावर्ण्यानु
पयुक्तत्वांतरतम्यपरीक्षोपयोगित्वरूपसादृश्येनेति बोध्यं। ङ्नादीनां तु तद्गुणरहितस्वरूपानुपलंभेनोभया
वच्छेदेन वायुसंयोगोत्तरमेव स्वरूपोत्पत्त्याविनिगमनाविरहेणोभयोः स्थानत्वमनुस्वारानिति स्थाना नी
त्युक्तं प्रातिशाख्ये नासिक्याङ्ञणनमा इति तद्व्याख्यातारः कङयोः सावर्ण्यं तु भवत्येव आस्ये तुल्यदे
शप्रयत्नमिति वार्त्तिके किमास्योपादाने प्रयोजनमिति प्रश्ने प्रयत्नविशेषणमास्योपादानमित्युक्त्वा तद्व्यावर्त्य
त्वेन बाह्यप्रयत्नान् प्रदर्श्य यथा तृतीयास्तथा पंचमा आनुनासिक्यमेषामधिको गुण इति भाष्येण तस्य बाह्य
प्रयत्नत्वोक्त्या त्र सूत्रे नासिकाया आस्यशब्देन तत्रत्यप्रयत्नस्य च प्रयत्नशब्देनाग्रहणबोधनात् नासिका आ
स्वारयमानां चेति शिक्षायां चेनङ्नादीनामपि संग्रह इति युक्तमत एव कंठयोकार इत्याद्युक्त्वा नासिक्यान्नासिक्ययमानु प

स्वारा इति वदतां मतेतत्प्रहणाभावाच्च। अत एव बाह्यप्रयत्नानुपक्रम्यामोऽनुनासिकानहौ नादिनो हऊषाः स्मृताः
ईषन्नादायणश्चैव श्वासिनस्तु खफादयः ईषच्छ्वासांश्चरो विद्यादित्युक्तं शिक्षायां। नादेति संवारघोषयोरुपल
क्षणं। श्वासेति विवाराघोषयोः न प्लुतविस्पृष्टकरणं। एचः सर्वस्य प्लुतस्य कारस्य च अननुनासिकस्यादर्शनादित्य
लं॥ एदैतोरित्यादि। लोकानुभवसिद्धार्थानुवादके वतपरशास्त्र्यां प्रकृत्या प्लुतानामेतत्स्थानत्वं बोध्यं। तथा च पा पि७
णिनीयशिक्षा। कंठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू। स्युर्मूर्धन्या ऋटुरषा दंत्या लृतुलसाः स्मृताः।
जिह्वामूले तु कुः प्रोक्तो दंत्योष्ठ्यो वः स्मृतो बुधैः। एऐ तु कंठ्यतालव्या ओऔ कंठोष्ठजौ स्मृतौ। अष्टौ स्थाना
नि वर्णानामुरः कंठः शिरस्तथा। जिह्वामूलं च दंताश्च नासिकोष्ठौ च तालु च। हकारं पंचमैर्युक्तमंतस्थाभिश्च
संयुतं। उरस्यं तं विजानीयात्कंठ्यमाहुरसंयुतमिति। यत्तु दंतोष्ठादिसमुदितं स्थानमिति तन्न। शिक्षायां दंत्यो
ष्ठ्यं कंठ्यतालव्या वित्यादौ तत्र भव इत्यधिकारविहितो यतः प्रत्येकमनुत्पत्त्यापत्तेः। दंतोष्ठमित्यादिस्तु सं
गतमेव। स्वांगसमुदायस्य स्वांगत्वाभावेन च शरीरावयवसमुदायस्य शरीरावयवत्वाभावात्। एतेन दंतो
ष्ठरूपमतिरिक्तं स्थानमित्यपास्तं। अष्टौ स्थानानीति प्रतिज्ञाविरोधाच्चेति दिक्। सूत्रे प्रशब्देन विलक्षण
र्थबोधेपि लोके यत्नप्रयत्नयोः पर्यायतेति ध्वनयन्नाह। प्रयत्नो द्विधेति। क्वचिद्यत्न इत्येव पाठः। चतुर्धेति।

१३१०
११

ननु वेति। यत्तु स्वराणामूष्मणां चैव विवृतं करणं स्मृतं। तेभ्योपि विवृतावेङौ ताभ्यामैचौ तथैव चेति शिक्षावाक्याद्विव
ततरविवृततमयोः प्रतीत्यानाचूरुलावितिसूत्रभाष्यादूष्मणां ईषद्विवृतत्वस्य प्रतीत्या च तुर्धेत्यसंगतमिति तन्न।
नाज्झलाविति सूत्रेण विवृतत्वव्याप्यानामेषां सवर्णसंज्ञानुपयुक्तत्वबोधनमित्याशयात्। भाष्यमते तु संवृतस्
यत्नाः एवं चैदैतो रोदौतोश्च न सावर्ण्यप्रसक्तिः प्रयत्नभेदादिति बोध्यं। नाज्झलाविति सूत्रमपि प्रयत्नभेदप्रा
प्तसावर्ण्याभावानुवादकं सन्तस्येव बोधकमत एव भाष्ये तन्न वक्तव्यमिति नोक्तं। स्पृष्टादीनामाभ्यंतरत्वं त्वो
ष्ठप्रभृति काकलकपर्यंतरूपास्यांतर्गतत्तत्स्थानेषु जिह्वाग्रादीनां स्पर्शोपस्थ शदूरावस्थानसमीपावस्था
नरूपाभ्यंतरकार्यकारित्वाद्वर्णोत्पत्त्यव्यवहितप्रागभावित्वाच्च बोध्यं। तत्र बहूनामेकस्थानत्वेपि कस्यचि
दुच्चारणे सम्यक्स्पर्शः कस्यचिदीषदिति शिक्षाकारोत्तमनुभवं चानुसृत्य विवेक्तव्यं। प्रयत्नमिति। नपुंसके भा ति ६
वेल्युट्। प्रयत्नमित्यपाठः। नङ्न्तस्य पुंस्त्वात्। तथा च शिक्षा। स्वराणामूष्मणां चेत्याद्यनंतरं अचोऽस्पृष्टा यणस्त्वीषत्
नेमस्पृष्टाः शलः स्मृताः शेषाः स्पृष्टा हलः प्रोक्ता इति। अचोऽस्पृष्टाः स्पर्शाभावरूपवि
वृतत्ववंतः यणस्त्वीषदित्यनेन तेषामीषत्स्पृष्टत्वमीषद्विवृतत्वं च बोधितं। नेमस्पृष्टेत्यर्धेन शलामीषद्विवृतत्वं यणपे
क्षयाधिकविवृतत्वं चेति बोध्यं॥ अत्र शिक्षोक्तव्याप्यधर्मवतां व्यापकधर्ममादाय न सावर्ण्यमिति यणां चवर्गादिभि
र्न सावर्ण्यं तेनां चित इत्यादेर्नयादिः परसवर्णः॥ विवृतमेवेति॥ प्रक्रियादशायां विवृतत्वं प्रतिज्ञेयमित्यर्थः तेन

॥३३॥ ॥३३॥

न चापदंते भष्भावो जश्श्चमपवादत्वाद्बाधेतेति वाच्यं। अधोदेशिक ऊषतेर्जश्श्च बाधेन चरितार्थं प्रानुदेशिऊषते गोधुङ्मानित्यादौ
किं तु रायस्यायां प्रसक्तं जश्त्वं भवत्युत्तरकारस्य घकारेकृते पश्चात्प्राप्तोप्यपवादो भष्भावो भवतीति संदेहे परत्वाज्जश्त्वं भवतीति अपा
शयात् ४ ईंडाठकादौ दीर्घसिद्धिः अन्यथा संवृतस्य ह्रस्वाकारस्य विवृतेन दीर्घेण सावर्ण्याभावात्स न स्यादिति भावः। दीर्घाकारस्य विवृ
ततरत्वं तु पाणिनिशिक्षानुक्तत्वान्नेत च्छास्त्रप्रक्रियोपयोगीति दिक्। तस्य प्रयोगे संवृतत्वे मानमाह। अप्रा प्रयत्नभेदा
द्दीर्घाभावः। अत्रोद्देश्ये सवर्णग्रहणं जातिनिर्देशो वानन्याख्यानात्। अधिकारत्वे फलमाह। त्रिपाद्यामपीति। अन्यथा
गोधुङ्मानित्यत्र घत्वजश्त्वानुनासिकेषु भष्भावानापत्तिरिति भावः। वस्तुतो घत्वे कृते ऊयदति वत्त्वापत्तिर्दोषः। न
च ततः परत्वाज्जश्त्वानुनासिकत्वयोस्तदप्राप्तिरिति वाच्यं। विप्रतिषेधे परमित्यस्यायथोद्देशत्वेन त्रिपाद्यामप्रवृ
त्तेः। पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्येत्यनेन तस्यायथोद्देशत्वस्यैव बोधनात्। अन्यथा परस्यासिद्धत्वे
विप्रतिषेधसूत्रस्य सिद्धत्वात्परिभाषाणामिवास्यापि कार्यकालपक्षे तेनाकर्षणापत्तेरत एव भाष्ये वत्वमेवापादि
तं। अधिकारत्वादेव श्चुत्वं धुरि सिद्धं वाच्यमित्यादि चरितार्थं। एवं चयत्रानुवृत्तिस्तस्यासिद्धत्वं पूर्वत्वं च क्वचित्
सपादसप्ताध्याय्याः क्वचित्सूत्रांतरस्य ह्रि तायाः तत्रायमर्थः हो ढ इत्यादावस्योपस्थितौ वा क्वभेदेनान्वयः। ह
स्य ढो भवति इदं च शास्त्रं पूर्वत्रासिद्धमित्यत एव न मुने इत्यादिभिस्तन्निषेध उपपद्यते पूर्वत्रेति संग्राहकमेवं
शृंगग्राहिकयैव तु तत्तच्छास्त्रं प्रति तस्यासिद्धत्वं प्रतिपाद्यते। तेनापवादस्ययं प्रत्यपवादत्वं तत्रासिद्धत्वाभा
वेप्यन्यत्रासिद्धत्वं भवत्येव। असिद्धमिति। सिद्धं निष्पन्नं प्रवृत्तं सिद्धश्च प्रत्ययविधावित्यादौ तथा दर्शनात्।
तद्भिन्नमसिद्धमनिष्पन्नमप्रवृत्तं यद्यपि लोके नाहार्यज्ञानस्यैव प्रवर्तकत्वं दृष्टं तथापीह शास्त्रप्रामाण्या

(५०१)

१२ दाहार्यारोपोपि शास्त्रप्रवृत्तावप्रवृत्तौ च नियामक इति बोध्यं। अत्र कार्यासिद्धत्वे अमूद्व्याद्यसिद्धिः अद अ ओ इति
स्थितेपरत्वान्मुत्वे तस्य सपादसप्ताध्यायीस्थकार्यदृष्ट्याऽसिद्धत्वेपि देवदत्तहंतृहतन्यायेनाकाराभावेन परक
पायनापत्तिः अतिदेशस्यारोपरूपत्वान्निरधिष्ठानारोपासंभवेन कार्यप्रवृत्तेरत्र पदे आवश्यकत्वात्। शा
स्त्रासिद्धत्वे तु यत्राप्यंतरंगत्वात्त्रैपादिकप्रवृत्तं तत्रापि तत्त्वदृष्ट्या स्त्र एवाभावारोपेण तन्निवृत्तिबुद्धेरभाव आ
देशबुध्यभावो लक्ष्ये जातत्वबुध्यभावश्च। जायमानकार्यत्वादेश एवस्यानिबुध्या प्रवर्त्तते। न हि रज्जत्वभ्रम
प्रयुक्ता प्रवृत्तिः शुक्तिं न गोचरयतीति न दोषः यत्र तु सह प्रसंगस्तत्राप्रवृत्तिरेवाभावारोपात्। न च पूर्वत्रनेत्येव सू
त्रमस्त्विति वाच्यं। पूर्वशास्त्रप्राप्तो निषेधइत्यर्थेन लोपः सुबिति सूत्रासंगतेः। तद्धि नियमार्थं। लुङीत्याराजन अश्व
इत्यस्यां दशायां कस्यापि पूर्वशास्त्रस्याप्राप्त्येतन्निषेधाप्रवृत्तौ न लोपे जाते भुक्तवंतमितिन्यायेनैतदप्रवृत्तौ
राजाश्वेदीर्घसिध्या नियमानुपयोगात्। राजभ्यामित्यादौ अपि दीर्घापत्तेश्च। पूर्वशास्त्रविषयसंभावनायामि
त्यर्थे राजभ्यामित्यादौ नलोपे सुब्विधि दीर्घविषयसंभावनया सर्वथा नलोपानापत्तेरिति दिक्। बाह्यप्रयत्न इति।।
काकलकाधस्तात् गलविवरसंकोचविकासश्वासोत्पत्ति ध्वनिविशेषरूपघोषाल्पघोषप्राणाल्पत्वमहत्वरू
पकार्यकरत्वमेषां। तथाहि। आत्मा बुध्या समेत्यार्थान्मनो युंक्ते विवक्षया। मनः कायाग्निमाहंति स प्रेरयति
मारुतं। सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः वर्णान्जनयत्ते इति शिक्षायामुक्तं। आत्मांतःकरणसं

स्कार रूपेणात्मगतानर्थान्बुध्या स्वव्यासमेत्यैकबुद्धिविषयान्कृत्वा तद्बोधनेच्छया मनः युक्तं करोतीति तदिच्छावन्मनः काया
ग्निं जागरमभिहंति स कायाग्निः सोदीर्णः समारुतः उदीर्णः ऊर्ध्वप्रेरित इत्यादिस्तदर्थः। एवं च शब्दप्रयोगेच्छयोत्पन्न
यत्नाभिहताग्निना नाभिप्रदेशात्प्रेरितो वायुर्वेगान्मूर्द्धपर्यंतं गत्वा प्रतिनिवृत्तो वक्त्रं प्राप्य उच्चयत्नसहायेन तत्तत्स्था
नेषु जिह्वाग्रादिस्पर्शपूर्वकं तत्तत्स्थानान्याहत्य वर्णानभिव्यनक्ति। ततो यत्नविशेषेण गलविवरविकासादीन्करोति
तत्र येतत्तत्स्थानाभिघातकाद्यत्नास्ते आस्यांतर्गतत्तत्कार्यकारित्वादाभ्यंतरा इत्युच्यंते। गलविवरविकासादि
कराश्चास्य बहिर्भूतदेशे कार्यकरत्वाद्बाह्या इति। मात्राकालिकत्वादिरूपह्रस्वत्वादिकं तु वायव्यल्पत्वमहत्वकृतमि
ति नाभिप्रदेशात्प्रेरकयत्न एव कश्चिद्ध्रस्वस्णे अल्पं वायुं प्रेरयति कश्चिदधिकमिति तस्य वायुप्रेरणरूपे
कार्यमास्य बाह्यदेशमिति तत्तदपि बाह्यमेवातएवाइउण्सूत्रे भाष्ये ह्रस्वत्वादिजनकयत्नस्यास्यत्रिशेषणेन सव
३६ र्णसूत्रे ग्रहणमित्युक्तं। यद्यप्येक एव यत्नः सर्वकार्यजनको वर्णनाशकश्चेतिपरः संनिकर्ष इति सूत्रे भाष्ये उ
क्तं। तथापि तत्तत्कार्येणोपाधिना एकस्मिन्नपि भेदमारोप्य तथा व्यवहार इति बोध्यं। उदात्तादिजनकयत्नस्याभ्यं
तरकार्यकरत्वेपि उदात्तादिशब्दैर्विना बोधितानां तेषामनचुदात्त इत्यनेनाविवक्षाबोधनात्। सवर्णसंज्ञानु
पयुक्तत्वांतरतम्यपरीक्षोपयुक्त [illegible] त्वरूपसादृश्येन बाह्येषु गणनं। इदं ह्रस्वत्वादेरा
नुनासिकस्य चोपलक्षणं। ह्रारइति। शषसा अनुप्रदानं बाह्यप्रयत्नः। विवृतत्व इति। तदभिव्यक्त्युत्तरं

जायमानेकंठविवरविकासेतेषांकर्त्तृत्वविवक्षयाबोध्या।विवारएषांप्रयत्नइतिभावः।अन्येत्विति।वर्गस्तृतीयचतुर्थपंच
मास्तद्यमाहकारानुस्वारौयरलवाइत्यर्थः।नादभागिनः।तत्प्रयत्नकाः यद्यपिरवयादिषुघोषाघोषान्यतरप्र
यत्नमात्रेणापिप्रक्रियांशनिर्वाहस्तथापिशिक्षानुरोधेनान्येषामुक्तिः।अल्पासवो।अल्पप्राणः यतएतदुच्चा
रणोत्तरंप्राणानामल्पत्वमिवभवति।वर्गेष्विति।विद्यमानानामितिशेषः।चतुर्णामिति।निरधारणेषष्ठी।
अन्यत्नमादितिशेषः।पूर्वसदृशइति।सादृश्यंयत्नकृतं अतएवायोगवाहेषुयमानांगणनंभाष्येचत्वारश्चयमाःस्मृता
इतिपाणिनिशिक्षाचसंगच्छते।अयंचवेदएवतद्दाह।प्रातिशाख्यइति।अन्येषामिति अचामुक्तौअन्यहयां
चेत्यर्थः।यरलवाश्चेति।चेनाचामपिग्रहणं।सुपांसुलुगितिसूत्रेडकारस्यांतर्यतोडकारइतिभाष्यात्।घोषसंवा
रनादल्पप्राणत्वमच्यां अन्यथातदैपर्यायेणस्याताम्।अल्पप्राणत्वानंगीकारेदधीपर्यायेणस्यातां अचां
घोषवत्त्वंपरः संनिकर्षइतिसूत्रेभाष्येपिस्पष्टं।अन्येइति।द्वितीयचतुर्थौतद्यमौशषसहा अयोगवाहाश्चे
त्यर्थः।जिह्वामूलीययमादीनांस्थानबाह्यप्रयत्नकथनंतुस्वरूपनिर्णयायनतुसावर्ण्यंतिरस्तम्यपरीक्षा
नुपयोगीतिबोध्यं।अनुपयुक्तइति।तुल्यास्यसूत्रेप्रशब्दग्रहणात्।उपयुक्तत्वेहिशषयोरपिसावर्ण्यंस्या
दितिभावः।आंतरतम्यपरीक्षाचघोषवतइत्यादिनातत्रतत्रस्फुटीभविष्यति।स्पर्शाः।तत्पदव्यवहार्याः।अंतस्था
शब्दआरंतःस्पर्शोष्मणोरंतर्मध्येतिष्ठंतीतितदर्थः।ऊष्माणइति।ऊष्मावायुस्तत्प्रधानाइत्यर्थः।एवंसोष्माण

शु

इत्यस्यवायुनासहचर्चितइत्यर्थइतिप्रातिशाख्यभाष्येस्पष्टं।यद्यपिवर्गद्वितीयचतुर्थयोरपिस्थानेंतरतमसूत्रभाष्यादूष्मत्वं
तथापिविवृतमूष्मणामित्यत्रैतएवग्रस्वंते।अन्यथाकंठ्यादीनांसावर्ण्यंनापत्तौनाऊलावित्यादिनिर्देशासंगतिरितिभावः।
अचःस्वराइति।उदात्तादिभिःस्वयमेवराजंतइतिव्युत्पत्तेः।तद्धर्मत्वादुदात्तादयोपिस्वराइत्युच्यंते।कपाभ्यामिति।खफयो
रप्युपलक्षणं अअइत्युपलक्षणमिकारादेरपितद्दाह।अचःपराविति।लृवर्णयोरिति।आचलृवर्णश्चेतिविग्रहःलृस्य
कइतिपक्षेतिभावः एतदर्थमेववर्णोपदेशेलृकारपाठः अन्यथातस्यासत्वशंकयाऽस्यवचनस्यैवाशक्यत्वंस्यात्।ध
नित्तंचेदमेओङितिसूत्रशेषभाष्ये।तत्रहिसय्यंतेत्यादौहलोनंतराइतिसूत्रेप्रत्याहारघटकेषपिग्रहणकेशास्त्र
स्यामात्राकालस्ययद्वपादेरणुदित्सूत्रेणग्यादिग्रहणेनग्रहणाद्विव्यंजनाश्रयोविधिर्नप्राप्नोतीत्याशंक्यमात्रिकव्यं
जनानुपदेशादनुपदिष्टस्यासत्त्वात् असत्प्रतिपत्तेरशक्यत्वान्न।अणुदित्सूत्रेणतद्ग्रहणमित्युक्तं।नचलृकारशिखे
त्यादावन्त्तइतिनिषेधात्त्युतानापत्तिः लृलृवर्णयोःपृथगनुबंधत्वकरणेनक्वचित्परस्यराग्राहकत्वकल्पनेनादो
षात्।अकारहकारयोरिति।एकारस्यतालव्यत्वमोकारस्यौष्ठ्यत्वमितिमतेएकारशाकारादीनामप्युपलक्षणमिदं।
एतेननाकृशलाक्रियैवसूत्रयितुमुचितमित्यपास्तं।हश्चेत्येवसिद्धे अतोरोरित्याकारव्यावृत्त्यर्थं।सूत्रेद्विवचनोपपत्तयेमध्य
मपदलोपिसमासंदर्शयति।आकारसहितइति।अतएवचेलाश्चेतिनिर्देशउपपद्यते।समाहारद्वंद्वेतुटचूप्रसंगोऽलि
तिसमाहारद्वंद्वंकृत्वाआपदेनद्वंद्वेतुअजभिरप्याकारस्यसावर्ण्यंनस्यादितिभावः।अतएवभाष्येप्रयत्नभेदेनैषां

सावर्ण्याभावः साधितः। एतेषु परेष्विति। इदमुपलक्षणं एतेषु विद्यमानस्येत्यपि बोध्यं तेन हकारादीनामकारादिषु परतो
दीर्घादिसंग्रहः। अचश्च स्यादिति। अच्पद बोध्यत्वं स्यादित्यर्थः इदं प्रत्याहारघटकेष्वपि ग्राहकशास्त्रप्रवृत्तिरिति मतेन प्र
त्तिपक्षे च बोध्यम्। अणुदित्। अणमुद्दिश्य ग्राहकताबोधकता न विधीयते। सवर्णस्येत्यस्य बोधक इति शेषः। आदेशा
दौ सवर्णग्रहणवारणायाह। प्रतीयते इति। परेतु अप्रत्ययग्रहणमेकदेशानुमत्या भाष्यमानेन सवर्णानां ग्रहणं
नेति परिभाषां ज्ञापयतीति युक्तं प्रत्ययपदस्यतदर्थत्वं तु न युक्तं वार्त्तिककृता दित्किदित्युपसंख्यानोक्तेः। भाष्यकृ
ता चाप्रत्ययग्रहणमेतत्परिभाषाज्ञापकमित्युक्तेः। ज्यादादीयस इति सूत्रे भाष्ये ध्वनितमिदं। तत्र हि किमर्थमादित्त्वमु
च्यते ज्यादङ् इयेयो च्यतोका रूपसिद्धिः आंतर्यतो दीर्घस्य दीर्घो भविष्यतीति एवं तर्हि इदमेव ज्ञापयति भवत्येषा परिभा
षा भाव्यमानेनेत्यादित्वदुक्तव्याख्याने हि पूर्वपक्षसिद्धांतयोरुभयोरपि निर्दिष्टत्वापत्तिः। जातिपक्षे प्पनयैव पारि
भाष   यासवर्णग्रहणवारणीयं व्यक्तिपक्षे गुणभेदकत्वप्रासंचवारणीयं तेन घटवदित्यादौ ना
नुनासिको वकार एतेनानुदित्येव सिद्धे अणग्रहणेनाणसु गुणभेदकत्वं ज्ञायते। इति परास्तमित्याहुः। ननु चोदित्या
दावनुवादे कथमुदित्वमिति चेन्न। व्याकरणांतरे एषामुदित्संज्ञकत्वेनादोषात्। उपदेशशब्दस्य करणसाधनत्वेन प्र
त्यपरत्वे ऽस्यापि शास्त्रत्वेनेत्वप्रवृत्तेः सुलभत्वाच्च चोमिन्नक्रमइत्याहोदित्चेति। यद्यपि समुदायसवर्णिनो अप्रसिद्धा
स्तथापि तद्वयवादिसवर्ण एवात्र तत्सवर्णबोध्याः। ह्रस्वाकारादेरपि कालपुरुषाद्युपाधिभेदेन स्थानेषु भेदमा ॥१४॥

रोप्य तुल्यस्थानत्वं सूपपादं। अत्रेति। ग्राहकसूत्र एवेत्यर्थः व्याख्यानादिति भावः उपसर्गादृतीत्यादि तपरकरणादिति
तु न युक्तं लृकारग्रहणेन चारितार्थ्यात्। एवमिणपि परेणैव। अचिश्नुधात्विति सूत्रे इणइत्येव सिद्धे य्वोरिति गुरुनि
र्देशाद्व्याख्यानाच्चेति लणसूत्रे भाष्ये स्पष्टं। नन्वेवमस्य च्वावित्यादौ सवर्णग्रहणं न प्राप्नोति अणग्रहणे नवर्णस
माम्नायस्थानामेव ग्रहणेन णकारादिचिह्नेन प्रत्याहारे तत्प्रत्यभिज्ञानेन तत्र स्थायिवर्णोपस्थिते षु उच्चारिता
भेदेन गृहीतेषु सूत्रस्य चारितार्थ्येन व्यक्तिपक्षे तत्रत्यात्रस्य व्यक्तौ भेदेन प्रकृते प्रत्याहारघटक द्वितीयवर्णा
दौ चोच्चारितस्यैव ग्राहकत्वादप्रवृत्तेरिति चेन्न। जातिपक्षाश्रयणेनादोषात्। अत एवानेकतकारादीनां
उत्त्वादिसिद्धिः सूत्रे ऽणग्रहणं च न कार्यं ऋलृवर्णयोः सावर्ण्यमित्यनेन समानजातित्वस्यैवातिदेशेनो
पसर्गादृतीत्यादौ न दोषः एतद्व्यतिरिक्तसवर्णे समानजातित्वसत्वात् पृथगनुबंधकरणं च न ऋदिदृदि
यथा५ त्प्रयुक्तकार्यसंकरो व्यक्तिपक्षे अइउण् सूत्रे शेषोक्तभाष्यरीत्या तपरसूत्रस्य जातिग्रहणप्राप्तसव
र्णग्रहणनियामकत्ववत् प्रत्ययइत्यस्य योगविभागेन तत्प्राप्तसवर्णग्रहणनिषेधकत्वात् यदादीनाम
इत्यादौ विधेयेन दोषः। सामर्थ्यादिति। एचोयवायाव इत्यादौ स्थानेंतरतमसूत्रेणैव निर्वाह इति व
क्ष्यते न याभ्यामित्यत्र ऐ औ स्वरूपेण पाम्यो। वृद्धिरादैजित्यत्रापि ङित्येव पाक्यं। तत्र गुणसूत्रे च परस्य रसवर्णसं
ज्ञावादिमते चतुर्णां ग्रहणं सत्वात् अत्रैतत्सूत्रवैयर्थ्योपन्यासेन तन्मूलकस्य गुणवृद्धिसंज्ञाविधौ प्रत्याहारग्र
√२ एवं गुणभेदकत्वप्राप्तसवर्णग्रहणनिषेधकत्वमप्यस्य बोध्यं। अत एव घटवदित्यादौ नानुनासिको वकारः
३

यग्रहणवैयर्थ्यस्य तु तावेव एचोप्रग्रहस्येत्यत्र तत्त्वग्रहणवैयर्थ्यस्य च संग्रहो बोध्यः प्रयत्नभेदेनाप्यसावर्ण्यमेतयोः
प्रागुक्तं न विस्मर्त्तव्यं। यद्यपीति। इदं व्यक्तिपक्षे। वर्णानामुपदेशस्तावदुपदेशोत्तरकाले संज्ञा तदुत्तरकालमादित
येनेति प्रत्याहारस्तदुत्तरकाला सवर्णसंज्ञा तदुत्तरकालमणुदिदिति एतेन सर्वेण समुदितेन वाक्येनान्यत्र सवर्णा
नां ग्रहणं भवति। न चात्रेकारः प्रकारं ग्रहातीति नाऊलाविति सूत्रभाष्योक्तवाक्यापरिसमाप्तिन्यायादित्यर्थः। प्रयंभा
वः। आदिरंत्येनेति प्रत्याहारसिद्धौ नाऊलावित्येतद्वाक्यार्थबोधे सति निर्णीतेतद्विषयपरिहारेण सवर्णसंज्ञाबोध
निश्चये अणुदित्सूत्रेण तावतां ग्रहणं बोधनीयमन्यथा बाधकसंभावनया तुल्यास्यसूत्रजशक्तिग्रहेऽप्रामाण्यसंदेहे
नाणुदित्वाद्यजबोधानापत्तिः। न चैतद्वाक्यार्थबोधात्प्राक् निश्चय इति॥ हो ढ इति। हकारेणाकारग्रहणे सति यद्यत्रा
नाणुदित्वाद्यजबोधानापत्तिः ... यव
न्नोतितस्य सर्वस्याप्युपसंहरणमिदं। ननु यण सवर्णानामप्रसिद्धेरज्ग्रहणेनैव सिद्धे अणग्रहणं व्यर्थमत आह। यव
लाइति। अप्रमोनुनासिकान् हाविति शिक्षोक्तेर्यण इति नोक्तं। तेन संयंतेत्यादौ परसवर्णनिष्पन्नानुनासिकयवलानाम
चिचेति द्वित्वं सिध्यति। हलोयमामिति लोपस्तु वैकल्पिकः। अयं चेदं बोध्यं। व्यक्तिः पक्षे गुणभेदकाद्यभिमानेनात्रसू
त्रेण ग्रहणमिति। अतोभिसइत्यादौ तपरकरणात्सहिवहोरिति सूत्रस्य वर्णग्रहणाद्याख्यानाच्चतपरपदे बहुव्रीहि
पंचमीतत्पुरुषाविति। आह तः परइत्यादिना। वर्णग्रहणे तु तत्सामर्थ्यादिलावच्छिन्नवर्णग्रहणबोधनेन तपरसूत्राप्रवृत्तिः।
अप्रयोगाहरणमतोभिसइति। अप्रयोगाहरणं वृद्धिरादैजिति। यद्यप्यत्र संज्ञा तात्पराऽनच तत्समकालस्तात्सवर्णाबाप्ति

॥३५॥

दस्तथापि तपरकरणात् भाष्यप्रामाण्याच्चतात्परश्चाद्बोध्यो वर्णः स्वसमकालग्राहक इत्यर्थेनादोषः। इदं च विध्यर्थमेव अणग्र
हणाननुवृत्तेः। गुणानां भेदकतया न तिविधिलेपि वृद्धिरादैजित्याद्यावाकारांशे वाकारांशे नानेनातोभिस इत्यादौ परत्वेनात्
हणाननुवृत्तेः। गुणानां भेदकतया व्यवहारस्य परस्पर परिहारेणैव दृष्टत्वये इवविरोधस्य सत्त्वात्। गुणानामभेदकत्वे तु न वकाशत्वा
दितसूत्रबाधः संख्याकृतव्यवहारस्य परस्पर ... तत्कालस्येत्य
बाध इति बोध्यं। अप्रयोगव्यवधिमतोः साजात्येन वर्णस्यैव संज्ञात्वेपि विशिष्टग्राहिभक्त्युक्तिः सौत्रत्वाद्बोध्या। तत्कालस्येत्य
स्य तदुच्चारणाकालसमकालस्येत्यर्थस्तदाह। समकालस्येवेति। एवकारोन्यायसिद्धबाध्यबाधकभावस्यानुवादक इति भा
स्य तदुच्चारणाकालसमकालस्येत्यर्थमेव सवर्णग्रहणाननुवृत्तेः। एवं गुणानामभेदकत्वमिति वृद्धिरादैजिति सूत्रभाष्यसंमतसिद्धांतप
क्षः। जातिपक्षे तु नियमार्थमेव इदमाद्गुणइत्यादौ विभक्तितकारेण चक्रेतोऽपसर्गादृतीति तपरकरणात्। इदोदबित्यादौ दकार
इपि नियमार्थमेव इदमाद्गुण इत्यादौ विभक्तितकार इवोच्चारणार्थो मुखसुखार्थो वा। तपरसूत्रे दकारप्रश्लेषपक्षे तु धकार
सा०१ एवेति न दोषः। स च पंचमीसमासोभावेतकार इवोच्चारणार्थो मुखसुखार्थो वा। तपरसूत्रे दकारप्रश्लेषपक्षे तु धकार
एवेति न दोषः। स च पंचमीसमासो ... वृद्धिरा। वृद्धिरादैजिति पदत्रयमिति न समासांतादिप्रवृत्तिशंका तपरकरणमसं
दिग्धस्थानिकोरकारो बोध्यः॥ वृद्धिरा। वृद्धिरात्त ऐजिति पदत्रयमिति न समासांतादिप्रवृत्तिशंका तपरकरणमसं
दिग्धस्थानिकोरकारो बोध्यः॥ वृद्धिरा। ... अत्र शास्त्रे गुणानामभेदकत्वं ज्ञापकाद्वाश्रित्य सवर्णग्रहणार्थत्वाभावस्योक्तत्वा
देहार्थतया पूर्वार्थ्यं पूर्वकृतसूत्रे भाष्ये अत्रशास्त्रे गुणानामभेदकत्वं ज्ञापकाद्वाश्रित्य सवर्णग्रहणार्थत्वाभावस्योक्तत्वा
त्। ऋक्तौ कल्पं गंगौघ इत्यादौ त्रिमात्रव्यावृत्तये परार्थमपि वृद्धिशब्दोपरत्वपरे ऽर्थपरत्वासंभवात्। अपदैचोर
द्विपदा भिन्ना इति वाक्यार्थः। पदपदार्थयोस्तादात्म्यस्यांगीकारात्। रामेत्ति इदं रं नाममानभंगः पिनाकिन इत्या
दिनतयोरभेदप्रतीतेरनुभवसिद्धत्वादित्यन्यत्र विस्तरः। वृद्धिशब्दस्य संज्ञात्वं तु व्याख्यानात् विधेयत्वेपि तस्य
पूर्वप्रयोगो मंगलार्थः। अपक्षेत एकाचित्यादौ तथाकरणं विधेयस्य प्रथमं प्रयोगे असाधुत्वभ्रमवारणायेति भाष्ये स्पष्टं।

(नरो)
१६ सर्वशब्दानांसर्वार्थवाचकत्वेपिवाचकत्वस्यगृहीतस्यैवबोधजनकतयासंज्ञासूत्राणामज्ञातशक्तिज्ञापकतयावि
धित्वं।किंचसर्वेसर्वार्था इत्यभ्युपगमोयोगिदृष्ट्या नास्मदृष्ट्या।।सर्वशब्दानामर्थानांचविशिष्यज्ञानाभावात्।सा
मान्यतस्तथाज्ञानंचनबोधोपयोगि शास्त्रेत्वस्मदाद्युद्देशेनैवप्रवृत्तमितिबोध्यं।तत्रैवसंकेतग्राहकत्वशास्त्रकर
णं स्वेच्छयैवेयेषांयदृच्छाशब्दत्वेनव्यवहारः स्वेच्छयासंज्ञाः क्रियंत इतिचएतदुपदेशरूपसंकेतात्प्राक् तत्रसं
ज्ञात्वाग्रहेणतासामनित्यत्वव्यवहारः।अतएवतत्संज्ञाकरणज्ञानरूपप्रकरणादन्यार्थाग्रहणरूपनियमः
कृत्रिमाकृत्रिमन्यायमूलतयोक्तः संख्यासंज्ञासूत्रेभाष्ये अर्थिकमेवानुनियममाश्रयसंज्ञासूत्रेषुनियमत्व
व्यवहारोव्यवहारायनियमः संज्ञायाः संज्ञिनिक्वचिदित्यादिनाकृतः वाचकताबोधकत्वेपितदनुत्पादकत्वान्नशब्दार्थसं
बंधनित्य [illegible] ताहानिः आसांचशिष्टप्रयुक्तत्वात्साधुत्वमित्यन्यत्रविस्तरः।कार्यकालपक्षेपिमृजेर्वृद्धिरित्यादौवृद्धिपदा
र्थजिज्ञासायांवृद्धिरादैजित्युपस्थित्यातदर्थबोधरूपेशक्तिग्रहेवृत्तेविधिवाक्यार्थबोधः।अतएवष्यङःसंप्रसारणमि
तिसूत्रेभाष्येकार्यकालसंज्ञापरिभाषंप्रगृह्यः प्रकृत्येत्युपस्थितमिदंभवतिईदूदेद्द्विवचनंप्रगृह्यमितीतिनिर्देशेति
प्रदेशांतर सूत्रेकेयरोपिनि [illegible] रुक्तेसंज्ञावाक्यत्त्वतुनिर्देशेतिस्मर्यतइत्याह।अत्रपक्षेएकत्रशक्तिग्रहेवृत्तेपितस्य
स्यबोधो देशस्थस्यैवतत्रार्थशक्तिरितिसंभावनयाप्रदेशेषुतत्तत्पदशक्तिग्रहपूर्वकंविधिवाक्यार्थबोधः यथोद्देशेतुए
नस्यादिति कदेवशक्तिग्रहात्सर्वत्रबोधइतिविशेषः।एतेनकार्यकालपक्षेतपरत्वंस्वरूपार्थमेवादैचपदार्थस्यवृद्धिविशेषणं
सर्व७ तयाविधेयत्वेनसवर्णग्रहणाप्रसक्तेः यत्रवृद्धिपदंतत्रादैजित्युपतिष्ठतइतिक्रमेणसंज्ञासूत्राणामर्थादित्यपास्तं
।।१६।। इत्यन्यत्रविस्तरः।अत्रोत्तमन्दावितानामपिप्रादैचांग्रहणंतेनशालीयादिसि
भाषं भस्येत्युपस्थितमिदंभवति [illegible] यचिभमितीत्युक्तंईदूदेदितिसूत्रेभाष्येपिकार्यकालसंज्ञापरि ६।। ।।१६।।

वा१ ढि:।भ्वादयोक्रियावाचिनः किंविकल्पार्थकंवाह्स्यनिपातस्यधातुत्वेऽप्रातिपदिकत्वात्सुबभावेपदत्वानापत्तेः
तङ्कौतुनदोषःवार्थस्यविकल्पस्यभूतेविध्यत्कालसंबंधाभावेनक्रियात्वाभावात्।अस्त्याद्यर्थस्यापितत्वंभूतभविष्यत्का
व३ लसंबंधात्भ्वादयकिं।आणवयतिदृथतीत्यादीनांधातुत्वेशास्त्रविषयतयासाधुत्वापत्तेः सत्वंत्रिशेषिभाष्येस्फुटमेतत्।स्तं
भ्वादीनामुदित्वेनधात्वधिकारविहितकार्येद्धिरूपत्वादिनास्थितपाठभ्रंशानुमानान्नतेषुदोषः।प्राग्रीश्वरात्।अधिरीश्वरइत्य
भिव्याप्यप्राग्निपातादित्यधिकारः प्राक्निपाताः संतोगत्यादिसंज्ञाइत्यर्थः।तेनताभिःसमावेशः।अधिरीश्वरेविभाषाकृ
ञिइत्यत्रनिपातपदसंबंधश्चसिद्धः एषांद्योतकत्वंवाचकत्वंचयथाकार्यंयथाप्रयोगंबोध्यमित्यन्यत्रविस्तरः।असत्वेति
पर्युदासोलाघवादिसाद्दृश्यग्रहेति।विशेष्यतयाद्रव्यभिन्नार्थइत्यर्थः।तेनक्रियाविशिष्टद्रव्यवाचिनांविप्रादिघटकप्रादीनांन।
माप चादयःकिं।स्वरादिपठितानामसत्त्ववृत्तित्वेप्याद्युदात्तत्वंभूदितिउपसर्गाःयोगग्रहणंयदर्थे [illegible] प्रादीना
मन्वयस्तंप्रत्येवोपसर्गत्वादीत्यर्थबोधनायतेनप्रगताःसेचकाअस्मात्प्रसेचकोग्रामइत्यादौषत्वंनगतिश्चेतिचउपस
र्गसंज्ञासमावेशार्थः।तेनप्रतिप्रणीतमित्यादौगतित्वाद्व्रतिरनंतरइतिस्वरउपसर्गत्वात्णत्वंचसिध्यति।प्रादय
इतियोगविभागस्तुक्रियायोगाभावेपिनिपातत्वाय।एतत्सिद्धमेवोपसर्गप्रतिरूपकस्यनिपातत्वमुक्तंचाद्यंतर्गण
त्वेणेतिदिक्।प्रपरेत्यादावनुकार्यानुकरणयोरभेदविवक्षयासुबनुत्पत्तिः।निसइसिति।अत्रेदंबोध्यंसोत

नशे
८

ग्रहणे रांतस्याग्रहणमेव। यत्र तु रुत्वमसिद्धं तत्र रांतग्रहणेपि न सांतग्रहणं तद्दृष्ट्या रुत्वस्यासिद्धत्वात्। यत्र तु रुत्वस्य सिद्ध
त्वं यथा षत्वणत्वयोस्तद्विषयोपसर्गत्वप्रतिषेधपरे दुरः षत्वणत्वयोरितिवार्त्तिके कृतरेफसांतस्यापि ग्रहणं षत्वणत्वयोरि
त्यसत्वविधायकशास्त्रयोरित्यर्थात्। अतएव सुषामादिषु दुःषुशब्दपाठः सार्थकः। सहित्अपडुः सुषुप्स्यः कुरिति दुःपूर्वक
स्याधातोः कुप्रत्यये साधु। अन्यथा दुःपूर्वकात्कुप्रत्यये उपसर्गादितिषत्वे सिद्धे तद्वैयर्थ्यं स्पष्टमेव। न चास्य रुत्वेनार्थवत्वा
र्थाभावादुपसर्गत्वाभावः। अत्यंतरूढेषु प्रतिष्ठानिष्ठादिषु षत्वानापत्तेः अर्थवत्वारोपेण चेत्कृते पिदुःसः पावस्त्क
दुरयत इत्यादौ रुत्वासिद्धत्वाभावार्थ इति दिक्। नवेति। इति लोकेर्थपदार्थकस्य शास्त्रपदार्थकत्वकृत। यथा गविस्य
यमारुह्य दावलुक्करणे इह तु स्वं रूपमिति परिभाषया शब्दपदार्थकस्यार्थपदार्थकत्वकृतं क्वचिदिति। पदार्थविपर्यास न१
कृत्वं यथानुवादवाक्ये स च न वाशब्दाभ्यां प्रत्येकं संबध्यते व्याख्यानात्। तेन नवाशब्दयोरर्थौ संज्ञिनौ स्वं रूपमित्यस्य प्रसा
ख्याने विति शब्दावर्थ एवार्थे कार्यस्याबाधात्। तयोरेव संज्ञित्वे तु विभाषाश्वेरित्यादौ नवाशब्दावादेशौ स्यातां। प्राप्तवि
भाषा सुनासोपयोगः। तासां पक्षे निवृत्तिमात्रफलकत्वात्। अप्राप्तविभाषास्वपि न। तासां पक्षे विधिमात्रार्थत्वात्। अ
प्राप्तत्वेन निषेधासंभवाच्च। तस्मादुभयत्रविभाषार्थमिदं। विभाषाश्वेरित्यादौ एतदभावे यदि विधिमुखेन प्रवृत्तिस्त
र्हि पित्स्वेव विकल्पः स्यात्। किंतु तु नित्यमेव संप्रसारणं स्यात्। निषेधमुखेन प्रवृत्तौ कित्स्वेव प्रवर्त्तेत न पित्सु उभ

१२

यथाप्रवृत्तिस्तथैव रूपद्वयाभावभेदापत्तेश्चान्नाकास्य संज्ञाकरणे तु श्रुतक्रमानुरोधात्पूर्वं किंतु निषेधस्ततः किंद किंद्रूपे सर्वस्मिन्नलिटि एक
रूपं प्राप्ते सति पक्षे भवतीत्येकरूपेण विधिमुखेनैव विकल्पः। भाष्यकृतस्तु एवं हि द्विकोरन्तरं स्यामिसादावनुपपत्ति
र्विभाषापदाभावात्। इति शब्दस्य विभावे यत्रापि संबंधात् विभाषापदार्थः संज्ञेति तु न युक्तं अर्थसंज्ञात्वस्यादृष्टत्वात्। अ
र्थाद्विशब्दमात्रं संज्ञेत्यपि न युक्तं एकस्यार्थस्य सभाव न फलकानेकसंज्ञाकरणस्यानाकृत्तिः संज्ञेति ह द्विसंज्ञास्त्रस्यभा
ष्येणातिरस्कारात्। तस्मात्तत्र तद्व्याख्यानुसारेणोभयमुखेन प्रवृत्तिर्वाच्येति विभाषापदघटितेपि तथैवास्तु किं सूत्रेणेति जा
तिव्यक्तिपक्षयोरुभयोरपि तत्त्वं प्रत्याचख्युः। स्वरूपं। स्वरूपमित्यस्य बोध्यमिति शेषो व्याख्यानात्तदाह। संज्ञीति। शास्त्रे यदि
त्यादौ किं कर्त्तव्यं तोपस्थितार्थस्य प्रत्ययेन पौर्वापर्यासंभवात् प्रातिपदिकादित्यनेनान्वयसंभवाच्च तदर्थकशब्दमात्रग्र
हणापत्तौ नियमार्थं सूत्रं। तत्र स्वशब्देनात्मीयत्वेनार्थमाह रूपशब्देन शब्दरूपमेतदुभयं संज्ञीत्यर्थः। तत्रार्थो न विशेष्य
उक्तयुक्तेः। किंतु शब्दविशेषणं एवं चार्थविशिष्टः शब्दः संज्ञीत्यर्थवद्ग्रहणपरिभाषासिद्धा। अत्र चार्थः कल्पितान्वयव्यति
रेककल्पितः प्रकृतिप्रत्ययादिबोध्यः शास्त्रीयोपि स च मुख्यः प्रसिद्धश्चेति गौणमुख्यन्यायोभिव्यक्तपदार्था ये इति न्यायश्च सि
द्धः। अत एवेयं विशिष्टरूपोपादाने एवेदं सूत्रं च। तत्रैवार्थोपस्थितेस्तत्रैव नियमप्रसक्तेश्च न तु वर्णग्रहणे इत्याकरे स्पष्टं। दा
धाध्वित्यस्य हलघोरित्यादौ चारिर्थ्यो नोपसर्गघोरित्यादौ स्वरूपमित्यनेन न परत्वाद्बाधनं कावारणार्थमन्नाष्टसंज्ञेति नात्र
षष्ठी तत्पुरुषः कर्मसंज्ञादेरर्थसंज्ञात्वेन निषेधाप्रवृत्तौ कर्मण्यणित्यादौ स्वरूपग्रहणापत्तेः। किंतु सप्तमीतत्पुरुषः शब्दपदे

प्रशे नचात्राख्यातं तदाह। चाद्यन्तावित्येति। भाष्ये तु अर्थकार्यस्य बाधे पुपस्थितत्वाच्छाब्द इत्यादौ तत्र ज्ञानबोधे प्रकारतया भासमानस्यारा
१८ ति२ ज्ञस्य शब्दस्यैव ग्रहणं भविष्यतीत्यर्थसूत्रं। उपस्थितार्थत्यागे मानाभावेन तस्य विशेषणतयान्वये संभवेनार्थवत्परिभाषापि सिद्धाल
क्ष्यानुसारात्तत्त्वतंज्ञाकरणे ज्ञानरूपप्रकरणाच्च षांत संख्यावाचकषष्ठ्याद्यस्य षट्संज्ञाकरणे नत्राष्टन्ना स्त्रीयसंज्ञायां
स्वरूपाग्रहणज्ञापनाच्चोपसर्गे घोरित्यादावदोषेणात्राष्टसंज्ञेत्यपि बोध्यमित्यफक्कं। अत एव जनपदापत्यपञ्चदेवतादिशब्दे
षु नदोषो। अत एव वृद्धादिषु विशेषाणां ग्रहणं स्वे पुष इत्यत्र पर्यायाणां विशेषाणां स्वरूपस्य च ग्रहणं सभा राजेत्यत्र पर्याया
णामेव ग्रहणं पत्तिमत्स्यमृगान्हंतीत्यादौ मृगपक्षिणोः पर्यायाणां विशेषाणां स्वरूपस्य च ग्रहणं मत्स्यपदेन स्वरूपस्य विशे
षाणां मीनरूपपर्यायस्य च ग्रहणं सिध्यति। अन्यथा तदर्थं यत्नः कर्तव्यः। परेश्च घांकयोरित्यत्र घग्रहणेन स्वरूपग्रहणं नदी
घोर्ल्मासीत्यत्र नदीपदे न स्वरूपग्रहणं च सिध्यति। तन्त्रानुसारिव्याख्यानेन च ममसर्वेष्टसिद्धिः ज्ञापकपक्षेपि ज्ञापकसिद्ध
स्यासार्वत्रिकत्वान्न दोषः अत एव भगवता ज्ञापकेन सिद्धं वचनं प्रत्याख्यातमिति दिक्। येन विधिर्येनेति करणे तृतीया विधिरि
ति भावे क्तिः कर्मत्वविधे यं कर्त्ताचार्यः प्रसिद्धत्वाल्लभ्यत एव। यत्तु करणं कर्तृपरतंत्रमिति तृतीयया पारतंत्र्यं लक्ष्यते
तच्च शब्दानां विशेषणत्वेनेति विशेषणमिति लभ्यमिति तन्न सुप्विभक्तौ न लक्षणे तस्य सर्वसंमतत्वात्। किंच क्रुनाद्येषां
प्रत्ययानामन्येषां वा शब्दानामर्थविधानं कृतं शास्त्रेण तेषामन्यत्रार्थे तदर्थं वा येषां लक्षणयापि साधुत्वाभावस्य प्रसंगः युयो
गादित्यादिभाष्यतो लाभात्। करणस्य व्यापारवत्त्वनियमाद्येषांच व्यापाराभावाद्विशेषणमेवात्र करणं तृतीयांते नो

चतेतस्य चेतरव्यावृत्तिकरणमेव व्यापारः। तदुक्तं भाष्ये येनेति करण एषा तृतीयान्येन चान्यस्य विधिर्भवति यथा चैत्रस्य सं
यामं दत्त्वाश्वादिभिर्विधत्ते एवमचो यदिति अचा धातोर्यतं विधत्ते इति। अनेन चान्यस्मैतत्तेनेमयस्य कार्यं यस्मिन्परतश्चतयो
र्करणत्वं दर्शितं। अन्यस्यात्यन्तमस्मिन्नित्यस्यापुपलक्षणं तत्र शास्त्रोपस्थिति विशेष्यस्य तादृशं विशेषणमेवत्तदंतशब्दा
र्थिकं। कचित्तु तिगमके ऽतादृशं शब्दरूपं विशेष्यमादायापि तदंतविधिः तच्चांतरंगत्वात्समानाधिकरणमेव। तत्रत
त५ दंतविधौ सति बोधविशेषणत्वयोग्यताप्येतत्सूक्तौ निमित्तं अत एवेन कृदित्यादौ इनंतेत्तरंतविधिर्न ह्यौ नंगमित्यन्वयो भ —
वतितदंतस्येत्यस्य तदंतशब्दस्येत्यर्थः। नन्वेवमेरजित्यत्र यस्त्र न स्यादत आह। स्वसंचेति। स्वमित्यनुवृत्तं षष्ठ्या विप त६
त७ रिणमत इति भावः स्वंरूपमित्यस्य प्रत्याख्यानेतु दंतस्य चेति पा ल्यमिति बोध्यं। समासप्रेति। विशेषणविशेष्य
भावव्यत्यासे तात्पर्यग्राहकमिदं। एवं द्वितीया श्रितेत्यादौ श्रितादयोऽधिकाप्राप्तसमर्थेरित्यस्य विशेष्यभूतार
ति न तदंतविधिः तस्य तस्य कृतिकिं लक्षणयासुपेत्यनेनान्वयः तेन कुशं परमश्रित इत्यत्र न समासः नडादिभ्यः फ
गित्यादावपि नडादिविशेष्यं प्रातिपदिकं विशेषणमिति सोत्रनाडिरित्यत्र न फक्। उगिदिति तिमाति भवती
त्यत्रोगित इत्येतिङीप्। प्राप्तिरित्य च तदन्तस्य सिद्धः। एवं चोक्तनिषेधः प्रत्ययांशो गृह्यमाणप्रातिपदिकविषये
प्रत्ययविधिविषये ऽगृह्यमाणप्रातिपदिके न तदंतविधिर्नास्ती तेनेनैकवाक्यत्वलाभाद्गुणिद्धर्ष्येति त्वेकदेशा
नुवाद इति बोध्यं। अत एव च वनोरचेत्यादौ प्रत्ययग्रहणेन तदंतग्रहणमित्यस्य नायं निषेध इति दिक्। वि॰ रामः।

न॰शे
५९

नायेघञ्‌। शब्दानुशासनप्रस्तावादाह। वर्णानामिति। उच्चारणाभावइत्यर्थः। सचव्याख्यानात्‌। किंचिद्वर्णोच्चारणानंतरका
लिकएवग्राह्यते। प्रदेशाश्चावसानइत्यादयः। अभावस्यापिबुधिकृतंपौर्वापर्यंवर्णवत्‌। परशब्दोनान्यार्थोन्यत्वस्याव्यभि
चरितत्वादतआह। अविरामइति। स्वभावसिद्धार्धमात्रातिरिक्तकालव्यवायेनरहितः। तेनतद्व्यवायेनवाक्यो
च्चारणेसंहितासंज्ञा। संनिकर्षस्त्वप्रायः परेण केत्स्वेवेत्यपि। अतएवावसानकार्याणांसंहिताधिकारेपाठः। नचावसा
नसंज्ञयापरत्वेसावकाशयाः संहितासंज्ञायाः सत्यपिसंभवेबाधनंभवतीतिन्यायेनविषयभेदेपिबाध ःस्यादि
तितदसंगतिरेवेतिवाच्यं। तदधिकारेतेषांपाठेनाकडारसूत्रस्यत्वयाश्रीयसंज्ञामात्रविषयत्वकल्पनात्‌। एतेन
मतथालोकेपिसत्वात्‌। तदुक्तंवार्तिककृता संहितावसानयोर्लोकविदितत्वादिति। नचावसानकार्येषुसंहिताधि
कारासंबंधएवास्त्वग्रेचमंडूकप्लुतिरस्त्विति वाच्यं। तस्याप्युपपत्तौमंडूकानुवृत्तेरयुक्तत्वात्‌। ध्वनितंचेदंविस
र्जनीयस्यसइतिसूत्रेभाष्ये। सन्निकर्षः सामीप्यं। सुप्तिङ्‌। सुबितिसुपः पकारेणप्रत्याहारोव्याख्यानात्‌। यद्यपि
स्तययहणेनतदंतग्रहणमित्युक्तं। ग्राह्यरूपविशेष्यमादायतदंतग्रहणसिद्धं। प्रत्ययेनस्वकस्वयवकसमुदाय प्र४
स्यादेवान्तविशेषणत्वेन
तदंतविधिरितिनयुक्तं। इत्यानित्यादौतस्यतादृशसमुदायेनव्यभिचारेणान्वेपासंभवात्‌। आदिशब्दस्यसत्राद्येनन्याद्य।
तथापिसंज्ञाविधौप्रत्ययग्रहणेतदंतग्रहणाभावज्ञापनार्थमंतग्रहणं। तेनघसंज्ञातरतमयोरेवनतदंतस्यतेन

गौरिवाग्रणीनरिरित्यत्रनकप्‌। एतन्निषेधसामर्थ्यादेवप्रदेशेष्वपिनतदंतविधिः। नचज्ञापितेपियथार्थ्य। पदमदेशेप्रत्ययग्र
हणेतदंतग्रहणेनैवसिद्धेरितिवाच्यं। पदत्वस्यप्रकृतिसाधारणतयापदग्रहणेप्रत्ययग्रहणस्यैवाभावात्‌। यस्मात्प्रत्यय
विधिरित्याद्यनुवृत्तेः पदसमुदायस्यनपदत्वं। इत्यानित्यादौयस्मात्प्रत्ययविधिस्तदादितद्विधितांतत्वंव्यपदेशिवद्भावेन
बोध्यं। तेनाग्नीस्त्रीयस्यापेकाद्येदिरतिदेशात्‌। विशिष्टनिष्टव्यवहारनिमित्तकार्यविधौ असंहायेपिकर्तव्यानीतिद
र्यात्‌। अतएवयन्मात्रमित्यादौवत्वंतात्पर्यं इतिमात्रचसिद्धिः। हरिषुइत्यादौसास्तुनैवंपदत्वेइलिसर्वंयामिति निर्देशो
नससंज्ञायेतदप्रवृत्तेः। मित्रौचत्वारएकाचइतिभाष्यंत्वभ्युपेत्यवादेनध्वनितंचेदमादेशव्यपदेशोतास्यनुदात्तेदित्या
दौभाष्येतत्र हिठोकृत इत्योकारस्यहतइत्यादावकारस्यैजंतोपदेशात्वनकारांतोपदेशत्वंच पदेशिवद्भावेना
शोकार्यवताव्यपदेशिवद्भाव इत्युक्तं। योवर्णोऽर्थवान्‌ तेनव्यपदेशिवद्भावः वर्णस्यार्थवत्त्वेयायेसादावसत्त्वा
येएवनतुप्रकृतेइतितदर्थः। एवंचैकस्मिन्नित्यस्यार्थवत्वेतत्वेनोक्तइतिदिक्‌। हलोनंतराः संयोगः इतंदंड यंताभि
नत्रसमुदायेनतदंडनवतत्समुदायस्यैवसंज्ञानप्रत्येकं। अनंतरा इत्युक्तेष्व। तस्यविशेषणतायाएवौचित्यात्‌। य
त्तुसंपुल्लतेवर्णायत्रेत्यन्वर्थसंज्ञाबलात्प्रत्येकंसंज्ञेतितन्न। घटपटौसंयुज्येतेयत्रेत्यादौसंयुज्यमानपदार्था
५२ तिरिक्तस्यैवान्यदार्थतयाप्रतीतिर्युक्तत्वेनतदतिरिक्ततत्वघटितपदवाक्यरूपसमुदायस्यसंज्ञापत्तावनिष्टाप
त्तेः मरुतसंज्ञाबुधाचामनुरोधाद्‌। तेनसुदृषत्प्रातीत्यत्र संयो गांतलोपेनेत्य न्यत्रविस्तरः। हल इति बहुवचनं सौ

२० त्रं यद्यादेलोपश्च हलम्ब्येसेकत्रो षः। स्वरितात्संहितायामिति सूत्रेनुदात्तानामिति पदेतत्पर्येकदेशस्य भाष्यकरणात्तेनद्वयो
रपीतिनिर्दिष्टत्वात्। गुरोश्च हलइत्यप्रत्ययः सिध्यति यत्रापि बहवः श्लिष्टाः तत्रापि द्वयोर्वर्णयोरेव नबहूनामेव। ऊलिप
रेसंयोगादिलोपविधानात् बहूनामपी सपिंडिसमेवफलाभावात्। तत्रतत्त्रांगपदधात्वबयवसंयोगस्येवाश्रयणे
नतादृशस्यचत्रयाणां संयोगस्याभावादिति भा ष्येस्पष्टं। आनंतर्यं व्यवधानाभावो व्यवधानंच विजातीयेनैवे
ति न्यायेना ष्टानमिरिति। अत्र कुत्वं न्याय्यं। अतएव हयवरट्सूत्रेचोद्यमिति भाष्यप्रयोगे कुत्वं दृश्यते स्वरैरव्यव
हिताद्विवित्युच्यिता वृत्तिः हलः किंतितउदेवअत्र गुरोरिति प्लुतः स्यात्। अनंतराः किं इष्टुर्स। अत्र सकारमकारयोः
७गुणस्तु संयोगत्वेस्कोरिलोपः स्यात्। संयोगेगुरु। मित्तेत्यादौ क्नोः किन्तु सामर्थ्येन भूतपूर्वलघूपधग्रहणाद्बोध्यः। इतिसंज्ञेति॥
प्रथमाध्यायस्यानां संधिकार्योपयोगिनीनां संज्ञानां प्रकरणमिति समाप्तमित्यर्थः। तेनात्रेडितप्रगृह्यभसंज्ञालोपसंज्ञा
नुपन्यासेपिनक्षतिः। अनुक्तयाद्युपन्यासस्तु प्रासंगिकः॥ इतिसंज्ञाप्रकरणम्॥ इकोगुणः॥ परिभाषेयं व्याख्यानात्। गु
णवृद्धिशब्दाभ्यामिति। गुणवृद्धिग्रहणानुवृत्त्यैव सिद्धे पुनर्गुणवृद्धिग्रहणसामर्थ्यादिति भावः। अनुवर्त्तमानंच संज्ञिपर
मेवस्यात् संज्ञाकरणेनान्यत्र संज्ञिपरत्वात्। यद्यातदप्यनुवर्त्यगुणोवृद्धिरितियोजनयैवतल्लाभः। स्यादिष्विति सूत्रेऽ
नुवृत्तपदस्य संज्ञापरताया एवदृष्टत्वात्। ष्णांतेतिसूत्रेसंख्यापदस्यतत्संज्ञत्वासंभवादर्थपरत्वेतिबोध्यं। लक्षणप्रतिपदो
क्तपरिभाषयानुनात्रनिर्वाहः। तत्र प्रतिपदोक्तस्येत्यस्य साक्षादुच्चारितस्येति साक्षात्तत्तच्छब्दानुवादेन विहितस्येतिवा

र्थात्। ध्वनितंचेदमत्रैवभाष्येऽस्याश्च विधेयसमर्पकगुणवृद्धिपदश्रुतिर्लिंगं तदाह। विधीयतेइति। अतएवातोगुणेवृद्धिर्यस्येत्यादौनदो
षः। एतेनशब्दपरयोः पूर्वयोर्गुणवृद्धिपदयोरनुवृत्त्यायत्रतेपदेतत्रेदमुपतिष्ठतेइत्यर्थेनत्यदादीनामइत्यादिव्यावृत्तोक्षिद्धायामित्यु
णवृद्धीतिव्यर्थमित्यपास्तम्। एतन्मूलकएव विधौपरिभाषोपतिष्ठतेनानुवादेइत्युद्घोषः। एवंचपरोपस्थापकपरिभाषाविषयेविधीयतइत्य
स्येवाध्याहारोबोध्यः। एवंतस्मिन्निति निर्दिष्टेषष्ठीस्थानेइत्यादेरनुवादे प्रवृत्तिः। तेनप्रत्ययस्याल्कोत्पूर्वस्योदात्तस्वरितयोर्यणइत्या
दौनदोषः। उरीचामातः स्थानेइतिस्थानेग्रहणंतुस्पष्टार्थमेव। तत्रविधेयाकेप्रथमायाविधेयविभक्तित्वेनतदंतस्यविधेयसमर्पकत्वे
निर्णयः। अतएवगुणादिपदानामिकूपदोपस्थापनेनचरितार्थानामपिवाक्यार्थान्वयित्वा। तदर्थस्यतदनन्वयित्वेविधेयत्वाभावेनोप
स्थापकत्वस्यैवभंगापत्तेः। इयंचएधित्येत्यादौव्यंजनानांगुणव्यावृत्त्यर्थमिन्नमित्यादौनिषेधप्रवृत्तयेइग्लक्षणत्वसंपत्त्यर्थंचेतिदिक्॥
प्लुतश्चैवेति। ऊकालइतिसूत्राद्ध्रस्वदीर्घप्लुतइत्यजितिचानुवर्त्तते। ह्रस्वेत्यादिपदंचतत्तीययाविपरिणतमितिभावः। तेनदिवउदित्यन
त्राविभक्तावित्यादावेतदनुपस्थितिः। शोधंप्राग्वत्। आद्यंतौ। यद्यप्यत्रमिलितस्यनैकत्रान्वयइतिद्वंद्वेनप्राप्नोतितथापिसमूहयोरन्व
यबोधोत्तरंयथासंख्यमितिसूत्रारंभसामर्थ्यात्पुनःप्रत्येकान्वयः लोकेत्वेचंरीत्याप्रयोगोऽसाधुरेवेतिभाष्येस्पष्टम्। अत्रैवयथासंख्य
सूत्रोपन्यासोयुक्तः। इकोन्तेश्रूयमाणस्येत्यर्थः स्यप्रत्येकसंबंधः। पुरस्तादपवादन्यायेनस्थानेयोगत्वस्यायमपवादः। प्रत्ययपरत्वंतु
परत्वादमुंबाधतेतेनचरेसाद्यः परएवभवंति। अतएवयत्रैतदभावेस्थानषष्ठीसंभावनातत्रैवेदंप्रवर्त्ततेतदाह। यस्योक्तावित्ति॥
आद्यंतादिसावयवीयच्छब्दार्थः। यद्यासंख्यसिद्धमर्थमाहोइत्ताविति किं। इकूपर्यायिणाद्यंतयोर्माभूत्। मिरचो। अयंबाध्यसामान्य
चिंतयास्थानेयोगत्वप्रत्ययपरत्वयोरपवादः। स्थलइतिनिर्देशात्। निर्धारणेइति। यस्यसमुदायस्यमिहितस्तस्याचांमध्येइ
त्यर्थः। सोत्रमेकवचनमितिभावः। तस्यैवेति। यस्यविहितस्तस्यैवेत्यर्थः। अतएवसमुदायभक्तोनोत्सहतेऽवयवस्येगंततांविहंतु
मितिभाष्यंसंगच्छते। अंतावयवइति। पूर्वसूत्रात्समस्तमप्येतत्पदमेकदेशस्वरितत्वप्रतिज्ञाबलादनुवर्त्ततइतिभावः। मुंचतीत्यादि

ल॰शे॰ २१

विषयेतुफलाभावाद्योग्यत्वाच्चांतावयवद्वयंशास्त्रप्रवृत्तिः।परिभाषाणामनियमेनियमकारित्वादाह।अनिर्धारितेति।तेनोदुपधायाशो
हइत्यत्रस्थानेयोगत्वंन।उपधापदसंनिधानेनावयवषष्ठीत्वनिर्णयात्।स्थानेयोगेत्यस्यस्थानपदार्थनिरूपितसंबंधार्थिकेत्यर्थः।
स्थानेनयोगोयस्याइतिविग्रहेनिपातनात्।साधुत्वस्यभाष्येउक्तत्वात्।अस्तेरनंतरेइत्यादेरपि।अनंतरादिनिरूपितसंबंधेइत्येवार्थः।
षष्ठीमात्रोच्चारणेस्थानपदाध्याहारइत्यन्यत्रविस्तरः।प्रसंगइति।दर्भाणांस्थानेशरैःप्रस्तरितव्यमित्यादौतथादर्शनात्।भावेल्यु
ट्स्थानशब्दे।प्रसंगश्चसतिसंभवेऽर्थवतएवार्थप्रत्यायनार्थंशब्दप्रयोगात्।इकोयणचीत्यादेरप्यरकारघटितशब्दस्यार्थबो
धनायप्रसंगेतत्परयकारघटितःप्रयोक्तव्यइत्यर्थः।एकदिक्त्वादेश्चतेस्तुरिति।अतोनशब्दनित्यताहानिः।किंच।इकारबुद्धि
प्रसंगेयकारबुद्धिरित्यप्यर्थः।अतएवाचःपरस्मिन्नित्यादिसंगच्छते।स्पष्टंचेदंदाधाघ्विति सूत्रस्थानिवत्सूत्रयोर्भाष्ये।स्था
नेत।षष्ठीत्यनुवृत्त्यायत्रस्थानषष्ठीतत्रेदमुपतिष्ठतेइतिविधेयैकवाक्यतयैवास्यनियामकत्वंनतुविहितानांनियमः।भुक्तवंतमि
तिन्यायविरोधात्।फलितमाह।प्रसंगइति।सदृशतमइति।अर्थ्यात्प्राप्यमाणानांमध्यएव।अतएवगंगोदकमित्यादौत्रिमात्रेण।तम
पकिम्।वाग्घरिरित्यादौमहाप्राणत्वसाम्येनजायमानःपूर्वसवर्णोवर्गद्वितीयोमाभूत्।किंतुनादवान्महाप्राणश्चतुर्थोघएवयथा
स्यादिति।स्थानेंतरतमइतिसप्तम्यंतपाठस्तुदीर्घंचयणांचिंत्यादुष्टइतिभाष्यस्पष्टम्।यत्रानेकेति।स्थानेप्रकृतेएकदेशानु
वृत्त्यानुवर्त्तमानेपुनःस्थानेग्रहणंतृतीययाविपरिणामेनवाक्यभेदमाश्रित्यप्रसंगेसतिसंभवेस्थानतएवांतरतमइत्य
र्थमितिभावः। [illegible] स्थानतइति।स्थानेनेत्यर्थः।तत्रस्थानतइकोयणचीति।अर्थतस्त[illegible]ज्वक्रोष्टुरिति।इहक्रोष्टुशब्दस्या
नेपुंशब्दोनादेशः।गुणतस्तुवाग्घरिरित्यादौ।प्रमाणतोदसोमेरित्यादौ।तस्मिन्निति नि।अत्रतस्मिन्नितितुतत्रतस्मा
दितिसप्तम्यंतपंचम्यंतपदार्थकःस्वतंत्रस्यसर्वनाम्नोनिर्देशोव्याख्यानात्।बहुलक्ष्यसंस्कारानुरोधाच्च।नतुतत्तत्पदपरम

न्यथातस्मिन्नणिचतस्मान्ङसिचितस्मात्छसोनइत्यत्रैवप्रवर्त्तेयातां।सप्तमीतुसप्तम्यंतानांमेयत्वाद्यर्थत्वमितिबोधनायतद्बोध्या
र्थस्यनिर्दिष्टइत्यनेनसामानाधिकरण्यायच।इतिशब्दःपुनस्तस्यतदर्थपरत्वंबोधयति।निःशब्दोनैरंतर्यंदिशिस्वच्चारणे।एवं
चसप्तम्यंतार्थेऽव्यवहितोच्चारितेउपश्लिष्टस्यपूर्वस्यकार्यमितिवाच्योर्थः।एवंचैतत्परिभाषाद्वयोपस्थितौसप्तम्यंतपदस्य
पंचम्यंतपरस्यचार्थोलिंगं।अत्रसूत्रेउपश्लिष्टपदाध्याहारेणनिर्दिष्टइति।प्रोपश्लेषिकेऽधिकरणेसप्तम्येवोचिताउपपद
विभक्तेरितिन्यायात्।नतुसतिसप्तमीतितत्रचदीयतेइतिसूत्रेकैयटस्पष्टं।हलुक्रमादितिसूत्रेचकैयटःप्राहतस्मिन्नितिपरिभा
षायांसत्यांसप्तम्याश्रयणमशक्यमिति।उपश्लेषःसमीपवर्त्तित्वंतच्चवर्णयोर्बौद्धंद्रष्टव्यम्।एवमिकोयणचीत्यादावपी
यमेवेतिसंहितायामितिसूत्रेभाष्ये।तत्रोपश्लेषःपूर्वस्यैवपरस्याव्यवहितस्यैवव्यवहितस्यचेतिपूर्वस्यैवेतिनियमार्थमिदं।
अव्यवहितएवेतिच।अतएवलक्ष्यानुसारात्क्वचित्सतीत्यध्याहारात्सत्सप्तम्याश्रयणेनास्याःप्रवृत्तिरितिश्नान्नलोपइत्यत्रभाष्ये
उक्तं।अतएवकर्तृकर्मणोःकृतीत्यत्रनास्याःप्रवृत्तिःकृतिसतिश्रूयासत्यात्स्वस्त्यर्थकर्तृकर्मणोःषष्ठीतितदर्थात्।तस्मादिति
सूत्रेनिर्दिष्टइतिनिर्दिष्टादित्यर्थकंविभक्तिविपरिणामात्।साचोत्तरस्येतिदिग्योगलक्षणेतिदिग्योगलक्षणपंचम्यामेवरात्त
प्रवृत्तिः।उदःस्थाइत्यादौचोदइतिदिग्योगलक्षणपंचमी।तत्रानियतदिक्शब्दाध्याहारेप्रशक्तेपरशब्दस्यैवाध्याहारइतितस्मा
दित्यनेननियम्यते।अव्यवहितोच्चारितात्पंचम्यंतात्परस्येतितदर्थस्तत्फलितमाह।सप्तमीनिर्देशेनेत्यादि।यदितु।अर्द्धमात्राधि
ककालेनवर्णांतरेणाव्यवधानेउपश्लेषएवनेत्युच्यतेतदानिर्दिष्टपदंसंहिताधिकारश्चविफलइतिसंहितायामितिसूत्रेभा
ष्येस्पष्टम्।अवग्रहेचसंप्रदायएवमुच्चारणमिति।आनङादिविषये।आदेशोत्तरमेवावग्रहोन्यत्रतुततःप्राक्।अकृतव्यूहपरिभा
षात्वनित्यानास्त्येववा।नलक्षणेनपदकाराअनुवर्त्याःपदकारैर्नामलक्षणमनुवर्त्यमितिहिभाष्येणतदनुरोधेनशास्त्रासंकोच

न.शे.
२२

स्यथाश्चकरणाभावस्य च स्पष्टमुक्तत्वाच्च। एतेन संहिताधिकारस्थहरिर्भूर्भानामर्द्धमात्राधिककालव्यवायेप्रवृत्तिज्ञापनार्थं। तेनाम्नाविस्मृ
ह्यास्त्ववग्रहे प्रानन्दारिरिति सिद्धिरित्यपास्तं। प्रत्ययः परश्चेत्याद्येतु तत्तदंशविकलानत्वादिति परिभाषाप्रवर्त्तते तेन प्रत्ययाः प्रत्ययविहि
ताः। अत एव क्षुब्धस्विपरे पि व्यवहिताश्चेति सूत्रं सार्थकं। आगमविधावप्यानमुगित्याद्येतस्मिन्निति परिभाषया पूर्वस्यैव धिःचनिर्द
यः। अत एवात्र पूर्वस्येत्यादिन स्थानषष्ठी। तत्तद्विधिभिरेव संबंधस्य नित्यत्वेन षष्ठीस्थानद्वयस्याप्रवृत्तेः। गाङ्कुटादिभ्यद्वया
श्रवपिषष्ठ्यंशविकलैतत्परिभाषाप्रवृत्तिर्बोध्या। परिभाषाणां नियमत्वं तु यदि परिभाषासूत्रं नस्यात्तदाव्यवहितादावपि प्रवृत्तिः
स्यादित्येतावतेति दिक्। अलोन्त्यस्य। षष्ठीस्थानेद्वयनुवर्त्तते तदाह। षष्ठीत्यादि। स्थाने विधीयमानः स्थानषष्ठीनिर्दिष्टस्य
स्येत्यर्थः। स्थानेद्वत्यादि किं। इदूत्व रुकारात्पूर्वो माभूदिति। अन्त्यस्येति साहचर्यादलइति षष्ठ्यंतमंत्यस्याल इत्यर्थः। अल इति
तिकिम्। पदस्येति विधीयमानं वसुस्रंस्विति दत्वं स्वनडुहामित्याद्यवं त्यस्य पदस्य माभूत्। स्थाने विधीयमान इति प्रत्यास
त्तिलभ्यं। एवं चालएवेति अन्त्यस्यैवेति नियमद्वयमत्र। अल्समुदायोत्तरं स्थानषष्ठ्यस्या लिंगं। अत एवेतोदित्यादौ नास्याः
प्रवृत्तिः पथ्यादीनामित्यस्यावयवषष्ठीत्वादितद्वयस्याल्समुदायोत्तरत्वाभावाच्च। ङिच्च। अनेकाल्सूर्यमिदं। आदेरिति।
आदेरल इत्यर्थः। तेन दीपमित्यादौ पांतसमुदायस्थाने त्वं। अत्र परस्येत्यनुवर्त्तते तेन परबोधकशब्देन यत्र परस्य स्थाने विधानं
तत्रैवेदं। तेन नितं ङितः इदम्यादौ न दोषः तत्र विकरणव्यवधाने प्रवृत्तये धातोरित्यस्याविहितविशेषणत्वात्। अनेकाल्शित्सर्व।।
शिन्न उदाहरणं। इदमइश्। ननु शकारोच्चारणसामर्थ्यादेव तत्पूर्वानेकाल्त्वमादाय सर्वादेशत्वसिद्धेः शिदिति व्यर्थं। किंच
सानुबंधकनिर्दिष्टे यथा नालः स्यानित्वं भोभगो इति सूत्रे भाष्येउक्तं तथादेशत्वमपि स्तन्नोपात्तस्यैवेति तद्व्यर्थ विधौ निर्दिष्टो २२

येनेकाल्त्वमस्येति सूत्रार्थः। उद्देश्यतावच्छेदकत्वविधेयताविषयताबोधविषयतानुबंधविनिर्मुक्तस्येति नागुदित्सूत्र
भाष्यविरोधः। धसोरिति लोपस्य लोपो यीति प्रकृते पुनर्लोपग्रहणसामर्थ्यात्सर्वादेशत्वसिद्धिः अनुबंधानामनेकांतत्वमेव न्याय्यमित्युक्त
मिति चेन्न। नानुबंधकृतमनेकाल्त्वमिति ज्ञापनेन चारितार्थ्यात् तेन दिव औदित्यादौ नानसर्वादेशत्वं अस्य च यथैतत् ज्ञानं तथा वक्ष्यते।
नानेकाल्शिदिति तु नोक्तं। अनंतरस्येति न्यायेनादेः परस्येत्यस्यैव निषेधापत्तेः। परत्वादिति। आदेः परस्येत्यस्यावकाशः द्व्यंतरु
पसर्गेभ्योपईत् द्वीपं शित्सर्वस्येत्यस्य इदम इश् एवमतोभिस इत्यादिविषयेनेकाल्शित्वेनादेः परस्येति परत्वाद्बाध्यते। एतेन ङिच्चेत्यत्र ङिदेवा
नेकाल्त्वमस्येति नियमेन सिद्धे नेकाल्ग्रहणं व्यर्थमित्यपास्तं। स्वरितेनाधिकारः। इत्थंभूतलक्षणे तृतीया तज्ज्ञाप्योधिकारो विनियोग इत्यर्थः।
स्वरितत्वं चेदं दोषविशेषरूपमज्झल्साधारणं। स्वरूपमधिक्रियमाणपदघटकाज्झ्युच्चारितत्वानुनासिक्यवत्प्रतिज्ञागम्यं
विनियोगश्च प्रायेणोत्तरत्रोपस्थितिः क्वचित्पूर्वत्रापि कियद्दूरमधिकार इत्यत्रास्ति गमकं व्याख्यानमेव शरणं। किंच स्वरिते
नाधिकारगतिः तेन गोस्त्रियोरित्यादौ स्याधिकारस्य प्रत्ययग्रहणमित्याद्याकरादवसेयं। एतेन व्याख्यानादेव निवृत्तिवदनुवृत्ति
रपि भविष्यति अत्राकांक्षायां लुसत्यामप्युत्कलनाया अन्याय्यत्वाच्छ्रुतापेक्षणस्य माव्यत्वाच्च किं तज्ज्ञेलेसपासंज्ञ एवेदं
भाष्ये। परनित्येति। परं विप्रतिषेधसूत्राद्बलवत्। निमित्तकलाकृतप्रसंगित्वद्विपरीतमनित्यं तत्रोल्क्तलाभावकस्याभावक
स्याभावस्य नापेक्षायांल्क्तिलाभावकस्यैवतत्लकल्लंनयुक्तमितित्तस्य बलवत्त्वे बीजं। अंतर्मध्ये बहिरंगशास्त्रीयनिमित्तसमुदा
यमध्ये अंतर्भूताअंगानिमित्तानि यस्य तदंतरंगं। तदीयनिमित्तसमुदायानंतर्भूतांगकं बहिरंगं। तस्य बलवत्त्वे बीजमाह।

न्या॰ शे॰
२२

सिद्धमिति। इयं च वाहऊठ् सूत्रे ज्ञापिता यद्यपि प्रत्यंगवर्ती लोके दृश्यते मनुष्यो यं प्रातरुत्थाय प्रथमं शरीरकार्याणि करोति ततः
ततः सुहृदां ततः संबंधिनामिति न्याय मूलकत्वमस्य अचः परस्मिन्निति भाष्येऽ उक्तं तथापि तेन न्यायेन युगपत्प्राप्तिविषये
नैवास्याज्ञापकेन तु सर्वविषयता बोध्यत इति वाहऊठ् सूत्रेके यट स्पष्टं। अन्यथा वाहः संप्रसारणे सर्वरूपे च कृते एत्या
श्रये गुणे वृद्धिरेचीति वृद्धौ प्रष्ठौह इत्यादि सिद्धावूठ् विधानं व्यर्थं स्यात्। नाज्ञानंतर्य परिभाषा तु नास्त्येवेति नाथजं इंद्रप्रमि
त्यादौ दोष इति परिभाषेंदुशेखरे विस्तरः। अपवाद स्तु वचनप्रामाण्याद्बलवान्। अकृतेति। न कृतो विशिष्टऊठ् स्तत्कोनि
मित्तविनाशो पि कार्यस्थितिरूपः यथा दंडविनाशेपि घटस्थितिः सयै स्ते इत्यर्थं स्तदाह निमित्तमित्यादि। तत्र युक्तं
कार्यं। जातमपि न कुर्वंति नोच्चारणं यंतीत्यर्थ इतिकेयदादयः। अत्रेतु व्यूढोंतरंगत्वात्रं वहिरंगापोहत रूपत्वा
त्। निमि। तं विना शंदृष्ट्वा पूर्वमपि न कुर्वंतीत्यर्थ इत्याहुः। इयं परिभाषा निष्फलानिर्मूलेति परिभाषेंदुशे
खरे निरूपितम्। इति परिभाषाप्रकरणं॥ स्यादिति॥

२३

महाबाकोन

कार्यशब्दवारेद्दं। संहितायां विषय इति। कार्यिनिमित्तयोः संहितायां विषयभूतायामित्यर्थः। स्थानत इति। इदं यथासंख्यसूत्रे भाष्ये
स्पष्टं। जातिपक्षे यथासंख्येनापि निर्वाह इति स्थानेंतरतमसूत्रे भाष्ये स्पष्टं। अनुनासिकस्थानेपि निरनुनासिक एव विधीयमान
त्वेन सवर्णग्राहकत्वात्। गुणभेदकत्वपक्षेपि न विधेयात् विषये री घोरीना मिगादिपदे रूपसिद्धि तये प्रत्याहारेषु जातिपक्ष एवेत्यपु
दित्सूत्रभाष्ये स्पष्टं। अत एव सर्वत्र कारादीनां कल्वादिसिद्धिर्वादय इत्यादि निर्देशादयश्च जात्याश्रयणमानमितिदिक्। व्याकरणस्य
साधनुशासनत्वं तु शब्दनित्यतापक्षे शब्दानां सिद्धत्वेन शास्त्रवैयर्थ्यापत्या मजि प्रसंगेमार्जिः साधुर्भवतीत्यादि वृद्धिसंज्ञासूत्रादिस्थ
भाष्यप्रामाण्येन यदिह परिनिष्ठितेन ज्ञाप्यं तत्साधित्वयर्थापत्तिकल्प्य वा केन बोध्यं। कार्यशब्दवारे तु पूर्वभाष्योन्नीतादितात्पर्यवशा
त्कल्पनं बोध्यं। एतेन स्थानप्रमाणेभयां तारतम्ये ह्रस्वकारस्य रितार्थयण दीर्घकथं स्यादित्यपास्तं। स्थानत आंतर्यस्य सर्वतो बल
वत्वात्। स्थानेंतरतम इति सप्तम्यंतपाठस्य चेतत्दूषणे नैव भाष्ये दूषितत्वादिति भावः। वोविध्ययोर्ध्वनितं चेदमेओङ् सूत्रभाष्ये तदा
ह। देवास्त इति। सूत्रकृत्ताशाकल्यमते सर्वत्र द्वित्वाभावोक्तेरिति भावः। अवसाने द्वित्वसिद्धयेऽनचीति प्रसज्यप्रतिषेधस्तदाह। न
चीति। इदं द्वित्वं घास्वद्वित्ववद्धिः प्रयोग एव। परइत्यादेरध्याहृतोच्चारणक्रियानिरूपितकर्मषष्ठीत्वस्योचित्यात्। इतिधस्यति।
ननु द्वित्वे पूर्वधस्थाने जश्त्वनिष्पन्नदस्यापि। लक्ष्ये लक्षणस्येति न्यायात् विकारान्यत्वेन न लक्ष्यभेद इत्यन्यत्र प्रपंचितं। स्थान्या
देशयोर्भेदात् स्वरूपमित्युक्तेश्च तत्स्थानापन्नस्तद्धर्मं लभते यथा गुरोः स्थाने शिष्यो याज्यकुलानि र्गतस्यासनादीनि लभत
इति लोकन्यायेन स्थानिकार्यमादेशेन स्यादतः स्थानिवत्सूत्रं। ननु स्थान्यलेति। प्रत्यासत्तिन्याय सिद्धमिदं। आदेशस्य स्थानि
भूतोयोल्तत्स्थानिबंधी चयोल् तद्धर्मिधर्माश्रये इत्यर्थः। अत एव रेफस्थानिकविसर्गस्य रुशब्दत्वं न स्थानिवत्वेन तिभोभगोद
यत्र भाष्ये स्पष्टं। रुधातोर्द्वित्वेऽभ्यासस्योरदत्वेऽरित्यस्य रुत्सादिः शेषस्तु अरित्यस्य पुनः पूर्वाभ्यास इत्यनेनाभ्यासत्वात्तस्या
विद्विरुक्तधातुपूर्वभागत्वात्। प्रक्रियाज्ञानवतां तया ज्ञानस्य सुलभत्वात्। अत एव धिन्वंतीत्यादिविषये नऽकारस्त्यार्द्धधा

तुकत्वस्य वकारेऽपनातिदेशात्। यत्तु त्रेण निवृत्तये स्वविधावपि स्थानिवत्त्वम् परविधावितिन्यासेन साधितं भाष्ये तच्चिंत्यं कैयटेनोक्तम् ॥
असिद्धवत्सूत्रेण सिद्धस्यापनासनित्यादेस्तत्फलत्वेनोपन्यासात्। अस्यापि अचः पूर्वत्वविज्ञानादिति वार्तिके पंचमीसमासेन सिद्धेः
कैयटेनोक्तत्वाच्च प्रदीव्येत्यादौ चवलादिलक्षणगुणमन्न। स्थान्यत्विति युक्तेर्वभूविवेत्यादौ वलादिलक्षणेटू सिद्धिर्न हि तत्र वलादित्वं
स्थानितो लभ्यं किं तु स्वाश्रयमेव। यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तावतिदेशो गम्यते तस्य निमित्तस्य स्थान्यलसाधा
रणधर्मत्व एव निषेधप्रवृत्तेः प्रकृते चार्द्धधातुकत्ववैकल्यप्रयुक्ताऽप्राप्तिर्न तत्स्थान्यलसाधारणं यच्च तादृशावल्वघटितं
वलादित्वं न तद्वैकल्यप्रयुक्ताऽप्राप्तिरिति बोध्यं। अत्यासत्या च शास्त्रीयकार्य एव स्थानिवत्त्वं तेन नायकसिद्धिः। प्राधान्या
त्कार्यातिदेशोऽयं शास्त्रातिदेशस्तु कार्यातिदेशाद भिन्नरूपः तस्यापि कार्यफलकत्वादिति तच्च तत्सूत्रे कैयटः। भाष्येपि तत्रा
गशास्त्रातिदेशात्सिद्धमांगं यत्कार्यं तदतिदिश्यत इत्युक्त्या तयोरभिन्नरूपत्वं सूचितं तत्रानपेक्षितार्थसंनिधानकृतं च न्नि
मित्तरूपकार्यव्यवहार एवानेन। कार्यं तु स्वशास्त्रेणैवेति। अत एव रामायेत्यादौ स्थानिवत्त्वेन सुप्त्वात्सुपिचेति दीर्घ इति संगच्छ
ते। परिवीरित्यादौ परत्वाद्दीर्घ इति च संगच्छते। यद्वा किंचिन्निमित्तवैकल्ये पि दीर्घादिकार्यमनेन क्रियते तच्च कार्यं किं इत्या
कांक्षायां तत्स्वरूपनिर्णयस्य विधिशास्त्रमूलकत्वेन तद्देशेनैव परशास्त्रविहितं तत्स्वरूपं परत्वं तेषां बोध्यं। एतदेवाभिप्रेत्या
तिदिश्यमानकार्याणामुपदेश एव देश इत्यभियुक्ताः। अत्रायं पक्ष एव भाष्यसंमतः। अत एव स्थान्यल्विधिप्रतिषेधे
कुरु वधपिवां प्रतिषेधो वक्तव्य इत्येतदुपपादनावसरे स्थानिवद्भावादंगसंज्ञा स्वाश्रयं च लघूपधत्वादि तत्र लघूपधगुणादिः
प्राप्नोतीत्यादि भाष्योक्तिरिति बोध्यं। एवं यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तिस्तन्निमित्तातिरिक्तसर्वनिमित्तकत्व
मतिदेशस्यापि। अत एव स्ववद्भावेनातिदिष्टभत्वस्य वर्णाश्रयत्वमित्यादिव्यवहारः सर्वातिदेशोऽपि दं तु स्वयन्निमित्त
वैकल्यप्रयुक्तोपदेशाप्रवृत्तिस्तन्निमित्तं शास्त्रीयमेव प्रत्यासत्तेः स्थानिवदित्युक्ते संबंधिशब्दमहिम्नैवादेशलाभेऽपि आ

देशग्रहणं श्रौतस्थान्यादेशभावस्यैव ग्रहणमिति शंकावारणद्वारा एकदेशविकृतस्यानन्यत्वादित्येषोऽर्थो न भवतीति गम्यते यस्मिन्नित्यत्ववारणाय सर्वे सर्वपदादेशा इति न्यायेन
कल्प्यमानस्य तेस्तु रित्यानुमानिकादेशस्य संग्रहार्थं तेन पचविरियादेः पदत्वसिद्धिरिति भाष्ये स्पष्टं। ननु तोऽस्तित्वमपि छिन्नपुच्छ
शुनिश्वत्वव्यवहारवल्लोकसिद्धन्यायेनैव सिद्धं तदुक्तं प्राग्दीव्यतोऽणिति सूत्रे भाष्ये दीव्यतिशब्दैकदेशदीव्य च्छब्दानुकरण
मिदमित्युक्त्वा किमर्थं विकृतनिर्देश एतदेव ज्ञापयत्याचार्यो भवत्येषा परिभाषा एकदेशविकृतमनन्यवदिति। अत एवात्र
विकारोऽशास्त्रीयोपि। अत एव श्रायसशब्दादणं ताद्धिवचने श्रायसा चित्यत्र दक्षिणाकृतायां सांतस्यो गित्वेनानेन न्यायेनांगत
याप्राप्तानुमपूर्वसंबंधित्वेनाचः परस्मिन्निति स्थानिवत्त्वेन वारितोऽचः परस्मिन्निति सूत्रे भाष्ये एतन्न्यायाना श्रयणेत्वंग
त्वमेव दुर्लभं अंतादिवत्सूत्रे भाष्यकैयटयोरपि गुगदकमित्यादावेकादेशोकृतेदकशब्दस्यानेन न्यायेनोदकशब्दत्वमा
श्रित्योदके केवल इति पूर्वपदांतोदात्तत्वमुक्तं शब्दानित्यत्वं तु रेखागवयन्यायेन समाधेयमनन्यवदित्यस्यान्यवन्नेत्यर्थः
तत्रान्यसादृश्यनिषेधेऽन्यत्वाभावः सुतरामिति चेन्न। धर्मस्यान्यथात्वे जातिव्यंजकभूयोवयवदर्शनाभावे तोत्तिवप्रतीतिन्ये
नानुपपादनात्। किंच तिङ्संज्ञायास्तिबादिसूत्रोपात्तपरिछिन्नपरिमाणनिष्ठतया परिछिन्नपरिमाणार्थवाचकशब्दानां
न्यूनेऽधिके वा शास्त्रव्यापारं विनाऽप्रवृत्तेर्येन विधिरिति सूत्रे गसंज्ञासूत्रे च भाष्ये उक्ततया तदभावात्। न्यूनाधिकत्वं च वै
रूप्यस्योपलक्षणं। न च तं दुलानित्यादौ स्थानिवद्भावेन प्रत्ययांतत्वेपि स्वतः प्रत्ययांतभिन्नत्वात्स्नातिपदिकत्वापत्तिरिति वा
च्यं। अतिदेशस्वभावेनातिदिश्यमानधर्मविरुद्धस्वाश्रयकार्याभावात्। अत एव जहीत्यादौ जादेशस्यासिद्धवत्त्वे स्वाश्रयो हेर्लु
कन। सिद्धत्वासिद्धत्वयोर्विरोधात्। असिद्धवत्सूत्रं तु शाधीत्यादौ स्थानिप्रयुक्तधिभावसंपादनेन चरितार्थं। न चात्र प्रत्यय इत्यस्य प
र्युदासत्वे शास्त्रीयकार्याभावात्स्थानिवत्त्वं दुर्लभमिति वाच्यं। वेः स्कंदेरनिष्ठायामिति षत्वविधायके तिङंते षुपत्वाभावाया
वश्यकेन न्यायेन चानिष्ठायामिति पर्युदासेन दृत्यादिसंमतेन पर्युदासलभ्या शास्त्रीये पि शास्त्रतात्पर्यविषये शास्त्रीय

वदतिदेशबोधनात्। विस्कन्न इत्यादौ हि निष्ठानत्वस्य नित्यतया स्थानिवत्त्वेनैव निष्ठात्वस्य वक्तव्यत्वात्। तस्य प्रसज्य प्रतिषेध
त्वे तु तस्यानुसारिव्याख्यानादेवोक्तार्थसिद्धिरिति बोध्यं। केचित्तु भाष्ये तस्यानापन्ने तद्धर्मलाभस्य तत्कार्यस्य च लोकन्यायेनै
व सिद्धोयमतिदेशः स्वंरूपमित्येतच्छास्त्रसत्त्वाद् उक्तेः कार्यं वधो न स्यादितीत्युक्तं। एवं च स्वंरूपमिति शास्त्राविषये तेन सिद्धिरि
ति सूचितमेवं चाशास्त्रीयस्यापि धर्मस्यातिदेशो भवत्येवातिप्रसंगस्तु तस्यानुसारेण कचिल्लोकन्यायानाश्रयणेन परिहरणी
यो यदि प्राप्नोति। एवं च न कश्चिद्दोषः न पदान्तेति सूत्रे लुण्कुण इतिरित्युदाहरणाच्चैकचित्तदनाश्रयणं तत्र हि कणइयतेः क्विब्
तत्राल्लोपेतस्य स्थानिवत्त्वादुवङ् यणिवानादिशादचः पूर्वत्वे स्थानिद्वारके ग्रहमाणे ऊङ् न स्यादित्याहुः। अतएवार्थवत्सूत्रशेषे
अप्रत्यय इत्यस्य पर्युदासत्वमेवोक्तं भाष्ये। तत्र पक्षे च कांड इत्यत्र पूर्वोक्तवद्भावेन प्रत्ययांतभिन्नत्वाद्दोषः शंकितो न तु स्वाश्रया
प्रत्ययांतत्वेन। ह्रियोदीर्घादिति सूत्रे भाष्येपि अतिदिश्यमानधर्मविरुद्धस्वाश्रयकार्याभाव इति स्फुटं तत्र हि द्विवइत्यत्रेयङ्
र्थं प्रकृतिवदतिदेशो स्वाद्यनुत्पत्तिमाशंक्यैवं तर्हि प्रातिदेशिकानां स्वाश्रयात्वं न निवर्त्तत इति समाधायातिदिश्यमानधर्म
विरुद्धस्वाश्रयनिवृत्तेरावश्यकत्वाभिप्रायेण थाप्येतन्नेत्याशंक्य निर्देशसामर्थ्याद्विभक्तिरित्युक्तं अप्रसिद्धवत्सूत्रे च यटे स्फु
टमेतत्। यत्तु गाङ्कुटादिसूत्रे भाष्ये स जिदतोस्त्यत्राकितीति पर्युदासास्ति सत्वदतीयत्र हलंताच्चेति किस्वासिद्धेप्यपि अमा
गममाशंक्य प्रसज्यप्रतिषेधाश्रयणेन समाहितं तत्तु वार्त्तिककृदुक्तमुपायांतरं बोध्यं। अनल्विधाविति विधिग्रहणाद्दला
श्रये विधावित्यर्थात् यत्र विधौ शब्दतः स्थानिस्थान्यवयवान्यतरोल्वृत्ति धर्मयत्तस्तेन तस्मात्तस्य तस्मिन्नसादेरित्यादिप्र
कारेण विशेष्यतया विशेषणतया वा आश्रयणं तत्र निषेधः व्यूढोरस्केन द्योर्घुभ्यां कद्धः प्रपच्येत्युदाहरणानि। शब्द
त इत्येतेरग्रहीत्यादावविटइरिइतिसिध्यति दीर्घविधावत्र चेट इति समुदायाश्रयणात्। अन्यथा टस्यानुबंधत्वादिका
रस्यैवोभयत्राश्रयणमित्यल्विधित्वं स्यात्। अत्र सूत्रे विशेषातिदेशोपि। अन्यथा इडरेरपिद्धः सत्वात्तवत्वासादित्वस्य

तद्विशेषधर्मत्वात् उपस्थितधर्मैस्तद्व्यापकधर्मैश्च विध्याकांक्षापूरणे सति तदतिरिक्तविशेषग्रहणे मानाभाव इत्येतन्न्यायमूलकेन सा
मान्यातिदेशे विशेषानतिदेशेन सिद्धे विशेषणतया साश्रयणे निषेध इत्येतत्प्रतिपादकस्यानल इत्येतत्प्रतिपादकस्यानल इत्ये
व सिद्धे कृत तस्य विधिग्रहणस्य वैयर्थ्यं स्यात्। हलादि क्ङिन्निमित्तके खप्रतिषेधकानल्यपीति लिंगाच्च अनुबंधकार्येत्वनल्वि
धाविति निषेधो न अनुबंधानामनेकांतत्वेपि शिष्टग्रहणेन तेषामल्व्यवहाराभावज्ञापनात् नानुबंधकृतमनेकाल्त्वमिति
ज्ञापयतीति भाष्येऽल्व्यवहाराभावबोधनद्वारेति शेषः। ध्वनितं चेदं क्ङिति च गाङ्लिटि हलः श्नः इति सूत्रेषु भाष्ये तत्राद्ये यासु
टो ङित्वचनान्ङिदादेशाङितो नेति ज्ञाप्यत इत्युक्तं द्वितीये गाङो ङित्वस्य सानुबंधकादेश इत्कार्याभावज्ञापकतोक्ता तृतीया
यादेशेषु पित्त्वासिध्यादूषितं च ज्ञापकं। अंत्ये शानचः शित्वस्य सार्वधातुकादेशे अनुबंधा स्थानिवत्त्वज्ञापकत्वमुक्तं उक्त
दूषणेरेव दूषितं च। अन्यथानल्विधाविति निषेधेन तत्वाद्याज्ञापकत्वासंगतिः तिबाद्यादेशेषु पित्वाद्यसिद्धिश्चेति बोध्यं।
अचः पर। आदेशग्रहणमनुवर्त्तते तदनुरोधाद्वद इति स्थानषष्ठी परस्मिन्नित्यादेशविशेषणं तदाह। परनिमित्त इत्यादि। अप
एवादेश इत्यर्थः तेन मरुत्तमाचष्टे मारयतीत्यादौ वृद्धिः अत्र सूत्रे प्रयोगयोर्वृ स्थानिक इत्यर्थः न तु सूत्रे स्थानित्वेनोपात्ताचस्था
दे निक इत्यर्थस्तेन णिलोपाद्येन स्थानिवत्त्वं सिध्यति। अतएव च ङूपरनि ह्रस्व हीसेण्यंताल्लिचि अपीवददित्यादि सिध्यथौ
निषेधः सार्थकः। अच इति किम्। आगत्य मलोपस्य स्थानिवत्त्वात् ह्रस्वस्येति तुग्न स्यात्। परस्मिन्निति किं। युवजानिः जि
ङः स्थानिवत्त्वेन यलोपो न स्यादिति। पूर्वविधाविति किं। नेधेयः निपूर्वाद्धाञः कि प्रत्यये आतो लोपे तस्य स्थानिवद्भावात् अ
चल्व्यपदेशाविरोधात्त्वाश्रयश्च व्यवनिवृत्तौ ढगनापत्तेरिति दिक्। अत्र स्थानिनि निमित्तेयद्भवति तदादेशेपि भवति स्थानि
नियन्न भवति तदादेशेपि नेति भावाभावयोरुभयोरप्यतिदेशः तत्र भावोदाहरणं निगाल्यते इति अभावोदाहरणं पटयति

इत्यादि। स्थानिनिमित्तकं भवत्यादेशानिमित्तकं नेति च तदर्थः लघूपधत्वसंपादनद्वारा लोपनिमित्तिका वृद्धिरित्याहुः। स्थानिभूतात्त्वचइ
ति। सूत्रे श्रवणाद्याख्यानाच्च तस्यैव पूर्वत्वविधित्वमिति भावः पूर्वविधावित्यस्य पूर्वसंबंधिन्येव शास्त्रविधेये कर्तव्य इत्यर्थस्तेन पूर्व
परयोर्विधौ न। तेनाद्दत्तुरित्यादौ स्थ...तानिमित्तगुणस्य सवर्णदीर्घेन स्थानिवत्त्वं वस्तुतोत्र पूर्वविधिशब्दे तत्र मेकस्योक्तोर्थः।
द्वितीये भावे किः संबंधसामान्यषष्ठ्यंतपूर्वशब्देन समासः विधिर्भवः पूर्वसंबंधिभावे तत्र स्थितौ स्थानिवदित्यर्थः अत एवैवं
यद्वित्यादौ यस्येति चेति लोपे तस्य स्थानिवत्त्वात्संनियोगशिष्टन्यायप्राप्तनिवृत्तिप्रतिबंधेन नकारस्थितिः अत एव वनपदांत
सूत्रे पञ्चेन्द्राण्यो देवतास्य पंचेंद्र इति लुकि न स्थानिवदित्यस्योदाहरणं दत्तं भाष्ये अन्यथा तत्र पूर्वत्विनदस्यस्य संबंधिनः क
स्य चिद्विधेयस्याभावात्स्थानिवत्त्वाप्राप्तिरेवेति तदसंगतिः स्पष्टैव प्रकृतसूत्रेपि भाष्ये कर्मसाधनस्य विधिशब्दस्योपादानेन
सर्वमिदं संगृहीतमिति भावसाधनो विज्ञास्यते पूर्वस्य विधानं प्रति पूर्वस्य भावं प्रति स्थानिवदिति उक्तं तत्र भावसाधन इत्यस्य
सोपीत्यर्थः पूर्वत्वं च व्यवहिताव्यवहितसाधारणं अव्यवहितस्य ग्रहणे मानाभावात्स्वरे निषेधाच्चैतेन पटयतीति सिद्धं प्रकृते च द्वि
त्व निषेधे स्थानिवत्त्वप्राप्तिः॥ न पदांत॥ अत्र द्विर्वचनसवर्णादिग्रहणं वतिषु टित्त्वान्यातिदेशानां त्रिपाद्यामपि प्रवृत्ति
बोधनार्थं तेन रामइत्यादौ विसर्गादिसिद्धिः अत्र विधिशब्दो भावसाधनः पदांतेत्यत्रांतशब्दश्चरमावयववाची कर्मषष्ठ्या
समासः तेनैषोपकृसतीत्यादावेतत्तदोरिति सुलोपोनद्वर्णः प्रात्तरिरूपं तत्र यणः स्थानिवत्त्वादुत्वे च न स्थानिवत् अनेन
निषेधात्स्यंचेदं भाष्य इति भाष्यप्रदीपयोर्निरूपितं। अत्र पदेंत इति सप्तमीसमासो भाष्येउक्तस्तेन प्रत्यासत्त्यापर
परस्यानादेशस्यैवानेन स्थानिवत्त्वनिषेध इति वतस्थानित्यादौ न दोषः न चैवमपि पूर्वत्रासिद्धीयेन स्थानिवदिति

निषेधोस्तु वरः पदेंत इत्यर्थेन तत्र स्थानिवत्त्वनिषेधव्यावृत्तिपर भाष्यप्रामाण्येन पूर्वत्रासिद्ध इत्यत्र पदचरमावयवविधा
यकातिरिक्तस्यैव त्रैपादिकस्य ग्रहणात् अत एव माहिष्मानित्यत्र जश्त्वं न। सूत्रे जश्पदेन झलां जशीत्यस्यैव ग्रहणं चरसंनि
हितस्यैव ग्रहणौचित्यात्। कार्यकालपक्षेपि त्रिपाद्यामंतरंगपरिभाषा न प्रवर्तत इति वक्ष्यत इति न तयास्य सिद्धिः गोचेत्या
दौ गतिकारकोपपदानामित्यस्यानित्यत्वेन सुबुत्पत्त्यनंतरमेव समासः उत्तरपदत्वे चेति प्रत्ययलक्षणप्रतिषेधश्च प्रत्या
सत्त्योत्तरपदस्य कार्यित्व एवेति न दोषः पदे इति पदत्वयोग्योपलक्षणं वा। अत्रेदं भाष्यमपि मानं। अत्र पदचरमावयवादि साधकः
प्रतिबंधकश्च स्थानिवद्भावो निषिध्यते विनिगमनाविरहात्। एतत्सूत्रभाष्यक्रमेण द्विःत्यादि सूत्रभाष्ये: पूर्वत्रासिद्धेन स्था
निवदित्यवस्थाप्यवरे यलोपस्वरदीर्घग्रहणवर्जं द्विर्वचनादि प्रत्याख्यातमिति संभवतो निषेध इति द्विर्वचनग्रहणात्पूर्वत्रा
सिद्ध इति निषेधाद्धेति भावः। इकार इति। स्थानत आंतर्यादिति भावः। अदर्शनं। स्थाने इति वर्तते प्रसंगे सतीति तदर्थस्तद
हा प्रसक्तस्येति। शास्त्रतोर्थतो वेति भावः। अत्र इदं शिष्टानसामान्ये तत्र ज्ञानस्यावर्जनीयत्वेन तत्सामग्र्यंतर्गता उच्चारणक
तासत्ता निषिध्यते तत्र प्रत्ययलोपे शास्त्रतोर्थतश्च प्रसक्तोच्चारणस्य लोपविधानेन तस्य तस्मिन्विषये नुत्पत्तेरवाच्या
ख्यानं प्रत्ययलक्षणार्थमिति बोध्यं अर्थस्येषा संज्ञा व्याख्यानात्यत्तु प्रसक्तस्येति किं ग्रामेति ष्टतीत्यादौ ल्यपलोप इति
पंचम्यापत्तेः अपत्तिचात्रल्यपोदर्शनं शास्त्रतोर्थतश्च न तत्प्रसक्तिरिति न दोष इति तन्न। तेन प्रत्यासत्त्या ल्यबंतार्थक
र्माधिकरणयोरेव पंचमीविधानेन तस्यात्राप्राप्तेः तत्त्वेतु अप्रत्ययवार्थत्वात्ल्यबंतस्य प्रसक्तिः तस्मात्प्रपुइत्यत्र क्विपोदर्शनस
त्वेन प्रत्ययलक्षणेन तु गापत्तिर्दोषः कस्त्र प्रत्ययेन प्रकृत्यापेक्षेयस्तु न अत्रैव प्रकृतिं विनातिदेशात: प्रत्ययज्ञानस

त्वेनव्यभिचारात्तदाक्षेपासंभवात् इतिपक्षे इतिविनिगमनाविरहादितिभावः। द्वित्वस्यत्रैपादिकत्वाच्चनयणोबहिरंगासिद्ध
त्वं। अतएवदध्यत्रेतिभाष्येउदाहृतं। धकारयकारयोरिति। तेनविसर्गादिद्वित्वेनाधिकोपिनक्षतिः। दधिमिति। द्विधत्वंत्र
क्रियायांबोध्यंएकस्याआकृतेश्चरितः प्रयोगोनद्वितीयस्याभविष्यतीतिकृत्वानुप्रयुज्यतइतिसूत्रभाष्योक्त
न्यायेनैकस्यद्वित्वेपरस्यतदभावोनुचितइतिनवाच्यं। सार्थकानेकविषयत्वेन्यायांगीकारात्। यत्रान्याकृतिकरणे
भिन्नार्थत्वसंभावनातद्विषयत्वाच्च। हलोयमामितिलोपेद्वित्वाभावेचैतदेवरूपं। नादिन्या। यरोनुनासिकइत्यतोयरइ
तिवर्त्ततेपुत्रशब्दस्येत्यवयवषष्ठी। आदिनीशब्देपरइतिचप्राधान्याद्यरएवविशेषणं। सूत्रेआदिनीतिङ्यंतानुकरणंलुप्तस
प्तमीकं अतएवतत्परेचेत्यस्यादिनीशब्दोयस्मात्परस्तत्रपरेइत्यर्थइतिहरदत्तोव्याख्यत्। अप्रज्ञातोमाधवोप्येवमेव। ईदृशाक्रोशा
स्यस्त्रीष्वेवदर्शनाच्च। आक्रोशोनिंदातदाह। पुत्रादिनीति। तादृशाक्रोशस्यस्त्रीष्वेवदर्शनादाह। पुत्रहतीति। अनचिचेति
सिद्धेपुत्रस्यतांतेचेद्धतजग्धयोरेवाक्रोशएवेतिनियमार्थमिदंसंयुक्तेष्विति। त्रिप्रभृतिष्वितिसूत्रेवर्णानांसजातीयाना
मिवग्रहणंपरस्परसाहचर्यात्तेनचतथाचः संभवंति अतएवाचोरहाभ्यामितिसार्थकं। निर्धारणेसप्तमी। अचइत्यनु
वर्त्ततेत्रिप्रभृतिसंयुक्तवर्णमध्येचः परस्परोद्वेवास्तइत्यर्थः। तेनेन्द्रःराष्ट्रमित्यत्रनकारषकारयोः प्राप्तद्वित्वस्यैवनि
षेधविकल्पः अनचिचसर्वत्रशाकल्यस्येत्येवसिद्धेइदंसूत्रद्वयंविकल्पस्यमतभेदेनाप्रसव्यवस्थाबोधनार्थमिति
बोध्यं। यरोनुनासिकइत्यत्तोवेत्यनुवृत्त्यानचीत्येवसिद्धेतुसूत्रत्रयमपितथेतिबोध्यं। अचोर। अचइतिश्रुतत्वा
द्व्याख्यानाच्चरहाभ्यांसंबध्यते। तस्मादित्युत्तरस्येत्येतल्लभ्यमाह। अचःपराभ्यामिति। वास्तइति। ऊयोहइत्यत्र

न्यतरस्यामित्यनु[illegible]तेरितिभावः। दीर्घादाचार्याणामित्युत्तरमनुस्वारस्ययथि। वापदांतस्यतोद्वेउदस्था। ऊयोहे। शश्छोटीति
इ सूत्रपाठोत्तरं[illegible]उपि। अभ्यासेचर्च। खरिचवावसाने। अणोप्रगृह्यस्येतिपंचसूत्र्याः प्रागितिभाष्यसंमतापाठ्यध्यायी। पाठेतु
वावसानेइत्यंतानुवृत्तिर्बोध्या। स्पष्टंचास्यवैकल्पिकत्वंलएसूत्रेभाष्ये। आदित्यइति। आदित्यशब्दोपत्यार्थेण्यन्ताद्देवतार्थेण्यः
यस्येतिचेत्यल्लोपेतेनयलोपः आपत्यस्यैतितुन। आपत्यस्याभावात्। हलइतिकिं शय्या। यमामितिकिं। आर्घ्णोत्। यमीतिकिं रामाभ्यां।
एचोयः। इचोचियएयवायावः अवावौयिप्रत्ययेइतिसूत्रयितुमुचितमित्याहुः यथासंख्यसूत्रलब्धमर्थमाह। क्रमादिति। उदात्तादिगुणयुक्तानाम
न्यगुणकव्यावृत्तिस्तुस्थानेन्तरतमपरिभाषयाबोध्या एतदेवाभिप्रेत्ययथासंख्यसूत्रेभाष्येप्रकृतेसूत्रेस्थानेन्तमसूत्रेण व्यवस्थोक्ता। संवृतावर्णस्य
संवृतावर्णोविवृतावर्णस्यविवृतावर्णइति। एतद्भाष्यप्रामाण्येनएओइत्यनयोरकारांशेसंवृतत्वंइतरांशेविवृतत्वंतदुपरागाच्चनसंवृतत्वस्यप
यग्रहणं। एओइत्यनयोरकारांशेपिविवृतत्वमेवेतिबोध्यं। तस्यलो। उपदेशेतिइत्यतइदित्यनुवृत्त्याविभक्तिविपरिणामेनचसिद्धेतस्यग्रहणं
सर्वलोपार्थंतेनजिगुइन्नामन्त्यस्यलोपोननानर्थकेइतिपरिभाषातुभाष्यप्रत्याख्यातेकेतिदिक्। नभवतीति। फलाभावादितिभावः। वांतो। येनवि
धिस्त्यस्यापवादभूतयातस्मान्ङ्चीत्याद्यर्थमावश्यिकयावाचनिकयायस्मिन्विधिस्तदादावल्ग्रहणइतिवार्त्तिककृदुक्तपरिभाषयालभ्यम
र्थमाह। यकारादाविति। ओदौतोरिति। ओदौतोरितिवक्तव्यमितिवार्त्तिकमूलाद्याख्यानादितिभावः। पूर्वसूत्रेवांतोप्रत्ययोरेवस्थानित्वनिर्णया
दितिस्थानेन्तरतमसूत्रस्यकैयटोक्तंतुनयुक्तं। वांतइत्यनायसूत्रपर्यालोचनस्यावश्यकत्वेपितद्वाक्यार्थपर्यालोचनेमानाभावात्। यथासंख्यसूत्रस्
यकारएवबोधोत्तरंतयोस्तत्वनिर्णयात्। अंतरतमपरिभाषयानिर्वाहेतुलक्ष्यपर्यालोचनकालेतन्निर्णयः अतएवपूर्वसूत्रेस्थानिविशेषलाभो
यथासंख्यसंबंधादिहतुनिमित्ताभावात्तल्लाभाभावइतिषष्ठेप्रकृतसूत्रेकैयटः। गव्यमिति। भव्याद्यलोपोन। यीतिकिं गोभ्यां प्रत्ययेकिं गोयानं।
ननुगव्यूतिरित्यत्रवस्यहलिसर्वेषामितिलोपः शाकल्यस्येतिवालोपःस्यादतआह। वांतइत्यत्रेति। नचविशेषविहितेनकार्यित्वेनलोपेवस्यानि
मित्तत्वबाधइतिवाच्यंनिमित्तत्वानाक्रांतविषयेकार्यित्वस्यचारितार्थ्यात्। तत्रकौण्डिन्यन्यायस्यानवकाशविषयोविधेयविषयश्चेतिस्पष्टत्
द्वित्वेघचामितिसूत्रेयद्विधायकेचभाष्ये अंत्येउत्तरयोर्विग्रहेणविशेषासंप्रत्ययान्नित्यग्रहणमनर्थकंक्रियासमभिहारेचनेतेभ्योयङ्नभवि

तव्यमिति भाष्यं चेन विशेषासंप्रत्ययादित्यनुकृष्यते ऽन्यथा तत्र कौंडिन्यन्यायेन सिद्धे विशेषासंप्रत्ययादित्यनुकर्षकचकारवैयर्थ्यापत्तिः
निरूपयिष्यते चेदं यङ्न्ते। तस्य च वार्त्तिके नुवृत्त्यापूतौ श्रूयमाणएव कारांत ऽपादेशाद्यर्थः सूत्रे तु न फलं गव्यादौ भत्वेन वांतस्य पदत्वाभा
वाद्वव्येस्वत एव तदभावाद्गौपाशब्दः गोशब्दादिभ्यः क्वनादावपिनः केंद्र इति नियमेन पूर्वस्य पदत्वाभावात्। एवं तर्हि वार्त्तिक एव प्रश्लेष
उचित इत्याशयेनाह। च्छकारांद्वेति। लोपो व्योरिति सूत्रे वकारप्रत्याख्यानं तु लौकिकोदाहरणाभावेन तदर्थतया बोध्यं। अत एव कोगुणेतिसू
त्रे ऽप्ततोर्थांतस्येत्यत्र लुप्तनिर्दिष्टो वकार इत्युक्तं भाष्ये प्रश्लीयसौत्रप्रयोगार्थं तदिति तदाशयः नचैवं विस्रवेद्यत्यादौ तस्य लोप इति दुर्वारं गं
भूतावुच्चारणस्य चारितार्थ्यादिति वाच्यं। गविचयुक्ते इत्यादि निर्देशैर्वारणात्। परे तु सा पूर्वपदस्य युक्तिरिति न वकारप्रश्लेषो लोपे नोचितः।
किं च छंदसि सर्वविधीनां व्यवस्थितत्वान्नवकारलोपप्रसक्तिस्तत्र येगव्यूतौ। ऽध्वपरिमाणे पि संज्ञाशब्दोयं तत्र संज्ञात्वभंगापत्ते
र्नवलोपः यथा रघुनाथेति संज्ञाशब्दे नित्यस्यापि णत्वस्याभावः सर्वनामशब्दे णत्वाशंकातु तस्य संज्ञिविशेषे ऽधुनिकविनियो
गात् शास्त्रानुसारि शब्दस्यैव विनियोगस्य उचित इत्यभिप्रायेण निरूपितं चैतत्सर्वादि सूत्रे भाष्यप्रदीपोद्योते इत्याहुः निरूपयि
ष्यते चेदं पूर्वपदात्संज्ञायामिति सूत्रे॥

धातोस्त। धातोरित्यस्याभावे प्रातिपदिकमात्रविषयो नियमः स्यात्तथा च गव्यमित्यत्र न स्यात्। ऽोयत्त इत्यत्रैव स्यात्।
तदभावे सामान्यतो नियमापादनं तु योगविभागे वकारवैयर्थ्यापत्तेरयुक्तं। तन्निमित्तस्य चेद्धातोरेवेति नितिबाध
व्यासिद्धेस्ताधारणायेव कारः॥ नव्यमित्यादि। ऽप्रत्ययगुणार्थ धोर्यत् एयन्निमित्तकत्वेनै चोयादि प्रत्ययनिमित्तकता।
तन्निमित्तस्येति किमिति सूत्रमेव किमर्थमिति प्रश्नः। ऽोयत इति वेजः कर्म्मणि लटि यकि यजादित्वात्संप्रसारणे
ऊत्सार्वेति दीर्घे ऽाङ्गास हाद्गुणः न धातुलोपसूत्रभाष्यरीत्या बहिर्भूतधातूपसर्गकार्य्यस्य बहिरंगत्वाद्धातो
देशे गुणो सिद्ध इत्यरुचेराह। ऽोयतेति। तस्माद्दिवकर्म्मणि लङ् ऽाडागमे द्विः शेषं पूर्ववत्। दय्यज। द्विरुये।
जिजये इत्यनयोरेव ग्रहणं न दुडीषू हिंसायां देजै इत्येद इत्यनयोर्व्याख्यानात्। ऽप्तत एव द्विज्योरेवैच इति भाष्ये
उक्तं। तस्मै प्रेति। क्रयार्थं वस्तु निक्रय्य इति निपात्यत इत्यर्थो व्याख्यानात्त गुणभूतस्यापि तदापरामर्शः क्रयार्थ
चं च पलोपप्रधानरूपं तदर्थ इति विशेषणात्तदाह। क्रेतार इति। योग्यतामात्रग्रहणेन व्यावर्त्तकं तस्यादितिभा
वः केचित्तु स्वियं धान्यादि दत्वायत्र तन्मूल्यग्रहणं तत्र धान्यं क्रय्यं यत्र तु स्वयं द्रव्यं दत्वा परकीयधान्यादि ग्रहणं त
त्र धान्यं क्रेयं द्रव्ये तु न क्रय्यत्वं नापि क्रेयत्वं किं तु धान्यादेरेवाशक्तिस्वभावात्। भाष्यस्वरसोप्येवमेवेद्याहुः। वो
पसः॥ भोभगो ऽघोपूर्वस्येत्यशीति चानुवर्त्तितत्र औकारांते घोतोगार्ग्यस्येति बाधकमित्याशयेनाह वर्णपूर्व
योरिति। व्योरित्यनुवृत्ताव पिवर्णसमाम्नाये यकारस्य प्राक्पाठात्तत्क्रमेणाह। यवयोरिति। सतस्मा ऽपोच
ष्ट इत्यादिभाष्यप्रयोगादत्र ऽरोरित्यस्यासंबंधः इदं सूत्रं लघुप्रयत्नेन शाकटायनमतेतयोर्विधानेन शाकल्य

मत्तेतदभावात्।ऽअवर्णेति किं गोर्य्यत्र।परान्तयोः किं हरये।ऽप्रश्नि किं दधि वेत्ती तिदधिवीः क्विपूतमाचष्ट इति एयंताक्विप्।
दधिवूकरोतीति।क्विपि तू दध्यात्।विज्निमित्तकोलोपोव्योरिति लोपस्तु न णिलोपरिलोपयोः स्थानिवत्त्वात् प्राति
प३ पदिकात्।तिंजुंत्यापदत्वाभावेन परपदस्याजादेशाभावेन च वलोपस्य पदचरमावयवत्वाभावेन च न पदांते
तिनिषेधाप्रवृत्तेः।एतेन कनिमित्तकोवलोपो न दुर्वारदृत्यपास्तं।किंच स्थानिवत्त्वनिषेधं विनास्य पदांत
त्वासिध्यात्र निषेधाप्रवृत्तेः।स्थानिवत्त्वनिषेधज्ञाने पदांतत्वज्ञानं तन्निर्णये च स्थानिवत्त्वाभावज्ञानमित्यन्योन्याश्र
यस्तत्राप्रवृत्तौ बीजमिदं च न पदांतसूत्रे भाष्ये स्पष्टं।न च पदसंज्ञायां टिलोपस्य स्थानिवत्त्वाद्यस्य पदान्तत्वमेव ना
स्तीत्यशीतिव्यर्थमिति वाच्यं।पूर्वत्रासिद्धीय इत्ति निषेधात्साक्षात्पदत्वादिद्वारकपरंपरया वा पूर्वत्रासिद्धीयन्याय
कस्य प्रतिबंधकस्य वातिदेशस्य तेन निषेधादिति केचित्॥परे तु पदांताहलोणः संतीति लणसूत्रस्य भाष्याद्दध्वा
दिरनभिधानमेव भोभगो इति सूत्रे शग्रहणमनर्थकमन्यत्राभावादिति वार्त्तिकाच्चऽप्रशोन्यत्र तन्निमित्तकार्य्यकार्यि
णोरभावादिति तदर्थः।न च न्यत्रतरस्तीति तद्व्याख्यानभाष्ये तु ग्रहणमुपलक्षणं एतदाशयमजानानेनैकदेशिनो
त्तरार्थं हलि सर्वेषामिति दध्वकरोतीत्यत्र मा भूदिति।उक्तं ऽअस्यैवैकदेश्युक्तित्वं लणसूत्रस्योक्तभाष्यविरोधेन
स्पष्टमेव कैयटेनोक्तं ऽअत एव भाष्ये उत्तरार्थमित्युक्त्वा हलि सर्वेषामित्यत्रैव प्रयोजनमुक्तं।हलि सर्वेषामित्यत्र वकारनि
दर्शैवात्र तद्वारणसंभवान्न तत्राप्यत्र ग्रहणस्य प्रयोजनमिति तद्भाष्यमेकदेश्युक्तिरेवेत्याहुः॥कानि संतीति॥वा

क्यसंस्कारपक्षेऽपि पूर्वोपस्थितनिमित्तकत्वरूपांतरंगत्वमादायांतरंगाणां पूर्वं प्रवृत्तिरिती का रादेः स्थानिभूतादचःपू
र्वत्वंबोध्यं।एकः पूर्वगुण इत्यादेर्विधेयसमर्पकत्वेन तत्रैकत्वसंख्याया विवक्षणेनोभयोः पूर्वपरयोरेकवाक्यतयैव विधेयान्वये
न चानयोः स्थलयोः करं कुर्वित्यादि तद्वोभयसंबंधैकं विधेयस्यैव प्रतीरेक ग्रहणं स्पष्टार्थं।उरण्रपरः।स्थाने इति षष्टीस्था
नेइति परिभाषालब्धं उदात्तस्वरितयोर्यण इति वत् स्थानेन्तरतम इत्यतः स्थाने ग्रहणमनुवर्त्तते तत्स्थलक्षणायाप्रसं
१।५ गावस्थायामित्यर्थस्तं हरपरः सन्नेवेति।रपर इत्यवयववाचिना परशब्देन षष्ठ्यर्थे बहुव्रीहिस्तेनास्यावयवत्वात्
यदागमा इति न्यायेन विशिष्टस्य गुणवृद्धित्वेन ऋकारस्य गुणवृद्धी अरारावेव नैव इति नियमोपपत्तिरत एव रव
र्णामि...तिसूत्रे यत्लिच्चसेरीति सूत्रे च भाष्ये गुणो भवति वृद्धिर्भवतीति रेफशिरा गुणवृद्धिसंज्ञको भिनिर्वर्तत इत्यु
क्तं ऋः स्थानेऽण्प्रसज्यमान एव रपरो भवतिसर्वभक्तश्च रेफ इत्ययं गुण इति कैयटः।अवयवत्वं वाचनिकमेव
तत्साहचर्यबोधनपर्य्यवसायि अन्यथा वर्णस्य वर्णान्तरानवयवत्वं हलन्ताच्चेति सूत्रे भाष्योक्तरीत्याऽसंगतं स्यात्।
पंचम्यर्थे बहुव्रीहिणा नवयवत्वे तु गुणवृद्धिशब्देनाकारादौ च रेफपरस्यैतदेकवाक्यतया विधानं स्यात्।गुण
त्वादिकं त्वकारादिनिष्ठमेव स्यादित्युक्तनियमानुपपत्तिः।अत एव वव्रे इत्यादौ हलादिशेषसिद्धिरन्यासाव
यवस्यैवानादेस्तेन निवृत्तेः।एतेनाणमन्तु घर परत्वं विधीयत इति परास्तं।उक्तनियमानुपपत्तेः।अत्र पक्षेक

रपरत्वंकसपरत्वं इतिव्यवस्थानुपपत्तिस्तु न पदस्थानिकस्य रेफपरत्वं लकारवत्स्थानिकस्य लपरत्वमिति व्यवस्थासंभवात्।
तत्रांतरतम्यादिति।स्थानतइतिभावः।रेफादिद्वारादेशस्यापि मूर्द्धादिस्थानत्वात्।तत्रतत्रादेशानेवरपरलपरानुच्चा
र्येदंसूत्रंनकार्य्यमितितु न वाच्यं।आपरस्पधामीत्।मजामिदित्यादौदोषापत्तेः।अत्राणपूर्वेतिचप्रशास्तृणामितिनि
र्देशात्।वस्तुतोप्रत्याहाराभावे रपरइत्यस्यस्थानेलपरमितिपठनीयमितिलपरत्वं वक्ष्यामीतितुल्यास्यसूत्रभा
ष्याह्लम्पते।ऊरोऊ।ऊयोहइत्यतोवावसानइत्यतोवाविकल्पोनुवर्त्ततेहयवरट्सूत्रशेषेभाष्येस्पष्टमिदं।लोपइति।
ऊधधातोर्ऊरइतिभावः।असतीति।द्वित्वाभावइत्यनुकृष्यते।विधमिति।त्रिधकारत्वंप्रक्रियाभिप्रायेण चद्वि त्वमि
न्नेपूर्वत्रकर्त्तव्येपरमसिद्धमित्यर्थकिनपूर्वत्रासिद्धमद्वित्वेइत्यनेनधातुधकारस्यजश्त्वेदस्यद्वित्वमिदंअप्ययुक्तमि
तिवाच्यं।फलेविशेषाभावेनतदनादरणात्।नह्यत्रजश्त्वात्पूर्वमनंतरंवाद्वित्वेरूपेविशेषोस्तितदनंतरंजश्त्वप्र
वृत्तस्तस्यपरिभाषात्वेनफलविशेषेएवप्रवृत्तेरित्यन्यत्रविस्तरः।पंचमीति।विनिगमकाभावादितिभावः।अतएवास्य
वैकल्पिकत्वं।कृष्णेकेति।कृष्णेतिसंबुध्यंतंपृथकपदमितिकश्चित्।एत्येध।ऊठ अचादेशएवव्याख्यानात्।एचौ
तिनोगेविशेषणमूमस्तत्रासंभवात्।एत्येधत्योरिति।योगंविभज्यतयोरेवैतीतिविशेषणभाष्येकृतत्वाच्चतदाद्वैजा
द्योरिति।एतिस्त्रेत्वेवप्रसिद्धत्वात्।उपैतीत्यादौवृद्धिरेचीत्यनेनगतार्थत्वमाशंक्याह।पररूपगुणेति।एत्येधत्योरेङि
पररूपस्यापिचाद्गुणस्येतिविवेकः।उपेधतइति।अत्रनसर्वादिशः।एत्येधत्याद्यवयवेचीत्येवंक्रमेणसूत्राणामर्थस्तु।
अप्ययमेवार्थइतिप्रत्ययलक्षणसूत्रस्यभाष्यस्वरसः।वक्ष्यत्यवेतिव इत्येधत्यूगत्विति सप्तमीबोध्या।प्रष्ठौह इति॥

2

प्रष्ठंवहतीत्यर्थवहेरण्वीतिततः शस्यूतिसंप्रसारणेपूर्वरूपेनेनवृद्धिः।प्रदिधरिति।परेत्विती कारादेशप्रतिषेधइतिवार्त्तिकेएधत्यनु
पादानात्नचेधतेरव्यभिचारादितिवृत्तेश्चास्यानमिधानमेव।एत्येधत्योरेचीतिविशेषणमितिभाष्यस्येधत्यंशेसंभवमात्र
लोपरंजकतयाविशेषणमित्याशयइत्याहुः।उपेधयतइत्यादावपिवृद्धिर्भवत्येव।प्रकृतिभागस्येधरूपत्वात्।किंचए
त्येधत्यवयवेचीत्यर्थः।प्रत्ययलक्षणसूत्रभाष्यसंमतइति।अत्रनदोषः।पुरस्तादिति।पुरस्तादपवादाअनंतरान्विधीन्बा
धंतेनोत्तरानितिन्यायः।अपवादंस्वपरस्मिन्बाधनीयेभेदेनापेक्षायांप्रथमोपस्थितबाधेनाकांक्षानिवृत्तिर्हितद्बी
जं।असाधुरेवेति।आङि ओकारादेशस्यपूर्वंतत्तयाङिपररूपेणबाधनादितिभावः।अर्थवद्ग्रहणइति।अस्याः बी
जंस्वंरूपमितिसूत्रेउक्तम्।पररूपेणा इति।पूर्वंधातुःसाधनेनयुज्यतइतिसिद्धांतादितिभावः॥उपसर्गादिति।
तपरकरणादुपरेकारीयतीत्यादौवासुपीतिनवृद्धिःसोचरुतिस्तुनग्रहेतव्याख्यानात्।अपादित्यनुवृत्तेनतदंतविधि
रित्याह।अपवर्णांतादिति।यस्मिन्विधिरितिपरिभाषयाह।ऋकारादावित्ति।पूर्वपरयोस्तयोःसमुदाययोरंत्याद्योवर्णयो
रेकादेशइत्यर्थः।उपसर्गावयवाकाराद्धात्ववयवलेऋकारेतयोःपूर्वपरयोर्वृद्धिरित्युचितं।गतेरितितुनोक्तं।अप्रवर्तीत्या
दिदोषात्॥अंता।दूरपूर्वपरयोरितिवर्त्ततियथासंख्यंच।अंतादिशब्दानुपस्थितेकादेशस्यानिपरौ।पूर्वपरशब्दौचतत्त
घटितसमुदायपरौ।एवंचपूर्वस्यपरस्यसमुदायस्यांतादिभ्यांवर्णाभ्यांपृथगवस्थिताभ्यांयेव्यवहाराप्रातिपदिकत्व
सुवत्त्वप्रत्ययत्वादयस्तेऽप्येकादेशस्यभवंति।ननुतद्वर्णमात्रवृत्तयोःलव्हस्वत्वादयस्तत्फलितमाह।बोधय
मित्यादितेनरामाविप्ताबौपरादिवत्वेनोइत्यस्यसुत्वेदर्वान्तस्येकदेशविकृतन्यायेनप्रकृतित्वेयस्माद्विहित

स्तदादित्तदंतत्वमार्थसमाजग्रस्तमितिपरत्वसिद्धिः तद्वर्णमात्रवृत्तिधर्मानतिदेशात् शाधुग्मिरित्यत्रात्वनिबंधनऐस्य
अयजेइंद्रमित्यादौसवर्णदीर्घश्च न। अतएवतुक्यसिद्धवचनंचरितार्थमन्यथा अधीत्येत्यादावादिवत्वेनह्र
स्वत्वप्रयुक्ततुकूसिद्धौतद्वैयर्थ्यस्पष्टमेव। तदुक्तंवर्णाश्रयेचान्तादिवत्वप्रतिषेधोवक्तव्योनवातादृप्यातिदेशा
दिति अंतादिवर्णमात्रवृत्तिधर्मानतिदेशादितितदर्थः। हरीरूपेणेत्यादावेकारविशिष्टएकानुत्तरपदत्वंभव
त्येवस्थानिवद्भावेनतुनैतद्रूपं अप्राधान्येनालाश्रयणात्। किंच। एकादेशेवर्णयोरेवस्थानिवत्वंनसमु
दायस्येतिभीईभियइत्यादावेकादेशविशिष्टेधातुत्वानापत्तिः धातुत्वस्यैकादेशस्यानिधर्मत्वाभावात्। इपा
नुमानिकादेशकल्पकवाक्यमंतादिघटितसमुदायस्यैकदेशघटितआदेशइत्येवंनतुप्रत्येकंतयोः स्थानिवत्वबोधकंतथा
सतिस्वाश्वशब्दस्यस्थानिवत्वेनस्वशब्दतयाततइदिनशब्देवृध्यापत्तेः किंचोभयतआश्रयणेनांतादिवदित्यसंगताचस्ती
यादित्यायसिद्धिः स्थानिवत्वंतूभयतआश्रयणेघ्यतएवान्यथाऽचःपरस्मिन्नित्यस्याप्युभयतआश्रयणेऽप्रवृत्त्या
पत्तौप्रायतइत्याद्यसिद्धिरितिदिक्॥ निर्द्देशादिति। नचकर्त्तरिचर्षरित्यादौगुणस्यपदद्वयसंबंधिरेफस्वरात्मकवर्ण
द्वयाश्रितत्वेनवहिरंगत्वाद्रेफाभावेनविसर्गास्यापितत्वात्। परनिमित्तकत्वमप्युभयोः समंकिंचकार्य्यकालपक्षे
त्रिपाद्यांतदुपस्थितावपिपूर्वंप्रतिपरस्यासिद्धत्वादंतरंगाभावेनपूर्वस्यांतरंगत्वाभावात्कथंतस्यासिद्धत्वप्रतिपादनंन
वानयापूर्वस्यासिद्धत्वादभावेनतंप्रतिपरासिद्धंपूर्वत्रेत्यनेनवक्तुमशक्यमितिवाच्यंएवंद्विविनिगमनाविरहादुभयोरप्य
प्रवृत्तौविसर्गोऽदुर्वारः। एवंचविरोधात्कार्य्यकालपक्षेपितदुपस्थितिरेवत्रिपादीस्थंतरंगेऽनुचिताअतएवविसर्ज्जनी

यसूत्रेभाष्येइत्थमेवयुक्तिमुक्त्वाअयुक्तोयंपरिहारोनवावहिरंगलक्षणत्वादितिउक्तं। एवंचतत्रतत्रवचनान्येवकार्य्याणि
ज्ञानपाकानुसरणंवाकर्त्तव्यं। अतएवनिगालतइत्यादौलतादृष्टांतसदोषइतिवचनमेवारब्धं अन्यथान्तरंगत्वात्णिलोपात्पू
र्वंवैकल्पिकलत्वेचकृत्वभाषवपरीसादौवहिरंगासिद्धत्वेनचसिद्धेतद्वैयर्थ्यंस्पष्टमेवयत्तुलत्वात्णिलोपाद्वाधात्कार्य्यकालपक्षेतदुपस्थि
तयान्तरंगपरिभाषयानुमानिकाप्रलत्वासिद्धस्यापिपूर्वत्रेत्यस्यवाधइतितत्तलक्षणैकचक्षुषामादरणीयं। अतएवोरणिति
सूत्रेरेफस्यपूर्वान्तवत्वेविसर्ज्जनीयप्रतिषेधोवक्तव्योनार्कुरायथमित्युक्तंभाष्यइतिदिक्। उपसर्गाःक्रियायोगेइतिसूत्रंह्यायाः क्रि
यायोगनिमित्तत्वादित्यर्थः। यद्यर्थेक्रियारूपेप्रादीनामन्वयस्तस्यैवोपसर्गत्वमितिभावः। प्रकृतेचप्रत्याससत्ताक्रिया
दिनिमित्तोपसर्गग्रहणात्गतः अच्छः प्रईइत्यत्रन। पुनरितिप्रकृतसूत्रेभाष्येस्फुटमेतत्सुवधातावितिः सुवंतप्रकृतिके
धातावित्यर्थः। तुल्यास्यसूत्रेऽपाकीरीयतीत्यादौतदुदाहरणत्वस्यभाष्येउक्तत्वात्शास्त्रेसुवंतस्यधातुप्रकृतित्वेनोक्त
तयातत्प्रकृतिकेइतिव्याख्यामेवोचितम्। ऋषभस्यसमीपमुपर्षभंतदिच्छतिउपर्षभीयतीत्यत्रतुनवृद्धिः उपेत्यस्यानुप
सर्गत्वात्। अत्रापिधातावित्यनुवर्त्यवाक्यभेदेनव्याख्येयंतेनसुप्धातवपिनप्रकृतिभावः आर्षभीयतीति अत्रशरोचीसस्या
नुपन्यासेनव्यंजनात्परस्येकस्यानेकस्यावोच्चारणेविशेषाभावेनाचोरहाभ्यामित्यस्यतन्निषेधस्यवानावश्यकतास्यचितावा
क्यभेदेनेतिइदंवृत्तौस्पष्टम्। भाष्येतुनदृश्यतेएवंचेतिवार्तिकंसूत्रेधातावित्यनुवृत्तेरारब्धं। अवधारणंनियमः एवशा
द्रस्येयोसमर्थरूपमवधारणमसंभवरूपानवक्ळृप्सादिचतपोरंत्योत्रेवशाद्धार्थइत्यभिप्रेत्याहऽनचक्ळृप्तावेवे

न्ति। द्वैवभोज्यसे इत्युक्ते स्थलसंकीर्णत्वादिना नास्ति संभवस्तत्र भोजनस्येति गम्यते। अपचैत्या। अपच इति निर्द्धार
णेषष्ठी। अपचैर्भवोऽस्य: अपचैत्यादि तिजमकत्वाद्बहुव्रीहिः॥ मार्त्तण्ड इति। मृतो ण्डात्जातो मार्त्तण्डः अपरे विषयएवप
ररूपं। ननु मार्त्तशब्दात्स्याच्चृतकाराकारः स आदिर्यस्येत्यन्यपदार्थोद्रुर्ल्लभ इति चेन्न। एकस्मिन्नेव समुदाय
रूपत्वारोपेण तदवयवत्वारोपेण च तदुपपत्तेः एतन्मूलकमेव व्यपदेशिवदेकस्मिन्निति पक्यते इत्यलं॥
वस्तुतत्रारोपस्यानावोपयोगः शब्दज्ञानानुपाती वस्तुशून्यो विकल्प इति। पतञ्जल्युक्ते रर्थाभावेपि विकल्पात्म
कं ज्ञानमत्र तदपि लक्ष्यानुरोधाच्छास्त्रप्रक्रियोपयोगीति बोध्यं। पतञ्जलिरिति तु अञ्जलेः पतित इति विग्रहे म
यूरव्यंसकादित्वात्समासे तत्रैव निपातनादित शब्दस्य लोपे पृषोदरादित्वात्तल्लोपे साधुः गोनर्द्द देशे क
सचिद्द्विषेरञ्जलेः संध्याकरणसमये पतित इत्येति ख्यातः। आत्वोष्ठयोः। अत्र समर्थपरिभाषाप्रवृत्तिर्नोपति
तिष्ठते समासेंगुलेः संगत्यादो समासग्रहणेन पदविधिरिति तत्रत्र स्वरसेन च पदत्वेन सुबन्तत्वेन वा यत्र साक्षा
दुद्देश्यता तत्रैव तत्परिभाषापतिष्ठते समासेंगुलेः संगत्यादो समा [illegible] सग्रहणेन पदविधिरिति तत्रत्र स्वरसेन
च प्रवृत्तिस्वीकारात्। ओत्वोष्ठ्यादिमात्रस्य पदत्वाभावात्। अवर्णा [illegible] दोत्वोष्ठयोरचितदघटितसमासस्य
र्थादंतोष्ठ्योवः स्थूल इति प्रयोगसिद्धिः अन्यथा प्रत्यासत्त्या घुत्तपदके समास एव प्रवृत्त्यापत्तौ तद

संगतिः स्यस्यैव। प्रोतु बिडालः। ओमाङोः। अत्रैङीति नानुवर्त्तते तेन षडर्थकाङ्गसह षष्ठभशब्दस्य समासे अद्य अर्धभ
इत्यत्र पररूपे अद्यर्धभसिद्धिः। नचात्र परत्वाद्दीर्घप्रसंगः। प्रतिपदविधित्वं च निरवकाशत्वे सत्येव बाधकत्वे प्रयोज
कमिदं च मध्येपवादन्यायेनावेहीत्यादो वृद्धेरेव बाधकं स्यादिति वाच्यं। लक्ष्यानुरोधेनात्र बाध्यसामान्यचिन्ताश्रय
णात्। अन्यत्र प्रतिपदविधित्वस्य बलवत्वे प्रयोजकतादर्शनेपरदीर्घात्पूर्वं पररूपप्रवृत्तेश्च। अव्यक्तशब्दार्थौ। ध
नेरिति। अविद्यमानकत्वादिशब्दस्येत्यर्थः। तस्य चास्य शब्दोनुकरणे एव संभवतीत्याह। अनुकरणस्येति। अ
चालोन्त्यस्येति न प्रवर्त्तते नानर्थक इति निषेधात्। आम्रेडितस्य वेति वक्तव्ये नाम्रेडितस्येत्यारंभाद्ध। अपत इति
किं वरजिति। नाम्रेडित। अव्यक्तानुकरणस्य इति वर्त्तते अव्यक्तानुकरणावयवीभूताम्रेडितावयवाच्छब्दस्ये
त्यर्थः। नाम्रेडितस्य तस्तु वेति न सूत्रितं वैचित्र्यार्थफलकल्पनाभिनिवेशस्तु नयुक्तो भाष्यानुक्तेः। अतएव तदर्थी
तेतद्वे इति सूत्रे द्विस्तत्वग्रहणं प्रमादकृतमाचार्यस्येति भाष्ये उक्तं लाघवानवधानलक्षणात्र प्रमाद इति कैयटः
कृतत्वधानं कृतदनवधानमिति तु भाष्यकृदुक्तप्रयोजने तदवधानमन्यत्रान्यदिति निर्णयं ननु डाचो भावादेतत्
त्रासिरत आह। बहुलवचनादिति। तस्य परः। अवयववाचिपरशब्देयोगे इत एव ज्ञापकात्षष्ठी। तस्य ग्रहणं स्प
ष्टार्थं द्विरुक्तस्यानुवृत्त्या षष्ठ्याविपरिणामेन सिद्धेः। अन्यद्विरुक्तपरस्य तु न संज्ञा अव्यमे सर्वस्येयेतस्त्रकरणे
संज्ञाकरणात्। उसांज। अंतग्रहणं उसीति निवृत्त्यर्थं सर्वोपकारकतया च प्रकरणांते स्यसेरवः। एतेन

अदितत्रैवले खचितहल्पपास्तं। अफलोः सावर्ण्यनिषेधादाह। अचि किमिति। अनिष्पन्नेरिति। नाज्झलाविति सूत्र
विषयनिर्णयेऽपवादविषयपरिहारेणतत्तद्वर्णीयसवर्णपदवाच्यनिर्णयोत्तरं तावतां ग्रहणस्य ग्रहणकशास्त्रो
त्पत्तयेतद्बोधकालेग्रहणकशास्त्रस्यतावद्ग्रहणेहबोधकलानिष्पत्तेरित्यर्थः। सूत्र ससवर्णपदानुवृत्तिमभिप्रेत्या
ह। ऋतिसवर्णे इति तत्फलं ददधृकारादावेतदप्रवृत्तिः। एतद्विधेययोरृ ॠ एत्सूत्रानन्तरं पाद-च्तत्वंतेनतयोः स्थाने
प्लुतसिद्धित्वयोश्चनरपरत्वां। विमानमिति। अत एवाकः सवर्णे इत्यनेनैवऋकारद्वयस्य स्थाने रेफद्वयवत्ताऋरूपगु
णकृतां तर्ष्येण क[illegible]दाचिद्वेफद्वयगर्भस्यविवृतत्वांतर्ष्येण कदाचिद्विवृतस्यऌकारेऌकारवत्तांतर्ष्येण कदाचि
द्विलकारस्य कदाचिद्विवृतत्व साम्येन रेफवत्ता साम्येन च तादृशस्य ऋकारस्य सिद्धा विकल्पसिद्धिमाश्रित्यैतद्व
चनद्वयं तु ल्यास्येति सूत्रे भाष्ये प्रत्याख्यातं। द्वौ रेफाविति। अत्रापि तदेव भाष्यं मानं द्विरेफत्वेऽपि रेफद्वयवतिस्था
निन्ययं लकारवृत्तर इति ब्व स्या सिध्यति अभितः इति। द्वौ रेफाविति तु षष्ठ्यन्ते तद्द्वितीयान्तं अभितः पदयोगात्। ऌ
एओङ् सूत्रभाष्ये मात्रृणामिलादोण त्वादि सिध्यर्थमवश्यमंगीकर्त्तव्ये वर्णैकदेशा वर्णग्रहणेन गृह्यन्त इतिप
क्षेप्रत्यूयरवद्धाभिर्वाचातरतीलादौ तु गेस्[illegible] वन्जलक्षणएष्टनांशकायादौ धदिति तु वि
धानसामर्थ्यंतत्परकरणसामर्थ्यं नौषच्नू इति सूत्रस्य नोग्रहणसामर्थ्यं भेदनाप्रतिभासमानेषु वर्णवय

वेषु अवयवसदृशास्वतंत्रवर्णाश्रयकार्याभावज्ञापनरूपसमाधानस्य च करणवत्वात् ऋत इत्यत्र रोरीत्यस्यतत्त्वकार इत्यादौ
तोर्लीत्यस्य च स्वीकार समाधानाकरणेन यत्तदूफात्यरं भवेत्तेरिति हयवरट् सूत्रस्य भाष्येण च ऋऌक् सूत्रस्य योरर्द्धमात्राऽज्भाग
स्याभितः ऌकृस्यो रर्द्धमात्राजभागस्याभितः ऌकृस्त्वेन तथैवोचितत्वादिति भावः। द्वौ लकाराविति। हलद्वयवत्पूर्वसाह
चर्यादिति भावः अत्र हूस्वऋकारद्वयस्थानिकैकादेशएव पूर्वस्य साधुत्वं हूस्वऋकारऌकारस्थानिकैकादेशएवोत्तरस्य
साधुत्वमत एव ऋतिनऋकारेनातिलृकारः अत एव वार्त्तिके ऋतीति तपरकरणमुत्तरवार्त्तिके ऌतीति च चरितार्थं तुल्या
स्यसूत्रे भाष्ये यदेतदृतीति एतत्वृत्तद्धति वक्ष्यामीत्येतद्वचनाश्रयणेन ऋऌवर्णयोः सावर्ण्येन कार्यमिति च संगछ
ते उपस्थितरेफीयद्वयत्वस्यागेमानाभावादीघत्रस्य ह्रस्वविमोविवृतत्वेहि विवृतऋकारऌकाराभ्यामनयोरपिग्र
हणेकः सर्वेण इत्यनेनेवसिद्धौवार्त्तिकस्यवैयर्थ्यापत्तेः। एएङः। पदांतात्किं भवतिसर्वत्रप्रकृत्यांत इति सूत्राख
कृत्येनुवर्त्ततेप्रकृतिशब्दोत्रस्वभाववाची उ स्य ज्ञाप्रकृतिरित्यादौ तथा दर्शनात् प्रकृत्या स्वभा[illegible]स्थानमि
त्यर्थः। अत एवप्रकृतिभावेन स्वरूपंनापयाद्य इति भावः नान्तःपादमितिपाठे त्वनेनसूत्रेणगो[illegible]स्यद्वा
ग्रंतन्नेतिव्याख्यानेन नान्तः। पादमित्यनेनेव सर्वत्वादिकं विकल्पेन निषिध्यत इति बोध्यं। अवङ् स्फोटायनं यस
स स्फोटप्रतिपादकइत्यर्थः। स्फोटायनस्येतिपाठेनहादित्वं कल्प्यं। स्फोटायनोवङः स्मर्त्तीन्स्य तदभाव स्येति स्म
र्त्तरानुसन्धानद्वारेणात्र विकल्पो बोध्यः। निवृत्तमिति। अत एवेन्द्रे इति। सामर्थ्यान्नित्यमिति भाष्याद्युक्तं।

॥३४॥

गवाग्रमिति। सन्निपातपरिभाषाया अनित्यत्वाद्दीर्घ इति बोध्यं। व्यवस्थितेति। देवत्रातो गलो ग्राह इति योगे च सिद्धिः स्मि
यत्तेन विभाष्यं ते गवाक्षः संशितव्रतः। तेन ग्राम्यपर्यवयवेनेत्यिशाच्छोरिति सूत्रे भाष्ये स्पष्टं। अपस्नी स्त्रेषणे इति सूत्रे अग्नी द
रनी निहरेत्यत्र एतद्वार्तस्यर्थवार्त्तिकरूढ्दुलग्रहणघटितं न्यासकृतवार्त्तत्वत्याख्यानायभाष्ये कृतेन विभाष्येति यो
गविभागेन विभाषेयस्य व्यवस्थितविभाषात्वं धनितं तथा अपजेर्घघजपोरितिच व्यवस्थितविभाषेति अपजेर्वितिसूत्रे
भाष्ये स्पष्टं। नच व्यवस्थितविभाषयेन्द्रे नित्यत्वावङः सिद्धे इन्द्रे चेति व्यर्थमिति वाच्यं। भाष्योक्तातिरिक्तव्यवस्थितविभा
षाणामग्रामाणिकत्वज्ञापनार्थत्वात्तस्यादित्याहुः। इन्द्रे च। क्वचिद्भाष्यपुस्तके चशब्दरहितः पाठः इन्द्रावयवे वित्यर्थस्तेन
षष्ठीपुरुषोत्तरपदे षष्ठीतत्पुरुषे गवेन्द्रयज्ञ इत्यादावव्ङः सिद्धिः अन्यथा वाक्ये गोशब्दस्येन्द्रपरत्वासंभवेन समा
सादेपादिन्द्रशब्दस्योत्तरपदत्वएव प्रवृत्तिः स्यात्॥ प्लुतप्रगृह्या। इत्यस्य प्रकृत्येति पाठएवसामंजस्यमत्वाह। अपप्र
कृतीति। नचैतत्घटकपदार्थज्ञा नायप्रगृह्यत्वादिकथनं पूर्वेयुक्तमिति वाच्यं। इन्द्रे चेत्यचप्राचीनपमिति नित्यग्र
हणस्यग्रामादिकत्वं बोधयितुं तदव्यवहितमेतत्सूत्रसेखनात् तत्र नित्यग्रहणे तदव्यवहितोत्तरे तत्सूत्रे तद्वैयर्थ्यं
स्पष्टमेवेत्याशयेनाह। प्लुताप्रगृह्याश्च। वक्ष्यंत्येइति अचीत्यनुवर्त्तमाने पुनरजग्रहणं व्यासत्याग्रत्राचि अनयोः
प्रकृतिभावस्तदजनिमित्तकार्य्यस्यैवतेनाभावइत्यर्थं तेन जानुउ अस्यरुजति जानू अस्येत्यादि सवर्णदीर्घरूप
संधिर्भवत्येव। दूराद्धूतेति। दूराद्धूते चेति प्लुतः अत्र प्लुतस्याश्रयासिद्धत्वं बोध्यं। नित्यमिति किमिति। वाग्रहण
निवृत्त्यैवतल्लाभ इति प्रश्नः। माभूदिति। नित्यग्रहणसामर्थ्ये नपुनर्विधानाद्बाधकविषयेप्ययमेवेति भावः। इकोसवर्णे। एङः

इत्यतः पदांतादित्यनुवृत्तं प्रथमया विपरिणम्यत इत्याह। पदांता इति। चेति ह्रस्वयणोर्विधानसामर्थ्यात्तु न विकल्पसिद्धिः। अप
दांतादेशयणश्चरितार्थत्वात्। सामर्थ्यादिचेति। चेन प्रकृतिभावाकर्षणेत्यकइत्यत्र चानुकृष्टत्वेन तत्संबंध इति तद्दर्थं
ह्रस्वविधानसामर्थ्यस्यावश्यकत्वेन चकारो व्यर्थ इति भावः। भाष्ये स्थितमिति। प्रकृतसूत्रे इति शेषः। एतेन ह्रस्वाभावे
प्रकृतिभावार्थं चकार इति न्यासायुक्तमपास्तं। चक्री अत्रेति तु संहितायां अविवक्षायां बोध्यं। नसमासेसिति चेति वार्त्ति
कं। पार्श्वमिति। पर्श्वाणसवत्त व्यइतिणस् सितिचेतिपदत्वं। ऋत्यकः। सवर्णार्थमनिर्गर्थं चेदं। होतृऋकारः ब्रह्मऋ
षिः। आर्छदिति। आदेधात्त्वयवत्वेन। पदांतत्वादिति भावः। एतेनाटश्चेति पुनः वृद्धिविधानार्थेन चेनोस्योमाङ्
पररूपबाधवत्प्रकृतिभावस्यापि बाधेनेष्टसिद्धिरित्यपास्तम्। समासेपीति। व्याख्यानादिति भावः। सप्तऋषी
ति णामिति। इकूसंख्यैः समासः प्रकरणश्चद्वयप्रकृति भावविधायकसूत्रद्वयमुपन्यस्य प्लुतप्रगृह्या इति सूत्राका
दितप्लुतप्रगृह्ययोर्मध्ये प्रथमोपात्तत्वात्। प्लुतप्रकरणमारभते। वाक्यस्यटेः। वाक्यस्येत्यस्याभावे पदस्यटेरि
त्यर्थेन स्यस्यापि पदस्यटेः प्लुतः स्यात्। तत्सत्वे तु वाक्यस्यटि रंत्यपदस्यैव संभवतीति न दोषः। टिग्रहणाभावे
प्लुतश्रुत्योपस्थिताच परिभाषया अंतस्यैव स्यात् टिग्रहणे तु सामर्थ्यात् टिनाचेति विशेषणाद्धं जनांतस्यापि भव
ति। प्रत्यभिवादे। अशूद्रस्त्र्यसूयकेषु वा च्यमानोगुर्वादिर्यस्त्रतिसंभापत्तेतत्प्रत्यभिवादनत्वाशीर्वचनं अशूद्रेस्त्र्या
शीर्वादरूपप्रत्यभिवादाभावेनाशूद्र इत्यस्य वैयर्थ्यापत्तेः अतएवभाष्येऽशूद्रे इति किं कुशल्यसितुषजकेत्यु
क्तं। अभिवादयेइति। नमस्कारपूर्वकमाशीरादिवाचयामीत्यर्थः। आयुष्मानित्यायुष्मत्व विधेयत्वात्संबोधन

विभक्त्यभावः। भवेत्यस्याप्युपलक्षणं प्रत्यभिवादे शर्मादिप्रयोगो न नियतः एचोऽप्रगृह्यस्येति सूत्रे प्रत्यभिवादे टेः स्येचः
प्लुतविधानात्। आयुष्मानेधि अग्निभूता३ इति भाष्ये तदुदाहरणं च शर्मादिप्रयोगे तु तदंशे एव प्लुतः शर्मान्तं नाम
ब्राह्मणस्येत्यादिस्मृत्यान्तस्य नामावयवत्वबोधनात्। स्त्रियां नेति। स्त्रिया अपि नाम्नाभिवादे प्रत्यभिवादे इत्यर्थ
स्य भाष्यसंमतत्वादिति भावः। नाम गोत्रं वेति। अभिवादे प्रत्यभिवादे नामगोत्राभ्यामेव स्यादिति पुत्रसिद्धं तत्राधि
कृतस्य पदस्यांत्यस्य प्रत्यभिवादे इत्यनेन विशेषणात्तस्यास्त्यात्प्रत्युच्यमानार्थवाचकस्यैव प्लुत इति भावः तत्र ना
मशब्देन द्वादशेऽह्नि पित्रादिकृतं गृह्यते अत एवायुष्मान्भव दंडि३ नित्यादौ प्लुतो नेति स्पष्टं भाष्ये। भो राजन्येति। भो
भोशब्दस्य राजन्यवैश्यवाचकनामत्वाभावे प्लुत इत्यर्थः भोशब्दस्याप्राप्ते इतरयोस्तु नामत्वात्प्राप्ते विभाषे
यं। दूराद्धूते। यावति देशे प्राकृतप्रयत्नोच्चारितं संबोध्यमानो न शृणोति किंत्वधिकं प्रयत्नमपेक्षते तावत्
दूरं दूरादाह्वानं च दूरात्संबोधनस्योपलक्षणं न तु संबोधनविभक्तिनियामकस्याभिमुखीकृत्य बोधनरू
पस्य संबोधनस्योपलक्षणं आगच्छतु भवान्देवदत्त इत्येवमाह्वानस्यापि संभवात् अत एवाकडारसूत्रेण
दीगुरुसंज्ञयोः समावेशे वासीबन्धुरित्यत्र गुरोरिति प्लुतो नदीबंधुनीति पूर्वपदांतोदात्तत्वं च पक्षमुक्तं भाष्ये
अन्यथात्र संबोधनाभावेन गुरोरित्यस्याप्राप्त्या तदसंगतिः स्पष्टैव उपलक्षणत्वादसत्यप्याह्वाने भवति
तदाह। सक्तूनित्यादि। अत्रापि दूराद्धूत इत्येतदनुवर्त्तस्य पदस्येत्यस्य विशेषणं तेन आहूयमानार्थवाचिनः

पदस्यैव टेः प्लुतः तच्च रूढं यौगिकं वेत्यन्यत्। हैहेप्रयोगे। हैहयोः संबोधनद्योतकत्वेन केवलाभ्यामपि ताभ्यां संबोधनदर्शि
नेन च तयोरपि हूयमानार्थपदत्वात्। गुरोरनृत इत्येव सिद्धे नियमार्थमिदमित्याह। हैहयोरेवेति। हैहेन्त इत्येव सिद्धे प्र
योगग्रहणादनंत्ययोरपि तदाह। हे३ रामेति। केचित्तु एकं हैहे ग्रहणमनंत्यार्थं अन्यथा वाक्यस्य टेरित्यधिकारादंत्ययो
रेव तयोः स्यात्तदाह। हे राम३ इति। प्रयोग इति तु यत्र संबोधनोन्तरं तयोः प्रयोगस्तत्र तेनैवाभिमुख्यस्य द्योतितत्वेन द्यो
त्याभावादनर्थकयोरपि तयोः प्लुतार्थं तदाह। रामहै३ इति। अन्यथाप्रयुक्तयोः प्लुतासंभवात् द्वैयर्थ्यं स्पष्टमेव
हैहयोरिति तु तयोर्हूयमानार्थपदत्वाभावादप्राप्ते विध्यर्थं नियमे तु नमानंत्ते नात्र प्लुतसमावेशः एतत्सर्वं भाष्य
कैयटयोः स्पष्टमित्याहुः। यत्तु अपयं हूयमानार्थपदटेः प्लुतस्य बाधकस्तत्र कौण्डिन्यन्यायादिति तन्न शिवाहे
यादौ तस्याप्राप्ते स्तन्यायविषयासंभवात्। गुरोः। दूराद्धूत इत्यनुवर्त्तते तेन दूरात्संबोधन एव प्रवृत्तिस्तदाह। दूरा
द्धूत इति। दूरत्वं चात्राविवक्षितं तेन प्रत्यभिवादे भो राजन्येत्यस्य विषयेप्यस्य प्रवृत्तिः तद्विषयेप्युपलक्ष्य बोध
नसत्वात्। सर्वप्लुतप्रकरणस्य तु न शेषः तथा हि सति वाक्यस्य टेरित्यनेन सहैवास्याप्यधिकारत्वमेव कुर्यात्।
एतत्त्रयविषयमेवेदमिति प्रकृतसूत्रे अनुदात्तं प्रश्नान्तेति सूत्रे च वृत्तौ स्पष्टं। अपिशब्दो यथाप्राप्तटिसमुच्चया
र्थः यदि तु गुरोः सन्निधानादंत्यो गुरुरेव समुच्चीयते तदांत्यस्य लघुमति अनंत्यगुरावेतस्य अंत्यस्य लघोदूराद्धू
ते चेत्यादीनां दुर्बलत्वेन प्लुतसमावेशापत्तिः एकैकग्रहणं चेत् द्विहितानामेव पर्यायार्थं स्यात्। तेन यत्रांत्यो
पि गुरुरनंत्यगुरुद्वयादिवात्तत्रैव पर्यायः स्यात्। व्याख्यानादेतदर्थलाभः अनंत्यस्यापीत्यपिनांतस्य गुरो

रगुरोश्चेत्यर्थः। पर्य्यायार्थमिति। अन्यथा समावेशः स्यादिति। अनुदात्तं पदमिति तु त्रिपाद्यां न प्रवर्त्तत इति तत्रैव वक्ष्य
ति। आचामिति तु सर्वेषां पदे प्लुताभावार्थं। विकल्प्यत इति। सा च व्यवस्थित विभाषा तेनाग्नी३ग्नी न्विहरेत्यादावग्नी
त्प्रेषणं इति न। भाष्ये तु विभाषा पृष्टेति सूत्रे विभाषेति योगविभागो दर्शितः। सा च व्यवस्थित विभाषेति कैयटः। प्र
तएवोभ्भावयेति परस्येति वक्तव्यमिति वचनस्य प्रग्नी३ग्नी नित्यादौ प्लुत निवृत्तये कृतस्य विभाषेति योगविभा
गेन प्रत्याख्यानं भाष्योक्तं संगच्छते एवं च भाष्यसंमते वाव्यवस्थित विभाषेत्याहुः। अप्लुतवदित्युक्त्या प्लुत इत्यध्या
हारस्तत्राह। प्लुतो प्लुतवदिति। प्लुत एव निषिध्येतेति। तस्यानेऽप्लुतस्य विधाने न स निवर्त्तेत्यर्थः प्रसज्य प्रतिषे
धेन व्याख्यानं तु न युक्तं गौरवात् किंचात तथा सति प्लुत प्रकरणे एवं नोपस्थिते इति वदेत्। न च पर्य्युदासेऽग्नी इ
तीत्यादौ प्रगृह्याश्रय प्रकृतिभावं बाधित्वान्परत्वाद् प्लुतवद्भावे दीर्घादिकं स्यादिति वाच्यं शाक्ल इति शास्त्र सापेक्षा प्लुत
वद्भावापेक्षया वर्णमात्रापेक्ष प्रकृतिभावस्यान्तरंगत्वात्। अप्लुतवदिति सप्लुत कार्य्यनेत्यर्थस्तु न शास्त्रमर्यादया
लभ्यः प्लुते अप्लुत सादृश्यस्य वक्तुमशक्तेलाभात्। भाष्ये तु प्लुत विधान कार्य्य प्रतिषेधार्थमिति तु किंस्तु फलितार्थाभि
प्रायेणेति बोध्यं। प्रगृह्याश्रय इति प्लुते कृतेपि तस्यासिद्धत्वाद् दीर्घत्व वृद्धिवत्त्व तन्तं प्रगृह्यत्वमनु कार्य्ये प्लुत्लभं अ
नुकरणे तु प्रकृतिवदनुकरणमित्यतिदेशान्नत्वमिति भावः। किं मया कर्त्तव्यमिति प्रष्टश्चाह। विनुहीदमिति। विभाषा
पृष्टप्रतिवचने हेरिति प्लुतः। इदमत्र बोध्यं वाक्यान्तरस्य हेरिकारस्य वाक्यटित्वं। उभयत्रेति। उभ स्थिते प्राप्तेरनु
पस्थिते चाप्राप्तेरित्यर्थः। विभाषितेविकल्प्यत इति विभाषा गुरोश्च हल इत्य प्रत्यये टाप् प्राप्ते ननुपस्थित इति प्राप्तवि

भाषामिति भाष्येणोक्तम्। नवेति विभाषायामिति भाष्य प्रयोगात् भाष्ये तु किमर्थमिदमुच्यते उपस्थितार्थं तत्र ईद्ग्रहणेन ना
र्थः अविशेषेण चाक्रवर्मणस्याप्लुतवदित्येवेदमपि सिद्धं वशादयं वशोयमित्युक्तं तद्भले नोपस्थिते पूर्वविप्रतिषेधेन ईद्ग्र
हणेपि नित्याप्लुतवद्भावएवेष्टः। अव्याख्याने नित्याप्लुतवद्भावस्य येन नाप्राप्तिन्यायेन वैकल्पिकबोधिताभावांशबाधक
त्वात उपस्थित इत्यस्य निवृत्या परविप्रतिषेधा उभयत्र विभाषेयमिति कैयटस्य प्रमादः मूलं तु इति शब्द भिन्नेवैदिके
ति शब्दे चेत्येवं परतया कथंचिद्व्याख्येयमित्यन्ये उद्देश्य प्रतिनिर्देश्ययोरैक्य माषादय्य सर्वनाम पर्य्यायेण तच हि
गभाजितीयमिति निर्देशः विशेषणे तदंत विधिमाश्रित्याह। इदुदेदंतमिति। द्विवचनमिति। संज्ञाविधौ प्रत्यय
ग्रहणे तदंत विधि निषेधादिति भावः। एदंतमिति व्याख्याने फलमाह। पचेते इति। निपात एक। निपात इति किं चकारात्र प्रत्य
यस्य शास्त्र कल्पितार्थवत्वात्। एकाजिति। कर्मधारयो वर्त्तिपदार्थ प्रधानत्वेनांतरंगत्वाद्बहुव्रीहिरतिम्रग इत्यादि निर्देशाच्च।
तेन प्रेदमित्यादौ न दोषस्तदाह हे को जिति। आङ् वर्ज इति। पर्य्युदासस्यौचित्यात् अत एवैकाजनाङिति नासूत्रि। वासुदे
ववाचकस्य अपशब्दस्य आङा सहाव्ययीभावे आ आत् अपमित्यादौ सत्यभिधाने स्वत आङ्ङित्वेन पूर्वान्तवत्त्वेन निपा
तत्वेपि प्रगृह्यत्वं न पूर्वान्तवत्वेनाङ्त्वातिदेशे अपि तिदिश्यमानधर्मविरुद्धस्वाश्रयधर्म प्रयुक्त कार्य्य निवृत्तिरति
रतिदेशस्वभावसिद्धत्वात् ओदिति सूत्रे आङ् ओ इत्यत्रानाङिति प्रतिषिद्धार्थोयमारंभ इति भाष्यं तु पर्य्युदासेपि गम्यस्य
प्रतिषेधस्य सत्वान्नानुपपन्नं अनाङिति पर्य्युदासादेव निपातैकाजरूपत्वेसत्येपि निपातैकाच्त्वात् ग्रहणस्य स्वार्थे त्वा
ग समुदाये स्वांगत्वाभाववदवसमुदाये अप्यत्वाभावादजित्येवाच समुदायग्रहणाभावेसिद्धे एकग्रहणमन्यत्र वर्ण

ग्रहणे जातिग्रहणार्थं तेन धिप्सतीत्यादि सिद्धिरिति भाष्ये स्पष्टं जातिग्रहणार्थमित्यस्योपात्तजात्याश्रये कानेकव्यक्तिग्रहणा
र्थमित्यस्योपात्तजात्याश्रये कानेकव्यक्तिग्रहणार्थमित्यर्थस्तेन तितउशब्दे कदेशस्य उइत्यस्यानुकरणे अउ अकारो दित्यत्रानुक
रणे चानितीति निपातत्वे पि प्रगृह्यत्वाभाव एकग्रहणफलं बोध्यम्। ननु ङकारस्य काप्यश्रवणेन ङिद्ङि द्विवेकोर्दुर्बोध इत्यत
आह। वाक्यस्मरणयोरिति॥ वाक्यशब्देन स्वार्थगतमनभिमतत्वम्। स्मरणं विस्मृतस्य स्मृतिविषयता। एवं किलतदिति। स्मृता
र्थनिर्देशः निपात इत्यनुवृत्तमोदित्यनेन विशेष्यतद्व्याहोर्दतइति। निपातसंज्ञा चादिष्वेवोपस्थित चादीनां सतिसंभवे ऽर्थवत्तामेवेति
सार्थकनिपातानां निपातपदेन तत्तदर्थविशिष्टानामेवोपस्थितिरिति गौणमुख्यन्यायेन प्रकृतसूत्रस्थ निपातपदेन गौणार्था
नां न ग्रहणमिति गो भवदित्यादौ च्व्यंतेन। स्यवृत्तिः एवं च कार्यकालपक्षे पि च्व्यंता निपाता इत्यस्यानुपस्थितिरिति तत्सारि
भाषावशात् अव्ययसंज्ञा दोतु नेतस्या परिभाषाप्रवृत्तिरनित्यत्वादत एवानर्थकेपि निपातेषु संज्ञा सिध्यति। त्रयो इतीत्यादौ
प्रगृह्यता याह। संबुद्धिनिमित्तक इति। संबुद्धिपर इति व्याख्याने तु सोर्लुका लुप्तत्वेन तत्परत्वाभावान्न स्यात्। ननु मते तिनि
षेधानित्यत्वं लगत्तिकग्रतिः इता विति किं परो त्र अपनार्षे किं ब्रह्मबंधवित्यब्रवीत्। संहितायां विवक्षायामप्यवादिरहितप्रयोगा
र्थमिदं तद्द्विवक्षा च वर्णोच्चारणे नियतेनार्द्धमात्राकालव्यवायेनोच्चारणेच्छा। तदधिकार्द्धमात्राकालव्यवायेनोच्चारणेच्छा तदवि
न वक्षेति बोध्यं। ऊञः। अत्रोञ्निपात एव ऊञ ऊँ इत्येकसूत्रत्वे तु शाकल्यग्रहणानुवृत्तौ ऊँ इत्येकमेव स्यात्। प्रगृह्यसंज्ञाधकरणे
न प्रगृह्यत्वस्य सादाद्दुदेश्यसंबंधस्य स्पष्टतया त्र विधेयविशेषणत्वे मानाभावात्। ततः शाकल्यग्रहणानुवृत्तावपि प्र
गृह्यत्वस्य उ पादेशस्य च विकल्पे उ इति विती ति सिध्यति न तु ऊ इति प्रगृह्यत्वविकल्पेन पक्षे तदभावे पि अस्य तात्पर्यम्॥

एतदभावे नि[illegible]काजित्यस्याप्रवृत्तेः तदुक्तं भाष्ये योगविभागं प्रदर्श्य किमर्थो योगविभागः शाकल्यमते उञ्विभाषा यथा स्यात्। ऊँ इ
ति ऊ इति अन्येषामाचार्याणां मतेन विती ति अनेन हि योगविभागस्य ऊ इति रूपसिद्धिः फलमिति स्पष्टमेव लभ्यते अतो योगवि
भागेन व्याचष्टे। ऊँ इति। ऊञो वाचकं प्रगृह्यपरमित्यर्थः शाकल्यस्येतौ प्रगृह्यमित्यनुवर्त्तते तदाह। ऊञ इतौ वेत्यादि। विकल्पा
ननुस्वारो निपात एकेत्येव सिद्धेरिदं व्यर्थमेव स्यादेवं च प्रास विभाषेयं ऊँ इत्यत्र शाकल्यप्रगृह्यपदयोः संबंधे ऊत इत्यर्था
धिकाराद्प्रगृह्यस्यैवादेशो तस्यैकोयणिति ऊ इतीत्यस्यासिद्धिः दीर्घोच्चारणे वैयर्थ्यापत्तिश्च विकल्पमात्रसंबंधे पि ऊ इती
त्यस्यासिद्धिरिति विधानसामर्थ्यात् प्रगृह्यपदसंबंधप्रगृह्यपदमात्रसंबंधो यधिकार प्रगृह्यस्य नित्ये ऊ अपादेशो ऊँ इती
ति प्रगृह्यस्य ऊ इतीति सिद्धे पि वितीति न सिध्येत् तदाह ऊञ इतौ दीर्घो ऽनुनेत्यादि। अत्र विशिष्टस्य विधिरिति न वाक्यभे
दः न च प्रगृह्यत्वमादेशश्च शाकल्यमते इति तयोरेकप्रयोग एव प्रवृत्तिः स्यादिति वाच्यं योगविभागसामर्थ्येन
शाकल्यमते एव भावाभावकल्पनात् वस्तुत ऊञनुवादेन संज्ञादेशयोः सहविधानमेव न्याय्यमादेशोस्यानिवद्भावात् प्रगृह्यका
र्यं भाष्ये प्रगृह्यसंज्ञकश्चेत्यपि स्थानिवद्भावलभ्यार्थस्वरूपकथनमिति न्यायविदो विचारयन्तु। मय उञो। व्याख्यानात्त्रमय
प्लुत त्र्याहारः अस्यत्रैपादिकत्वेनासिद्धत्वान्न प्रगृह्याइत्यनेन बाधः। नानुस्वार इति किं वियादौ प्रगृह्यसंज्ञाभावे ऽस्यासिद्ध
त्वादिकोयणचि तियणि अनुस्वारो भवत्येव। ननु य शिष्यते स लुप्यमानार्थाभिधायीतिन्यायेन गौरीशब्दस्य सप्तम्य
र्थवृत्तित्वे पि कारस्य तत्त्वाभावो त आह। ईदूदं तमिति। शब्दस्वरूपस्य विशेष्यत्वात्तदंतविधिरिति भावः। मामकी तनू इति प्र
गृह्यो वितिशब्दप्रयोगस्य पदकारे नियमितत्वात्पदपाठे प्रगृह्यफलमंत्र बोध्यं। ईदूतौ किं। अग्न्याभवंति सत्सम्याडादेशः
तपरत्वमसंदेहाय। सप्तमीति किं धीती मती। कृस्वांताभ्यां तृतीयैकवचनस्य पूर्वसवर्णे सवर्णदीर्घः अर्थग्रहणं किमिति।

न चैतदभाविईदूदेदितिवदीदूदंततयास्सप्तमीत्यर्थापत्तिः तथा च पपीत्यादावेव स्यात् एकादेशस्य पराद्विवद्भावेन सप्तमीत्वान्न
तु गौरीत्यादावितितत्सिध्यर्थं तदावश्यकमिति वाच्यम् । ईदूतौ सप्तमीत्यग्रहणं अदसः ए च द्विवचनमित्येव सिद्धे गुरुभूतन्यासक
रणेन तत्प्रकरणोपस्थित्या वैजात्यबोधनादूकारांशे संभवाच्च संज्ञाविधावितितदंतग्रहणनिषेधप्रवृत्त्या ईदूदंतं सप्तम्यंतमित्यर्थे
नेष्टसिद्धिरिति प्रश्नः । ययीत्यादेरनभिधानमेवेति परे । वस्तुतो वितिअर्थग्रहणसामर्थ्यात्सप्तम्यर्थमात्रे पर्यवसन्नमित्यर्थेना
त्र तत्संस्पर्शणधेयार्थे पि तच्चेर्नदोषः । संज्ञायामिति समासे जहत्स्वार्थायां वृत्तौ पूर्वपदस्यानर्थकत्वे पि सुपेति समासेऽप्यज
हत्स्वार्थायां प्रसक्तदोषस्योक्तरीत्यैव वारणमिति भावः । गौरी अधिश्रितद्दत्यत्र अधिश्रयणक्रियायामेव गौरीपदबोध्या
धिकरणत्वान्वय इति गौर्य्यधिकरणकेलक्षणायां मानाभावद्दति न तत्र दोषः । वाप्यामश्व इति । सुप्सुपेति समासः संज्ञा
यामिति वा । ननु संज्ञायामिति समासे वाक्येन संज्ञानवगमान्नित्यसमासत्वेन विग्रहो न युक्त इति चेन्न तेषु समाससमाना
र्थकवाक्याभावेन नित्यसमासत्वे पि नित्यसमासत्वाभावात् । विभाषाधिकारबाधे मानाभावात् । नित्यसमासे हि वृ
त्तिघटकपदानां पृथक्प्रयोगाभाव एवात्र तु पृथक्प्रयोगे पि तद्बोध्यविशिष्टार्थाप्रतीतिमात्रमित्याहुः । अत्तोऽत्र । प्रणद
ति किं कर्त्तुं प्रत्राणपूर्वं त्वेव व्याख्यानात् आगच्छत्तम सगीत्यादौ प्लुतस्यासिद्धत्वात्ततः प्रागेव यथोद्देशत्वात् जाते प्रग्रहत्वे प
श्चात्प्लुतेत्तस्यापि अनुनासिकप्रतिबंधार्थं पुनः संज्ञेति नानुनासिकः संज्ञायाः कार्य्यार्थित्वात्पुनः प्रवृत्तौ कार्यमेव बीजं
स्यानिवत्वं तु न प्लुतस्यासवृत्तिधर्मत्वेनालविधित्वात् पूर्वसवर्णे कृते द्विवचनत्वं तु परादिवद्भावेन तेन ताद्रूप्यानतिदेशेऽपि तद्धर्म्मा
तिदेशांगीकारात् अत एव रामाविद्यादौ पराद्विवद्भावेन सुप्तत्वं पदत्वं साधितमंतादिवत्सूत्रे भाष्ये इति स्पष्टं शेखरे । अचसंधिरिति ॥

सिद्धमनत्वादिति वार्त्तिकप्रयोगेन अस्याचूतरमितिसोत्र प्रयोगेन कथमनत्वमिति भाष्यप्रयोगेन चवत्तिपरकाच्प
दे पदांतकार्य्यस्य तत्सन्निधानेनश्चुत्वस्य चाभावो बोध्यत्ते इति केचित्॥ इति स्वरसंधिः॥ स्तोश्चु॥ सिति शितिच
लुप्तविभक्तिके भिन्नेपदे योग इति संयोग इति तदर्थः। तेन चितमित्यादौ न दोषः। अत्र पदस्येत्यधिकृतमपि न संबध्य
ते। शादिति ज्ञापकात्। तेन ज्यासिध्यति शात्परस्य तो श्चुत्वनिषेधकात् शादिति लिंगादेव निमित्तकार्य्यिणोर्यथासंख्यं
नएवं उत्तरसूत्रेपि तोः षीति ज्ञापकात्तत्। शकारवर्गौ स्तइति। यथासंख्यमिति प्रोषः॥ हरिश्शेतइति। वाशरीति। वि
सर्गाभावे शः। सच्चिदिति। चुत्वस्यासिद्धत्वाज्जश्त्वेन दत्वे तस्य चुत्वेन जकारे चर्त्वमिति बोध्यं। तयोरत्रालेखस्तु वैचि
त्र्यार्थः। विश्न इति। यजयाचयतविछप्रछरक्षोनङ् इति नङ् छ्वोरिति शादेशो ङित्वाद्गुणाभावः। प्रश्नेचासन्नका
ल इति निर्देशात् संप्रसारणाभावः॥ नपदांता॥ पदादेरित्येवसिद्धेन्त ग्रहणं स्पष्टार्थं। टेः किमिति। षकारस्यापि
पदांते जश्त्वविधानात्प्रश्नः। कृत्वात्ताद्दवितिषत्वस्यासिद्धत्वाज्जश्त्वाभाव इत्युत्तरं। षण्णवतिरिति। षडधिका
नवतिरिति विग्रहः। षण्णगर्य्य इति षष्थकपदे। यरोनु। पदांतस्येति किं वेद्मि। वध्नाति। स्पर्शे चरितार्थ इति।
उपलक्षणमिदं वलयोरपिप्रवृत्तेः एतच्च जातिपक्षे स्पष्टमेव व्यक्तिपक्षेपि तादृशव्यक्तौ चरितार्थस्य एव प्रवृत्ति वि
षयतयोपप्लव एवनेति बोध्यं स्पष्टं चेदमिकोयणचीत्यत्र कैयटे। परत्वस्यानेन्तरतमसूत्रेस्त सम्यन्तपाणस्य
भाष्यकृता दूषितत्वेनैतत्सूक्तेः कृतिसंभव एव न। तस्मादनुस्वारस्येति सूत्रात्सवर्णग्रहणमकृष्य परसवर्णोनु
नासिको भवतीत्यर्थान्नदोषः तदुक्तं भाष्ये रेफेनुनासिकपरसवर्णत्वयोः प्रतिषेधे वक्तव्यो न वक्तव्यो रेफोष्म

णांसवर्णान संतीति। चिन्मयमिति। स्वार्थिकस्त्वत्र कृत्तवचनेद इति मयट् तचत दितिवाक्य भेदेन क्वचित्प्राचुर्य्य रूपप्रकृतवचना
भावेपि मयड्यर्थमत एवचिन्मयं ब्रह्मेति सामानाधिकरण्यम्। चिन्मात्रमिति क्वाचित्कोपपाठः मात्रचः प्रत्ययस्यात्रोप
पत्त्यभावात्मयूरव्यंसकादित्वेवार्थमात्रशब्देनात्र समासस्य वक्ष्यमाणत्वात्। निपातनादिति। यवादिगणे ककुद्मा
निति प्रकृतिप्रत्ययसमुदायः पठ्यत इति मतेनेदं। उदःस्था। तस्मादित्युत्तरस्येति परिभाषालभ्यमर्थमाह। उदः पर
योरिति। अत्राघोषस्येति। समनियतत्वेनान्यतमाग्रहणेबाधकाभावेन श्वास विवारयोस्त्यागेपि न्यूनत्तेति बोध्यं।
पस्यासिद्धत्वादिति। त्रिपाद्यांपरत्वादिति भावः। हलोयमामिति सूत्रोक्त भाष्यसंमताष्टाध्यायी पाठे स्यासिद्धत्वाभावेन **४६**
चर्त्वभवत्येवात एवोत्पूर्वस्कन्दे रोगे उपसंख्यानं उक्तं गदोरोग इति भाष्ये संगच्छते मूलं तु प्राचामनुरोधेनेति परेनचे
दं सूत्रं व्यर्थं झलोझलीत्यनेन सस्य लोपे उत्थानस्य सिद्धेरिति वाच्यं झलादौ प्रत्यये तेन लोप इत्यर्थ स्यानेन ज्ञापना
त्। उदः स्थादित्यत्रतु निर्दिश्यमानपरिभाषया निर्दिश्यमानादेरेवस्थानिवत्वान्न दोषः। झयइति पंचमीत्याह। झयः
परस्येति। पूर्वस्येत्यनुवर्त्तते। घोषवत इति। समनियतत्वेपि विनिगमनाविरहात्स्वरूपप्रतिपादनाय त्रितयग्रहणं।
झयइति। पदांतादित्यपि बोध्यं। तेन विरूपश्यमित्यादौ छत्वं न। जकारे कृत इति। छत्वमिति शेषः। पूर्वोक्त भाष्यसंमताष्ट
ध्यायी पाठे चर्त्वस्य छत्वं प्रत्यसिद्धत्वात्। मोनु। पदस्येत्यधिकृतमइत्यनेन विशेष्यत इत्याह। मांतस्येति। हलि सर्वेषा
मित्यतो हलीत्यनुवर्त्तते। हलि किं रामम्मात्राय। नश्चा चेन मो नुरुष्यते। अपदांतस्य किं राजन्यादि। यशांसीति। अनु
स्वारस्य। परेति लुसषरीं कंपठ्यकपदं अपतएवोदः स्थेत्यादौ सवर्णग्रहणानुवृत्तिर्यरोनुनासिकेत्यत्रतदपकर्ष

यश इतिशब्दे जसः शि नपुंसकस्येति नुमि सांतेति दीर्घः। आक्रंस्यत इति। क्रमेर्ल्टृ आङ् उद्गमन इति तङ्। स्य॥ २॥

श्चासिद्धः। ययीति। स्पष्टार्थं दंशान मीत्यादौ तु न दोषः शकारस्य वर्णग्रसिद्धेः प्रयत्नभेदेनाऽसोः सावर्ण्याभावात्। अपि च अ
नुस्वाराभावात्। मोराजि। निति सिद्धे मद्ग्रहणं किमिति इत्युक्तविषये प्रशाम मलयती त्यादौ मा नो धातोरिति नत्व बाधनार्थं निषेधस्य
नंतरत्वादनुस्वारस्यैव स्यात्। ध्वनित्वं चेदमेतदेन सोम शि इति सूत्रत्रये भाष्ये। हि मपरे। मपर इति बहुव्रीहिः मोनुस्वार इत्यतो म इ
त्यनुवर्त्तते। यथासंख्य। सम्यक् ख्यानं संख्या। क्रमवैशिष्ट्ये न ज्ञानं यत्सां ख्येः प्राप्यते स्थानमित्यत्र संख्या शब्दस्य ज्ञानार्थतया
दृष्टत्वात्। तामनतिक्रम्य यथासंख्यं अनुदेशः पश्चादुच्चवाक्यार्थबोधकालिकः संबंधः साम्यं संख्यया योग्यत्वाद्याख्याना
च्च एवं च समसंख्यानां संबंधो येन क्रमेण पदज्ञानं पदादुपस्थितिर्वर्तिनैव क्रमेण वाक्यार्थबोधविषयः संबंधस्तेषामित्य
र्थः फलितमाह। समसंबंधीति। यद्यपि स्थानाख्यलौकिकप्रमाणादेव सिद्धं तथापि परस्मैपदानामच्चोपवाया वद्दृत्यादौ
शब्दतः सूत्रांतरस्य क्रममादाय संबंधबोधनार्थमाद्यं तौरकिता वित्यादौ समासनिर्देशोत्साहित्येद्वंद्व विधानारम्भा
सक्रमान्वयबोधनार्थं चेदं एवं च तत्र यथासंख्येनान्वयबोध कवाक्य कल्पनैतत्प्रामाण्यात्तत्श्च बोध इति बोध्यं। अत्र
स्वरितेनेत्यपकृष्यत इति व्यस्त्यादित्यादौ नातिप्रसंगः तत्र प्रतिपत्तिकालिकमेव संख्यासाम्यं तत्र्व्याख्यात्वदुपयोगीति
मङ्णनमिति सूत्रे भाष्ये स्पष्टं एते यवला निरनुनासिका एव विधीयमानत्वेन सवर्णग्राहकत्वात्। जातिग्रहणे प्राप्तस्ये
वगुणभेदकत्व प्राप्तस्यापि अप्रत्यय इत्यनेन निषेधाच्च एवं मयउ ञ इत्यत्रापि। अत एव मतो र्मस्य नानुनासिको वका
रः अन्यथा तद्दानामित्यादौ नित्यानुनासिकापत्त्या तन्निर्देशासंगत्यापत्तिरित्याहुः। वयो द्वितीया इति। नाशीन्या
कोशा इत्यत्र भाष्ये इदं एतत्सामर्थ्यादितत्कृतद्वितीयस्य न चर्त्वं उष्मोत्स्यं प्रथमं स्पर्शमिके द्वितीयमाहुरपदांतभाजमि

तिचर्त्वासिद्धत्वलब्धार्थानुवादः पदांते जश्त्वप्रवृत्त्या चर्त्वं विना चयोरुन्यसभात्। अत्र तु कृतेन जश्त्व प्राप्तिरस्यासिद्धत्वात्।
अपकूसरावपूस इति भाष्योदाहरणे छांदसत्वात् चर्त्वस्यासिद्धत्वं न एवं च प्रातिशाख्ये ऽपदांतभाजमित्युत्सर्गः। यद्वा।
तयोरव्युत्प न्नत्वं न त्वपूर्वात्। सर्त्तेर सिर्वदेः सोवेत्यन्यत्र सिक्तरः॥ ङःसि॥ सीतिसप्तमी षष्ठ्यर्थे व्याख्यानात्। तदाह
सस्येति। पदस्येत्यनुवर्त्तमानस्य वैयधिकरण्येनान्वयात् पदावयवस्य सस्येत्यर्थः। पदूसंत इति। धुरिधस्य च
र्त्वलद्वयभेदात् पुनर्ड स्य चर्त्वं। नश्च। नकारांतादिति। पदस्येत्यनुवृत्तं पंचम्या विपरिणम्यत इति भावः वैयधिक
रण्येनैवान्वय इति ङमुट्सूत्रस्य भाष्यस्वरसः नस्य पदांतस्येति अपदांतनकारे ऽनुस्वारप्रवृत्त्या फलितार्थप्रद
र्शनमिदं नांतस्य पदस्येत्युचितम्। चतुष्टयमिति। वक्ष्यमाणविकल्पैरिति भावः तेन तु कृष्णुत्वे छत्वस्यासिद्धत्वा
च्चयो द्वितीया इति पक्षे चस्य छत्वेन च छ कार छकार छकार शकार घटित रूपद्वयाधिक्ये न छशानुस्वार वि
सर्गाणां द्वित्व विकल्पेनाधिक्येपि न क्षतिः। ङमो। पदस्येत्यनुवृत्तं सामानाधिकरण्यानुरोधात् पंचम्या विपरिण
म्यत इत्याह। पदं तं यत्पदं तस्मादिति। तत्र ङमस्त्वयं ह्रस्वादिति विशेषणसंबंधमनुभूय पदविशेषणत्वेन त
दंतपर इति भावः। ङम इति पंचमी बलादचीति सप्तमी षष्ठ्यर्थे तदाह। अचइति। सप्तमी निर्देशस्तु लाघवा
र्थः। ङमउत्तरस्याच इति तस्मिन्निति सूत्रस्य भाष्यात्। ङमंतयत्पदमिति किं अनितीत्यादौ ङमुण्मा भूदिति।
भाष्ये तु विभक्ति व्यत्यय कल्पने गौरवात् पदावयव ङमः परस्येति। वैयधिकरण्यमेवोक्तं दंडिनेत्यत्र ङमुड
भावो मंडूकप्लुत्या ऽङिचि पद इत्यतः पद इत्यनुवर्त्याजादेः पदस्य ङमुडित्यर्थेन बोध्यः पदस्येत्यस्या

रुत्यासंबंधेपिविशेषणविशेष्ययोरुभयोः समस्यंतत्वएवतद्वादिविधिप्रवृत्त्यातदलाभः स्यात् इत्यर्थः। एतदर्थमेवाचीति सप्तमीनिर्देशः। ङमंतंयत्पदमित्यर्थेपिपरमपदमिति नेत्याद्वावेतद्धारणाय पदइत्यनुवृत्तिरावश्यकी चांतर्वर्त्तिविभक्त्याद्यं एङि नित्यस्यफलत्वात्। उत्तरपदत्वेचेतिप्रत्ययलक्षणनिषेधस्तुन। माषकुंभवापेनेत्यादौपदव्यवायेपीति निषेधसिद्ध्यै तस्यचोत्तरपदस्यकार्यित्वंतत्रैवप्रवृत्तेः तेननिषेधेनसिद्धमित्येतत्सूत्रस्यभाष्योक्तिः त्वेकदेशिनइतिदिक्। इकोयणचीतिसौत्रोनिर्देशः। रुप्रकरणइति। अतएवसमःसुटीत्यादौप्रश्लेषेणसविधानमितिभाष्येउक्तं। रोःपूर्वस्येत्युपलक्षणमरुप्रकरणविधेयस्य। एवमुत्तरत्र रोःपूर्वस्मादित्यपि। अयमधिकारःतेनोत्तरसूत्रविषयएवास्यप्रवृत्तिः नतुमतुवसोरित्यत्रतत्सूत्रस्यवार्त्तिकयोश्च। अत्रेतितु रुप्रकरणएवास्यसंबंधोनत्वग्रेठठेलोपइत्यादावित्यर्थसूचनार्थंस्पष्टार्थमेवकुशब्दः परस्यनित्यंरुत्वंपूर्वस्यवानुनासिकइति विशेषद्योतनार्थः पूर्वस्येत्यस्यचरुस्थानिनः पूर्वस्येत्यर्थोबोध्यः अनुनासिकात्परइत्यत्रानुनासिकादितिल्यपलोपेपंचमीव्याख्यानात्। अयमागमोनवयवावयवत्वेमानाभावात्। खरीति। विसर्गाद्विसस्याप्यवसानस्यनसंबंधोव्याख्यानात्। सोवक्तव्यइति। समःसुटीत्यादिसूत्रत्रयेसइत्युपसंख्यायसमःसुटीत्यत्रसकारंप्रश्लिष्यवैतैः सकारएवविधेयइत्यर्थः एवंचास्यासिद्धत्वादुत्वाभावेनविसर्गाभावेतत्तद्विधीनामप्राप्तिरेवेतिभावः स्पष्टंचेदंभाष्येविसर्गस्थानेनसत्वविधानेतुगोवरंस्कुटम्। लोपस्यापीति। यत्तुउपधारंजनंकुर्यान्नलोपकरणेसतिलोपेप्रकृतिभावेवानोपधारंजनमतउपधारंजनमनुनासिकानुस्वारागमरूपंनमोनकारमकारयोः प्रकृतिभावोदाहरणांन्तन्याहीलितत्तुप्रातिशाख्यव्याख्यामात्रविषयमितिभावः। अतएवभाष्येसमादिषुसत्वंवक्त ४३

यमित्युक्तं लुप्तपक्षेचानुनासिकाद्यापत्तिर्द्वित्वेननोक्ता ननुलोपपक्षे एवद्वित्वेनद्विसकारस्यसिद्धत्वात्समःसुटीतिव्यर्थंइत्यतआहत्रिसकारकमपीति। स्कोरितिलोपस्तुनास्याऽसिद्धत्वात् पुनर्द्वित्वेनत्रिसकारस्यासिद्धिरितितुनयुक्तं सकृद्गतौलक्षणस्येतिन्यायात्। एतेनसमःसुटीत्यत्रवेतिपाठेनैवपक्षेमोनुस्वारलोवासिद्धेन्नुनासिकात्परइतिव्यर्थमित्यपास्तं।
ननुव्यंजनात्परस्यैकस्यानेकस्यवोच्चारणेविशेषाभावोत आह। अनुनासिकवतामिति। तत्रोच्चारणेविशेषाभावकथनेइदंवचनंव्यर्थमेवस्यादितिभावः हयवरट्सूत्रभाष्योक्तेशर्षूपसंख्यानेफलमाह। अस्वारवतामिति। अपिनाकृस्यसंग्रहः। लक्ष्येलक्षणस्यसकृदेवप्रवृत्तेराह। वचनांतरेणेति। यणोमयइत्यनेनएकस्यैवशास्त्रस्यपुनःप्रवृत्तेर्हिसन्यायइतिभावः पूर्वत्रासिद्धत्वेनपूर्वद्वित्वस्यपूर्वप्रवृत्त्यातेनद्वितीयस्यसाधुत्वेबोधितेतदनंतरंपरद्वित्वप्रवृत्त्यातयोर्मध्येपुनरन्यस्यसाधुत्वंबोध्यतइतित्रित्वस्यनिर्वाहोबोध्यः। अनचिचेत्यत्रयोणोमयइत्यस्योपसंख्यानाद्वचोरहाभ्यामित्यत्रतस्यपरत्वंबोध्यं। पुमःखि। अम्परइतिबहुव्रीहिः। कुःपयोरितिकुप्वोरितिसूत्रेविधेययोरित्यर्थः। इदुदुपधस्येतिसूत्रेऽप्रत्ययस्येत्यस्यप्रत्ययावयवभिन्नस्येत्यर्थादितिभावः। अव्युत्पत्तीति। नपक्षेप्रकृतिप्रत्ययविभागाभावादितिभावः। पत्वेति। इदमनुनासिकपक्षे अनुस्वारपक्षेतुकुप्वोरित्यस्यैवप्राप्तिः अनुस्वारव्यवधानेनोपधत्वाभावात्। पुंस्कीरमिति। कृधातोरुपधायाईत्वेऽप्रत्ययेकीरमितिभावः। नश्छवि। अप्रशानिति। षष्ठ्यर्थेप्रथमा। नन्ये। न्टनितिद्वितीयायांतानुकरणंषष्ठ्याःसौत्रोलुक्। नलोपस्तुसौत्रत्वान्न। एवंकानित्यत्रापि। चाद्विसर्गइति। शर्परइतिसूत्राच्चदनुकर्षश्चनेतिभावः। येननेति। येननाप्राप्तेयोविधिरारभ्यतेसतस्यबाधकइतिन्यायेनेत्यर्थः। येननेत्यादेर्यत्कर्त्तृकावश्यप्राप्तावित्यर्थः नञ्द्वयस्यप्रकृतार्थदार्ढ्यबोधकत्वात्। प्राप्तेइति। भावेक्तस्तत्प्राप्तियोग्यविषयेऽचारितार्थ्यंहिबा

धकत्वेबीजंतस्तुत्तंशर्पूर्वाइतिसूत्रेभाष्येशर्पूर्वाइत्येतद्धलादिःशेषस्यबाधकंतच्चविषयभेदेकथंबाधकत्वं।इदंतावदयंप्रष्ट
व्यः यदितन्त्रोच्येतकिमिहस्यात् हलादिःशेषश्चेन्नाप्राप्तेतस्मिन्नारंभादिदंतद्बाधकंभविष्यतीति अजादेर्द्वितीय
स्येतिसूत्रेभाष्येपिस्फुटमेतत्।नकुप्शर्परइति।नचास्यविसर्गस्य≍क≍पोःद्वारिति किंचास्यैवतोस्यात्खरवसा
नयोरितिविहितस्यतुएतयोरसिद्धत्वात्सत्वमेवस्यादितिवाच्यं।शर्परइतिसूत्रंकुर्वोरित्यत्रानुवर्त्यशर्परयोः
र्वो≍क≍प्योरपवादोविसर्गस्यविसर्गइतिवाक्यभेदेनव्याख्यानेनादोषात्स्पष्टंचेदंभाष्ये।वार्त्तिककारेणयण
णंशक्यमकर्तुमित्याहायद्वेति।एवंसम्प्रग्रहणमपित्यक्तुंशक्यंपुम्प्रग्रहणंत्वावश्यकमेवानुनासिकपक्षेइणःपर
त्वेनषत्वापत्तेः।एध्विश्वाइति।गणेष्कृतसत्वषत्वानामेवपागादितिभावः।कःप्ययोरपवादइति।तद्विहितविसर्गस्यापीत्य
पिबोध्यं।कांस्कानिति।वीप्सायांद्वित्वं।संहितायां।संहिताचस्वारसिकार्द्धमात्राकालव्यवायेनोच्चारणं।ततोधिकार्द्धमा
त्राकालेनोच्चारणेएतदधिकारोक्तकार्य्यव्यावृत्तयेइदंतदधिककालव्यवायेतुनसाधुत्वंनापिबोधइष्यतेइतितेषांशा
स्त्रविषयत्वेवनेतिभावः।छेच।छेइत्यकारउच्चारणार्थस्तेनाच्छिन्नमित्यत्रतुक्ह्रस्वस्यपितीत्यतोह्रस्वस्येतितुग
तिचवर्त्तते।जश्चेनेति।स्वशब्देउपपदेछ…तेःकेस्वच्छशब्दोनिर्मलेरूढःएवंचपूर्वोच्छादयतेर्डेऽपच्छाशब्द
इतिपदांतत्वंबोध्यंस्पष्टंचेदममरटिप्पणे।आङ्माङोः।आङ्साहचर्य्यात्माङ्व्ययमेव।दीर्घस्यायमिति।वक्ष्यमाणज्ञापका
द्व्याख्यानाद्वा।दीर्घादिति।षष्ठ्यर्थेपंचमीतिभावः।एङोप्लुतेसूत्रभाष्येध्वनितमेतत्।चेच्छिद्यतेइति।कुकोहलादिः
शेषस्तुनाभ्याससंज्ञाप्रवृत्तिकालेस्यात्निद्वारासाद्राद्वासंहितायांहलामेवतेननिवृत्तेःअतएवकुगतइत्यादिच

रितार्थं।दीर्घात्पदांतादिति।पदांतस्यदीर्घस्येत्यर्थः।योगविभागोनयोरे ओङितिसूत्रेभाष्येस्पष्टः।दीर्घात्तस्यपरस्येत्यर्थेनसिद्धे
उपत्तग्रहणंपदान्तविधित्वमस्यनपदत्वविधित्वमितिबोधनद्वारासमर्थपरिभाषानुपस्थित्यर्थं।तेनासामर्थ्येप्यस्यप्रवृत्तिरि
तिसमर्थसूत्रेकैयटः।। इतिहल्संधिः।। विसर्जनीयस्य।प्राग्व्याख्यातमपिविसर्जनीयपदानुवृत्तिप्रदर्शनायसमा
दितं।शर्प्परइति।बहुव्रीहिः।विशेष्यंचावध्यवधिमतोःसाजात्याद्विसर्जनीयाद्धितःखरेवविसर्गस्यविसर्गविधौपलमा
हान्तत्वन्यादिति।अन्यदेवविवरणेति।इहेति।त्रैरूप्यमिति।विकल्पद्वयसामर्थ्यादितिभावः।सोपा।अपपदाद्योरितिसूत्रेसो
त्वादेकवचनं।अनव्ययस्येति।अत्राव्ययीभावातिरिक्ताव्ययस्यैवग्रहणंव्याख्यानात्।तेनोपपस्काम्यतीत्यादौसत्वसिद्धि
रितिस्पष्टमव्ययीभावश्चेत्यत्रभाष्ये।गीःकाम्यतीति।वाःकाम्यतीत्यस्याप्युपलक्षणमिदं।इणःषः।इदुदुपधस्येत्यस्यासिद्धा
त्सर्पिष्यापरामित्यादौसत्वनिवृत्त्यर्थंजीप्याशंदोक्तस्यमित्याद्यर्थंचेदं।अनव्ययस्येत्यपदादावितिकाम्येइतिचसंबध्यते।ते
नोच्चैःकल्पंदोःपस्यगीःकाम्यतीत्यादौषत्वंन।अतएवात्रप्रकरणेसर्वत्रसत्वमेवविधेयमिणउत्तरस्यविसर्गस्यानि
कस्यानेनषत्वमितिभाष्योक्तपक्षांतरंसंगच्छतेविसर्जनीयस्यानिकेत्युक्त्यापुंस्यु नेइत्यादौनदोषः।तत्रहिमस्या
निकसःअच्चविसर्जनीयस्येत्यनुवृत्त्यैतदर्थलाभः।अनव्ययस्येत्यादिचाचपक्षे नसंबध्यतेतेनद्विष्कृतंदुष्कृतं
दुष्काम्यतीत्यादौषत्वसिद्धिः।गीःकाम्यतीत्यादौसकाराभावादेवनदोषःअपदादावितिचनसंबध्यतेतेनदुष्करोतीति
षत्वसिद्धिः।परत्वंपक्षेप्यसंगतःउत्तरसत्वस्यासिद्धत्वेननिष्कृतमित्यादौषत्वासिद्धेः।प्रकरणेप्रकरणमसिद्धंन
योगेयोगइतिपक्षस्तुनास्त्येवज्ञापकासंभवादित्युपसर्गादसमासेपीत्यत्रनिरूपयिष्यामः।विसर्जनीय

स्यैव षत्वमिति मूलोक्तं पदे तु सकारषकारयोः स्वरितत्वेपि यथायोगं संबंधो नेदृक्कश्रुत्येत्यन्यत्र विस्तरः। न नम्पु। इत उत्तरमपदा
दाविति न संबध्यते व्याख्यानात्। साद्दात्प्रभृतिस्वादिति। उर्यादित्वाकृतित्वं स्वरादिपठितस्य तु गतित्वाभावस्तेन साद्दात्प्रभृति
षु च्यर्थविचनेपि न द्भतिरित्यन्ये। इदुदु। अप्रत्ययस्येति पर्युदासो लाघवात् तत्र प्रत्ययपदं तत्संबंधिपरं तेन प्रत्ययसंबंधि
भिन्नस्येत्यर्थोऽत एव कविभिः कृतामित्यादौ न षत्वं स्पष्टं चेदं भाष्ये इत्यन्यत्र विस्तरः। एकादेशशास्त्रेति। एकादेशशास्त्रस
स्यन्नरेफस्यानिकत्वेन विसर्जनीयस्यैकादेशशास्त्रनिमित्तकत्वं बोध्यं स्पष्टं चेदमत्र सूत्रे उरण्रपर इति सूत्रे भाष्ये इत्य
न्यत्र विस्तरः। प्रत्ययभिन्नसंबंधिन इति कुनार्थः अग्निकरोतीत्यादावपि प्रत्ययभिन्नसमुदायसंबंधित्वेन षत्वापत्तेः।।
तपरकरणं किं। गीः करोति। उपधाग्रहणं व्यर्थं उपधाग्रहणं न करिष्यते इदुद्भ्यां तु परं विसर्जनीयं विशेषयिष्याम इति रुयव
रट्सूत्रभाष्योक्तेः। तिरसोन्य। अत्र गतिग्रहणं नानुवर्त्तते परा भवेति रस्कारशब्दप्रयोगात् अन्तर्द्धौ वितिरसो गतित्वात्।
द्विस्त्रिकृत्वोर्थ इति। न विसर्गविशेषणं च तुःशब्देऽसंभवात्। किंतु द्विरादीनामित्याह। वर्त्तमानानामेषामिति। इसुसोरि
त्तिसूत्रवक्ष्यमाणरीत्या सुच इति सूत्रयितुमुचितं सुजंतांतस्य पदस्येत्यर्थात्। चतुष्कपाल इति। इदुदुपधस्येति नित्यं
षः चतुःशब्दोऽव्युत्पन्न इति अप्रत्ययस्येति पर्युदासेन अत एव चतुष्पाद्भ्यो ढञित्यादिनिर्देशाः संगच्छंते चतुष्पंचाश
रित्यत्रापि षत्वं भवत्येव न चेदुपधस्य सस्य योर्विसर्ग इति हयवरट्सूत्रभाष्योक्तेः कथमत्र षत्वमिति वाच्यं विसर्गस्य पाठाभावेनोपधा
त्वासंभवात्तस्यानिनिमित्तमुपधात्वं ग्राह्यमिति भाष्यतात्पर्यात्। अत एव समः सुटीति सूत्रभाष्ये संपुंकानामित्यनेन रुविधे
वास्त्वित्याशंक्य पुंस्कामेत्यत्र षत्वापादनं संगच्छते। न च कृत्वोर्थ इत्येव कृत्वोर्थे विद्यमानस्य पदस्येदुपधस्य योर्विसर्ग इत्य

र्थान्न पंचकृत्वः करोतीत्यादौ दोषो नापि चतुष्करोतीत्यादावव्याप्तिरिति द्विस्त्रिश्चतुरिति त्र्यर्थमिति वाच्यं कृत्वोर्थ इत्यस्यासिद्ध
त्वेन चतुःशब्दे इदुदुपधस्येति नित्यषत्वापत्तेः प्रकरणे प्रकरणमसिद्धमिति पक्षस्तु उपसर्गादसमासेपीति सूत्रे कैयटे पूर्व
पदादिति सूत्रे भाष्ये च दूषित एव उपसर्गादिति सूत्रे चोपपादयिष्यते किंच पूर्वत्रेति पूर्वशब्देन प्रकरणग्रहणेऽव्यवहित
प्रकरण एव त्रिपाद्यसिद्धत्वं स्यान्न संपूर्णसपादाध्याय्यां। किंचास्याधिकारत्वात्प्रतिसूत्रमुपस्थित्या प्रतियोगमसि
द्धत्वं दुर्वारमित्यन्यत्र विस्तरः। इसुसोः। अत्र सुसोः प्रातिपदिकावयवयोर्ग्रहणं तेन पेचुः कर्षैः सख्युः पाकः कविभिः
कृतमित्यादौ न षत्वं नित्यसमासे इति सूत्रोदाहरणे समासविषये तयोरेव संभवेनार्थाधिकारानुरोधात्साहचर्याच्च
च इसुसंतपदावयवविसर्गस्येत्यर्थः पदस्येत्यधिकारात्। न च प्रत्ययग्रहणपरिभाषया परमसर्पिष्करोतीत्यादौ
षत्वानापत्तिरवयवस्येसुसंतत्वेपि उत्तरपदत्वे चेति निषेधेन रपदत्वादिति वाच्यं अनुत्तरपदस्थस्येति निषेधेन कचि
हुपा[illegible]त्त विशेष्यसत्वेपि शब्दरूपविशेष्यमादाय तदंतविधिज्ञापनेन शब्दरूपविशेष्यमादाय प्रत्ययग्रहणपरि
भाषयालब्धतदंतार्थकस्य पदविशेषणतये सुसन्तात्तस्येत्यर्थेनादोषात्। अत एव वनोन्चेत्यादौ न दोषः शास्त्र
णस्य सर्पिष्करोतीत्यादौ सापेक्षत्वेनासामर्थ्ये नाशंक्यं तस्यैकार्थीभावसामर्थ्यविषय[illegible]त्वात्। अधात्वभिहितं समानाधिकरणमस
र्थवदित्युक्तेः सर्पिः कालकमित्यादौ न षत्वं अधात्वभिहितमित्युक्तेः सर्पिष्षीयत इत्यत्र षत्वसिद्धिः धातुसहचरितप्रत्ययाभिहिता
र्थेन समानानधिकरणमसमर्थवन्नेति तदर्थः यदा तु सर्पिरादिकं व्युत्पन्नं प्रातिपदिकं पाणिनिरुणादिष्वव्युत्पत्तिपक्ष इति न्यायेन
यीनीति सूत्रे भाष्ये स्पष्टमुक्तेः। तत्र हि शंखद्वयासवादेशानाशं कोणादीनां प्रतिषेधो वक्तव्यः। प्रातिपदिकविज्ञानाच्च भगवतः

पाणिनेः सिद्धमित्युक्तं। अयामंताल्वाय्येत्विष्णुच्छिति सूत्रं व्याकरणांतरीत्यैव सर्वनामस्थाननिति महासंज्ञावत्। अत एव भा
ष्ये उणादयोऽव्युत्पन्नानीत्युक्तं। नलुनेकार्यो अपि धातवद्वृत्तिवद् व्युत्पन्नान्यपीत्युक्तं तदा इदुदुपधस्येति नित्ये षत्वे प्राप्ते अने
न विकल्प इति प्रत्ययग्रहणात्परिभाषानुपस्थितेः परमसर्पिष्करोतीत्यादौ षत्वविकल्पः सिद्धः। नित्यं समासे इति सूत्रम
नुत्तरपदस्थस्येति प्रतिषेधार्थं। नित्यग्रहणं तु न कर्तव्यमेव। समासे नित्यषत्वस्येदुदुपधस्येत्येव सिद्धिः। सर्पिष्पेत्यादौ
षत्वं [illegible] अपसे कचिदन्यदेवेत्यर्थकात् बहुलग्रहणात् इति स्पष्टं भाष्ये। व्यपेक्षे
ति व्याख्यानात्। एकार्थीभावसामर्थ्यग्रहणे परमसर्पिष्कुंडिकेत्यादौ समासे विकल्पापत्तिः अनुत्तरपदस्थस्येति निषेधाऽनुत्तरस्तत्र स्यान
प्रवृत्तिरिति भावः। ननु नेनैव सिद्धे कस्कादिषु सर्पिष्कुंडिकाशब्दपाठो व्यर्थ इत्यत आह। कस्कादिष्विति। एतेन तत्सामर्थ्यादुत्तरपदस्थ
स्यापि षत्वमित्यपास्तं। व्यपेक्षाविरहेऽपीति। आनय सर्पिः कुंडिका तिष्ठतीत्यादौ। व्यपेक्षायामिति। इदं सर्पिष्कुंडिकाया इत्यत्र प्रत्ययभिन्न
विसर्गस्येत्यर्थमिदुदुपधस्येत्यत्र व्याचक्षाणानां व्याख्यादर्शकृतां मतेन सिद्धेरिति भावः। एतेन कस्कादिपाठस्य व्यपेक्षायां चारितार्थ्यं न व्य
पेक्षायां तस्यासिद्धत्वाद्विकल्प एवोचित इत्यपास्तं। प्रत्ययसंबंधिभिन्नविसर्गस्येत्यर्थे तु तदप्राप्तिरेवेति व्यपेक्षायां विकल्प एवेति बोध्यं।
अतः कास्कारबोधेन तदादिग्रहणे समासाक्षिप्तोत्तरपदस्य विशेष्यत्वात् विषयदेवयोरित्यत्रेव प्रत्ययग्रहणेन धातोर्विशेषणत्वे
तदादिविधिज्ञापनात्। अयस्कुंभीत्यादौ लिंगविशिष्टपरिभाषया सत्त्वं बोध्यं। भास्कर इति। तपरकरणादतः कृकमेत्यस्याप्राप्तिः॥
॥इति विसर्गसंधिः॥ यत्तु स्वौजसित्यत्र रुत्वेऽपवादाभावः सर्वत्र सुग्रहणे रुग्रहणमेवास्त्विति तन्न। यशोऽत्र त्यादौ रोरसिद्धत्वादुत्वानापत्तेः

अपतोरो इत्यस्य प्रथमैकवचने चारितार्थ्यात् तद्ध्वनयन्नाह। स्वौजसेति। पदस्येत्यनुवृत्तं ससजूभ्यां विशेष्यते तेन तदंतविधिरादे
स्त्वसौत्यस्येत्यस्य तत्फलितमाह। पदांतस्येत्यादिना। सजूरित्यत्र व्यपदेशिवद्भावेन सिद्धिः। व्यपदेशिवद्भावोऽप्रातिपदिके
न ग्रहणवता प्रातिपदिकेन तदंतविधिर्नेति परिभाषाद्वयं प्रत्ययविधिविषयमित्यसमासेनिष्कादिभ्य इत्यत्र भाष्ये स्पष्टं।
इदं जश्त्वापवादः। श्रेयानित्यादौ रुत्वस्यासिद्धत्वात् संयोगांतलोप एवेति दिक्। यत्वस्यापवाद इति। यदीदं न स्यात्तर्हि य
त्वं प्राप्नोतीत्येतावता कृते च तस्मिन् यत्वस्यासिद्धत्वादुत्वं गुणयोर्यत्वाप्राप्तिरेवेति भावः। प्रथमयोः। व्याख्यानात् प्रथमयो
रित्यनेन प्रथमाद्वितीयारूपसुपविभक्त्योर्ग्रहणं तदाह। प्रथमाद्वितीययोरिति। पूर्वग्रहणं किं अग्नी इत्यत्र परस्य प
रसवर्णो मा भूदिति। दीर्घग्रहणं तु प्लुतविभावनस्य स्थानिनः त्रिमात्रो मा भूदिति। सवर्णग्रहणं तु स्पष्टार्थं। पूर्वस्यादीर्घ
त्वात्। पूर्वसजातीय इत्यर्थेन निष्पन्नः सिद्धेरिति स्पष्टं भाष्ये। नादिचि इति। तो स इति निर्देशेन भ्रस्णचसः न्यायस्यात्र आश्रयो
नाश्रयणादिति भावः। देवदत्तहंतृहतन्यायस्य तु नात्र प्रवृत्तिः। देवदत्तहंतृहननेन हि नोज्जीवनं देवदत्तहननप्रसक्तहननेन त्व स्ये
वदत्तजीवनं प्रवर्त्तेत हननस्थानीयगुणहेतुः पूर्वसवर्णदीर्घस्य लक्ष्ये प्रवृत्तिः। किंतु हननोद्यमसजातीयं प्रसक्तिमात्रेण
सत्तस्य निषेधे बाध्योज्जीवनेन बाधकमिति स्पष्टं चेदं स्वादिष्विति सूत्रे कैयटे। सुस्रोत इति। सुस्रोतस् शब्दः कस्यचित्
संज्ञा संबुद्धौ दूराद्धूते चेति प्लुतः। तत्सामर्थ्यादिति। प्रतियोगित्वेन तदाश्रयणे सामर्थ्यादित्यर्थः। आश्रयात् सिद्धमिति भा
ष्योक्तेः। पयस्यरति पयोददाति इत्यर्थे आगच्छ हे पयो इ आगच्छ हे पयोदेत्यादावेकपदस्थवर्णद्वयसापेक्षमंतरंगमु
त्वं प्रति वाक्यसंपादनेकपदांतरसापेक्षं प्लुतस्य। सिद्धत्वादुत्वे प्लुतसिद्धिः। अन्यथा प्लुतस्योत्वदस्यासिद्धत्वासंप्र

त्वात्प्लुते आद्येऽप्लुतपरत्वाभावादंत्येऽप्लुतात्परत्वाभावादुत्वं न स्यात्। परिभाषाद्वयस्य बहिरंगासिद्धत्वेपि न द्वितीयस्याऽसिद्धत्वे
पि परं प्रत्यसिद्धत्वप्रतिपादनसंभवात्। द्वितीयस्याऽविद्यमानस्य परं प्रत्यविद्यमानत्वप्रतिपादनात्। अंतरंगस्यासिद्धत्वेनुप्रति
पाद्याभावे इयं प्रत्यसिद्धत्वं प्रतिपाद्येत। तथाच वाक्यस्य टेरित्यनुरोधाकारः प्लुतोऽस्येरेफ इकारसंयोगपरत्वेनाकारस्य
गुरुत्वात् गुरोरिति प्लुतः आश्रयेण तु येन नाप्राप्तिन्यायेन प्रत्ययस्थत्वेन च पूर्वत्रासिद्धत्वमेव बाध्यते न त्विदं। सुप्तोतादृश्यादौ
कवाक्यमात्रसापेक्षत्वात् प्लुतांतरंगो भिन्नवाक्यस्याकारसापेक्षत्वादुत्वं बहिरंगमिति स्पष्टंक्षाघे। उकारानुबंधेति। उकारसंज्ञक रा५
रेफस्येत्यर्थ इति भावस्तेन नद्येव रुहीत्यादौ न दोषः। भोभगो। रोः सुपीत्यतो रोरिति वर्त्तते न तु रोरीत्यतो र इति भ्रातरच्येत्यादावति
प्रसंगात्। अस्मात्तद्देन पूर्वस्माद्वस्य बहुव्रीहिमभिप्रेत्याकेन्तत्पूर्वस्येति। नन्वेवं पूर्वरूपापत्तिरत आह। असंधिरिति। भगो अ
घोभ्यो ओकारयोरकाराभ्यां प्राप्तपूर्वरूपात्मकसंधिकार्याभावइत्यर्थः। इदं प्राचामनुरोधेन। वस्तुतः सूत्रे रांतानामेवानुक
रणमसंधिर्व्याप्य एवेति बोध्यं। नह्ययमिति। इदं सर्वा चाम्नानुसारेण भाष्ये तु रेफस्य विसर्गस्यानित्वेन तद्वृत्तिकृत्वाश्रयमपी
दमसिद्धिरेव। स्थान्यत्सरत्त्विथमाश्रियत्वात् अयहीदिन्यत्र च दीर्घेलोपेचरत्वेनैव निवेश इति विशेषोतः पयस्वित्यादौ
षः। तत्र हि रोः सुपीति विसर्गः नियमशास्त्राण्णिच विधायकान्येव वा च्यवस्थार्थिकार्यमादाय तु निषेधकानीति तत्र चापि रो
रेफस्य विसर्गइत्यर्थेत्वश्शरग्रहणं व्यर्थमित्युक्तं। नन्वेवं हे रामेत्यादौ संबुध्यवयवरुसंस्सस्य लोपेत इति सुप्रस्यास्थर्मत्वेनस्यानिवत्वा
भावे पदत्वासिद्धिरिति चेन्न। आनुमानिकादेशस्य रामेत्यस्यस्यानिवद्भावेन सुबंतत्वस्य तत्प्रयुक्तकार्यस्य वा लाभेन तत्सिद्धेः प्रत्य
यलक्षणेनापि न प्रत्ययस्त्वि धर्मलाभः लक्षणपदोपादानेन प्रत्ययनिमित्तकार्यस्य तन्निमित्तकव्यवहारस्य वातिदेशात्। एवं दीर्घा

होनिदाघेत्यादौ हल्ङ्यादिलोपे कृते रीत्यास्यानिनिजायमानस्यासुपीतिरत्वप्रतिषेधस्यादेशोदीर्घो हनशब्देतिदेशो न प्रवृत्त्यानरेफ इति दिक्। तेषां
रोरिति। इदं निपातानास्यायविभाषाभवदितिवार्त्तिकं प्रत्याचक्षाणस्य वृत्तिकृतो मतेन। परं तु तेषामपि रोरित्यर्थः अपि नाविभाषाभवद्भग
वदघवतामोन्वावस्येतिवार्त्तिकनिष्पन्नसंग्रहः। एषामंत्यस्य रुः स्याद् वस्य चोकारः संबुद्धाविति तदर्थः। अवग्रहणं सामर्थ्याद्लोत्यस्येति
नेतिबोध्यं। वार्त्तिकनिष्पन्नानां त्रयाणां भोशब्दनिपातस्य चावश्यकत्वमन्यत्र स्पष्टमित्याहुः। व्योर्लघु। यद्यपि वर्णसमाम्नायेयस्य प्राथ
म्याद्व्योरित्युचितं तथापि लोपो व्योरिति लोपवारणाय सोत्रत्वमाश्रयणीयं स्यादतो व्योरित्युक्तं। लघुतरः प्रयत्नो यस्योच्चारणे स लघुप्रयत्न
तरः अन्यपदार्थसंबंधोत्तरं वर्तिपदार्थप्रकर्षविवक्षया साधुः। प्रयत्नेलघुतरत्वं चैषां शैथिल्यजनकत्वमेव। लघूच्चारणाविति। लघुत
रोच्चारणावित्यर्थः। सूत्रे सो चत्वादेकवचनं। वकारोदाहरणं अस्मावादित्यइतीतिरचि। ओतो। व्योरित्यत्र यकारसाहचर्याद्वकारो धात्वेनव
यव एवात्राप्यर्थाधिकारात्तथैव तेन स्वस्तोवच्युतेत्यादौ न दोषस्तदाह। यस्येति। तादृशावस्यासंभवादिति भावः। भोभगो इति तु नानुवर्त
ति विच्छेदात्तद्व्रनयन्वस्यतिपदांतस्याकिंतोयमिति। इदं लघुप्रयत्नयोर्नगार्ग्यश्रुतेस्तदाह। लघुप्रयत्नस्येति। पूजार्थमिति। व्याख्याना
दिति भावः। तादृशाश्च भोसादिपूर्वक एवेत्याशयेनाह। भो अच्युतेति। भाष्यानुसारिणस्तु भो इत्याद्यनुवृत्तेः स्वस्ताविच्यादौ न दोषस्त
स्यानभिधानाच्च। अपूर्वस्येति चोत इत्यनेन विरोधान्न संबध्यते लोपः शाकल्यस्येत्येव भोभगो इत्याद्यनुवृत्त्या सिद्धे नित्यत्वार्थमि
दमित्याहुः। इञि च। भो इत्यादिपूर्वस्य पूर्वेण सिद्धे आह। अवर्णपूर्वयोरिति। एतदपि नित्यमेव। अत्रापि गार्ग्यग्रहणानुवृत्त्याऽलघु
प्रयत्नस्यैव लोपः। उत्तरार्थमिति। ङमो ह्रस्वादचीत्यर्थमित्यर्थः। एतच्चैव निरूपितं। हलि सर्वेषामित्यादौ तु न संबध्यते व्यवहितेऽ
पीत्यत्रैव प्रयोजनकथनपरभाष्यप्रामाण्यात्। अत एव लिटूसु इत्यादौ धुडादयः अन्यथासादौ पदेत्यर्थान्नस्युः। अत एव
भाभ्यामित्यादौ हलि सर्वेषामिति लोपसिद्धिरिति दिक्। हलि सः। भोभगो इत्याद्यनुवर्त्तते तत्र ओकारात्परस्य लघूच्चारणस्यैवानेन
लोपः अपलघूच्चारणस्य चोत इत्येव सिद्धं अपूर्वेत्युभयोरपि। न चापूर्वलघुप्रयत्नेऽस्यासिद्धत्वाल्लोपः शाकल्यस्येति प्राप्नोतीति वाच्यं।

लघुप्रयत्नस्येवानेनलोपेव्योरितिसूत्रेचीतिकरणेनहलिविधानाभावेनैवसिद्धावस्यसूत्रस्यवैयर्थ्यापत्त्यातद्बाधात्।नचालघुप्रयत्नयोरेवलो
पःस्यात्व्योरित्यर्थाधिकारादितिवाच्यं।स्थिमात्रग्रहणार्थस्यसर्वेषामित्यस्यवैयर्थ्यापत्तेर्विकल्पस्यविच्छिन्नत्वेननित्यत्वसिद्धेः।अ
त्रचयकारएवानुवर्त्ततेनवकारोवृत्तौतथैवोक्तेःफलाभावाच्चव्यपरइत्यादिनिर्देशाच्च।अन्यथातत्रसौत्रत्वाद्याश्रयणीयंस्यात्तदा
हालघ्वलघूच्चारणस्यपस्येति।नतुसुपीति।पर्युदासेहिसुप्सदृशेप्रत्ययएवस्यादेवंचाहभलौत्यत्रनस्यात्स्यादितुसुबूभिन्नेशब्दे
स्यात्दीर्घाहोनिदाघेयत्रापिस्यात्।सुबंतइत्यर्थस्तुन।तुन्नामेकाभ्यामित्यादिनिर्देशेःसप्तमीनिर्दिष्टेप्रत्ययेतदंतविध्यभावज्ञाप
नात्।लक्ष्यानुरोधेनक्वचित्प्रत्ययग्रहणेशब्दस्वरूपस्यविशेषणतायाएवाश्रयणाच्च।अतएवरदाभ्यांनिष्ठेत्यादौनदोषः।अहर
हरिति।नित्यवीप्सयोरितिद्वित्वं।नलुमतेतिनिषेधात्सुप्परत्वाभावः।गतमहोरात्रिरिति।केचित्तुभाष्येप्रातिदेशिकस्याहोरात्रस्ये
वोदाहरणान्नलोपःप्रातिपदिकांतस्येतिसूत्रेनहिरूपरात्ररात्रिरथंतरेषुरोरेवाविशेषोक्तौयच्चप्रायेणरात्रेतिपाठाच्चेदृशानाम
नभिधानमेवेत्याहुः।अनन्यत्वादिति।रात्रिशब्दांतसमासादचिसमासांतेयस्येतिचेतिलोपेरात्रिशब्दत्वादसतेरितिभावः।अनु
वादेरेफविशिष्टस्योपादानाडेपूस्यरेफविधानंव्यर्थमतआह।विसर्गापवादइति।द्रुलोपे।नायंतत्पुरुषोनीयरिचारेया
दोचदोषापत्तेर्नापिबहुव्रीहिर्व्यधिकरणत्वाद्गतोणिजंतात्कर्मण्युपपदसमासइत्याह।ढरेफावित्यादि।भाष्येत्तुव्यधिकरणबहु
व्रीहिरेवदर्शितः।नचाजर्घाइत्यादौसिपिधातोरितिरुत्वस्यलिढइत्यादौढत्वादीनांपितूराज्यमित्यादौसंयोगांतलोपस्यासिद्धत्वा
त्कथंदीर्घइतिवाच्यं।ढग्रहणेनलएरसूत्रेजर्घइतिभाष्योदाहरणेनचतत्त्वज्ञापकेवाक्यतापन्नपूर्वत्रासिद्धमितिसूत्रस्यपूर्वग्र
हणेनैतत्सूत्राग्रहणाबोधनात्।अणः।किमिति।अचइत्येवसिद्धमितिप्रश्नः।तंदुइतिपाणिनिकारजावनुस्वारपंचमावितिद्वि
त्वेरनिर्दितामितिनलोपेत्वढइतिरूपं।अत्राणएपूर्वेणवव्याख्यानात्।विप्रतिषेधे।विप्रतिपूर्वात्कर्मव्यतिहारेवर्त्तमानात्सेधतेर्घञिपर
स्परविरोधार्थोविप्रतिषेधशब्दस्तत्रनित्यस्यावश्यकतयांतरंगस्यज्ञापकादिनाऽपवादस्यवचनप्रामाण्याद्बाधकत्वेस्थितेतद्भि

न्नोस्यविषयइत्याह।तुल्यबलेति।द्वयोःशास्त्रयोःक्वचिदन्यावकाशयोरेकत्रप्रयोगेयुगपत्संभविस्वकार्यसमर्पणांचूसः।तत्रप्रायेणैकस्य
कार्यद्वययोगकृतेऽसंभवएतस्यप्रवृत्तिःयथावृद्धेभ्यइति।तत्रहिदीर्घोत्वयोर्युगपत्प्रवृत्तौस्वस्वनिमित्तेनानंतर्यासंभवः।क्वचित्केवला
संभवेपियथाशिष्टादित्यादौ।अत्रहितातङ्शाभावयोर्युगपत्प्रवृत्तौस्वस्वनिमित्तानंतर्यासंभवः।यद्यपितातङादेःस्थानिव
त्वेस्त्येवतथाप्यतिदेशआदेशप्रवृत्त्युत्तरमेवनतुतत्प्रवृत्तिकालेइतियुगपदसंभवोस्त्येवेतिपरत्वात्तातङिसत्कृतिन्याये
नशादेशः।स्पष्टंचेदंसर्वंप्रकृतसूत्रेइकोगुणवृद्धीअदसोमादित्यादावाकरे।तत्रयुगपदुभयोःकार्ययोरसंभवात्पर्यायेण
तजादिवच्चाप्रत्ययप्रसंगेनियमार्थमिदंपरमेवेतितेनतिसृणामित्यत्रयोगपद्यासंभवेनपरत्वात्तिसृादेशेपुनःस्थानि
वत्त्वेनत्रयादेशोनतत्पक्षतेसकृद्गतौविप्रतिषेधेयद्बाधितंतद्बाधितमेवेति।यद्वायथाकुल्पवलयोरेकःप्रेष्योभवतिस
तयोःपर्यायेणकार्यंकरोतियदातमुभौयुगपत्प्रेषयतोनानादिक्षुचकार्यंभवतस्तदोभयोर्नकरोतियौगपद्यासंभवात्तथाशा
स्त्रयोरप्युभयोःक्वचिल्लक्ष्येयौगपद्यासंभवादप्रतिपत्तौप्राप्तायामिदंपरंभवतीतिविध्यर्थे।तत्ररुतेयदिपूर्वस्यापिनिमित्तमस्तितदा
तदपिभवत्येवतत्पक्षतेपुनःप्रसंगविज्ञानात्सिद्धमिति।यथाभिंधीत्यत्रपरत्वात्तातङिपुनर्धिर्भवति।अत्रतातङःधिभावयो
र्युगपदेकस्थानिसंबंधस्यागरूपनिमित्तानंतर्यस्यवानसंभवइतिभाष्येस्पष्टं।कार्यपरत्वंचपरशास्त्रविहितत्वंकार्यकाल
पक्षेप्यष्टाध्यायीपाठकृतपरत्वमेवनियामकमतएवङमोह्रस्वादित्यादौत्रिपादीस्थेकार्यकालपक्षएवपरिभाषयोःप्रवृत्त्या
रेवकाल्यतेप्राप्तइत्यतेनपूर्वंतितत्वं।संज्ञानांतुकार्यकालपक्षेप्रदेशएववाक्यार्थेनतद्बोधोत्तरमेवविरोधप्रतिसंधानंकृ
भाष्येदृष्टं।परिभाषाणांतुतत्प्रदेशेपिस्वस्वदेशेऽर्थबोधोस्त्येवेतितासांपाठकृतमेवतदेतत्सूत्रप्रवृत्तौनियामकमितिबोध्यं॥

यद्यपीयंपरिभाषातथापिकार्यग्रहणेनकार्यमात्रग्रहणात्तस्मिन्निनितस्मादितिपरिभाषयोरपिव्यवस्थापिका।कार्यकालपक्षेपि
नैवंकार्यपरिभाषादिवद्विध्येकवाक्यतागत्वात्स्वकार्यनिष्पादिका।किंतुवाक्यभेदेनैवकार्यव्यवस्थापयतियथाहरदे।भ्यइत्येतद्दी
र्घत्वयोःश्रासयोःपरत्वंप्रवर्त्तयति।एवमसिद्धंबहिरंगमित्यादयोपीतिस्वरवसानयोरित्यत्रकैयटेस्पष्टमेवंचविप्रति
षेधेइत्येषायथोद्देशैवेतिस्थितंत्रिपाद्यांकार्यकालपक्षेप्यप्रवृत्तेःपूर्वदृष्ट्यापरावस्थानाभावात्इत्यन्यत्रविस्तरः।इतिलो
पइति।इत्थंनित्यमितितुनभोभगोइतिसूत्रोक्तरीत्यालोपस्याश्विधित्वात्स्थानिवत्वेनतद्धर्मातिदेशेप्युच्चारणप्रसंगरूपस्या
नषत्त्वस्यार्थाभावेनलोपेतद्ग्रासेध्यः।एत्तदोः।अनकार्यस्वरूपभंगभियाकोपीहवैकशेषाभावः।एतत्तदोरनंतरइत्यर्थ
स्तेनपरमसदृशतीत्यादौनदोषः।गोएतत्तुनदोषस्तत्यदाद्यत्वाभावेनहल्ङ्यादिलोपस्यदुर्वारत्वात्।सुइतिप्रथमै
कवचनमेवव्याख्यानात्।अनञ्समासेकिमिति।तस्यपूर्वपदार्थप्रधानत्वादुपसर्जनत्वात्त्यदाद्यत्वाभावेहल्ङ्यादिलोपो
दुर्वारइतिप्रश्नः।उत्तरपदार्थप्रधानःसइत्युत्तरं।सोचि।सस्तितिप्रथमांतस्यलुप्तषष्ठीकमनुकरणं।सेमामविड्ढीतिद्वा
दशाक्षरपादाजगतीछंदः।सएवमुक्तेति।लोपेचेत्पादपूर्त्तिर्नलोपइतिभावः।अवधारणंचेति।इदंवैय्याख्यातमवधा
रणंत्वित्यर्थः।बहुलेत्यादि।गमकांतराभावादितिभावः।एवंचतदनुवृत्त्यैवक्वचिदप्रवृत्तौसिद्धायामवधारणपरतया
व्याख्यानंव्यर्थमितिभावः।सर्वमेतदवधारणंत्वितितुनासूचितमित्यलं॥ इतिस्वादिसंधिः॥ श्री छ श्री॥

॥४७॥

स्वादिविधौप्रातिपदिकाधिकारात्तांसंज्ञामाह।अर्थवदिति।अधातुरित्यादिःपर्युदासोलाघवात्।अप्रत्ययांतमिति।आवर्त्तितप्रत्ययपदे
प्रत्ययग्रहणपरिभाषयातदंतग्रहणात्संज्ञाविधावितिनिषेधस्तुप्रत्ययस्ययत्रसंज्ञातद्विषयइतिभावः।अत्रसूत्रेउत्तरसूत्रेचार्थवत्त्व
मितासंज्ञाफलीभूतविभक्तीतरसमभिव्याहारानपेक्षयालोकेऽर्थविषयकबोधजनकत्वं।अन्यथाअधातुरितिपर्युदासेनव्याख्या
नादर्थवत्त्वेनैवसादृश्यग्रहणेनसिद्धेकृत्तरसूत्रेकुरादीनामनर्थकानामप्रसिद्धेस्तद्वैयर्थ्यंस्यात्।नचनञिवयुक्तन्यायानित्यत्व
ज्ञापनार्थंतत्।तदनित्यत्वज्ञापनेभाष्यसंमतदृष्टतरफलाभावात्।अहन्कांडइत्यादावेतत्साध्यविभक्त्यनपेक्षत्वेपितदितरानपे
क्षत्वमस्त्येवेतितत्पर्युदासःसार्थकः।नचतत्केवलप्रत्ययस्य।तदुक्तं।संख्यायाअतिशदंतायाइतिसूत्रेभाष्येनहिलोकेकेवलेनप्र
त्ययेनार्थोगम्यतेकेनतर्हिसप्रकृतिकेनेति।हरिरप्याह।धात्वादीनांविशुद्धानांलौकिकोर्थोनविद्यते।कृत्तद्धितानामर्थश्चके
वलानामलौकिकः।प्राग्विभक्तेस्तदंतस्यतथैवार्थोनविद्यतइति।अतएवपदसंज्ञासूत्रेतग्रहणस्यसंज्ञाविधौतदंतविध्य
भावज्ञापकत्वेकृत्तद्धितेतिसूत्रेतग्रहणंकर्त्तव्यंनकर्त्तव्यमर्थवदितिवर्त्ततेकृत्तद्धितांतंचैवार्थवन्नकेवलाःकृतस्तद्धितावेति
भाष्यमुपादायशास्त्रीयार्थग्रहणेऽर्थवद्ग्रहणानुवृत्तिवैयर्थ्येनतदनुवृत्तिसामर्थ्याल्लौकिकार्थप्रत्यासन्नोभिव्यक्ततरोयोर्थः
प्रत्ययांतेषुलक्ष्यतेसआश्रीयतइतिकैयटेनोक्तं।लौकिकंयत्सदंतदर्थस्यप्रत्यासन्नःशास्त्रकल्पितस्त्वादिप्रकृतेरर्थः
प्रत्ययांतेषुसुबंतेषुयोऽभिव्यक्ततमोलक्ष्यतेबोधभिःसइत्यन्वयः।यत्तुप्रत्ययांतेष्वित्यस्यकृदादंतेष्वित्यर्थइतितन्न।ता
वन्मात्रेणकस्याप्यर्थस्याभिव्यक्तेरप्यभावेनाभिव्यक्ततरत्वस्यसुतरामभावात्।अर्थवत्सूत्रेप्येवमेवेत्यनुवृत्तिसामर्थ्यादित्यनेनसू
चितं।अन्यथातत्सामर्थ्यादित्येववदेत्।पूर्वसूत्रेयादृशार्थवत्वग्रहोत्राप्यनुवृत्तिसामर्थ्यात्तादृशार्थस्यैवग्रहःशास्त्रीयार्थग्र

उ०प्र०शे०
४८

णेतुतस्नुवृत्तिर्व्यर्थास्यादितितद्भावः। किंचपूर्वसूत्रेसामान्यतोऽर्थवत्त्वग्रहणेन किंचित्पुलंप्रत्ययेष्वतिव्याप्तिदानातिरिक्तं। अतएवतद्धितग्रह
णस्यनियमार्थत्वाश्रयणेनह्रस्वोनपुंसकेयत्तस्येतिन्यासेनकांडेइत्यादौह्रस्ववारणात्फलाभावेनवाभाष्योक्तेतत्प्रत्याख्यानेपंचनावप्रिय
इत्यादौपंचनावप्रियस्यानेननप्रातिपदिकत्वंनाप्युत्तरसूत्रेण। प्रातिपदिकत्वेतुङीबापत्तिः। एवंचप्रत्ययस्यप्राप्तिरेवनेतिकेवलप्रत्यय
पर्युदासोविफलः। दशदाडिमानिषडपूपाइत्यादिनिरर्थकपदसमुदायव्यावृत्तिरर्थवद्ग्रहणफलंतत्रहिसुपोधात्वितिलुगापत्तिरिति
भाष्येस्पष्टमितिदिक्। पूर्वसूत्रेणेति। प्रत्ययग्रहणेयस्मादितिप्रत्ययांतत्वाभावादितिभावः। नियमस्यसाजात्यंदर्शयितुमाहपूर्वो
भागइति। एतेनयत्तच्छब्दार्थयोरननुगतत्वेनशब्दानुगमस्याप्रयोजकत्वेनव्यवच्छेद्याननुगमेपिहत्यभावेनचयत्रसंघातइत्या
दिव्यर्थमिचेत्यपास्तं। पदशब्दोनात्रस्वातंत्र्येणापिप्रयोगार्हमर्थवद्गृह्यते अतएवार्थवत्समुदायानांसमासग्रहणंनियमार्थमित्यु
क्तमत्रभाष्ये। भाष्येसुबंतानामित्यनेनभेदसंसर्गद्वारकार्थवंतरूपलक्ष्यंतेइतिकैयटेनस्पष्टमेवोक्तंतेनगवित्ययमाहेत्यादौ
गोइत्यादीनांसुबंतत्वाभावेपिनसमुदायस्यप्रातिपदिकत्वं। अनुकरणस्यानितिपरस्यापिप्रयोगसत्त्वेनतावन्मात्रस्यापिपृथक्प्र
योगार्हत्वात्। बहुपटवइत्यादौप्रातिपदिकत्वसिद्धयेस्वातंत्र्येणेतितत्रपूर्वइत्यादिःस्पष्टमपिस्यात्तंत्रेणप्रयोगार्हार्थवतामेव
ग्रहणात्पुत्रकाम्येत्यादौनदोषः। अतएवांगसंज्ञासूत्रेभाष्येप्रत्ययग्रहणेयस्मात्सविहितस्तदादेस्तदंतस्यग्रहणमितिपरि
भाषायाःफलनिरूपणावसरेदेवदत्तोगार्ग्यइतिसमुदायस्ययञंतत्वेनप्रातिपदिकसंज्ञाभावःफलत्वेनोक्तः। यथाश्रुतसू
त्रोक्तनियमेतुनियमेनैवतत्रतदप्राप्त्याभाष्यासंगतिःस्पष्टैव। एतेनचघएवसुरित्यादौपूर्वभागस्यभत्वात्पूर्वोभागःपद
मित्ययुक्तमित्यपास्तं। वाक्यस्यनेति। प्रातिपदिकत्वेहिसुपःश्रवणापत्तिः। पिंडीमित्यादौवाक्यैकदेशप्रयोगेलुक्समासेचांगा ॥४८॥
धिकारविहितसुप्प्रत्ययनिमित्तकार्याणांसुबादेशानांचचारितार्थ्यंविकल्पेनसमासविधानंचस्वराद्यर्थमितिभावः। शशशृंगादि

॥४८॥

पदानांचवैदिकशशशृंगादेःशक्तिरितिपूर्वोक्तेःप्रातिपदिकत्वंसिद्धंस्वन्यायानुरोधेनचबोधपदार्थस्यावश्यकत्वं। अहोहिरण्यरथंतरादिपदेष्ववयवाना
मप्यंतनिरर्थकानामप्यन्यत्रदृष्टार्थानुरोपेणप्रातिपदिकत्वसुबुत्पत्त्यादिनायथाकथंचित्साधुत्वाख्यानंबोध्यं। अधिकारोयमिति। संज्ञाधिकारइ
त्यर्थः। संज्ञात्वावगमस्तुव्याख्यानात्। विकारागमानांतुनसंज्ञा। प्रत्ययइतिमहासंज्ञयास्वस्यप्रकृत्यन्यतरार्थप्रत्यायकस्यैवतत्संज्ञकत्वात्। प्र
प्रकृत्यर्थत्वंचधातुपाठकोशादौतमुच्चार्यबोधितत्वं अतएवनभवधायादेशानांनसंज्ञातेषांस्वान्यार्थनिवार्थवत्त्वंनतुस्वार्थोक्तिः। अतएवको
दौतदर्थाकथनं। एतदर्थमेवभाष्येस्वीयमर्थंप्रत्याययंतीतिविग्रहेस्वीयपदोपादानंभाष्यप्रामाण्याच्चैतदर्थांतभविणप्रत्ययशब्दस्यवृत्तिः।
यत्तुविकारागमादेशानांदेशांशेनिराकांक्षत्वात्परश्चेत्यस्यानुपस्थितौतत्संनियोगशिष्टप्रत्ययसंज्ञायाअप्रवृत्तिरितितन्न। श्नमक
ज्वबहुच्प्रवृत्त्यापत्तेः। किंचलविश्वीत्यत्रविशेषविहितत्वाच्चपूर्वंसीयुट्तितोलादेशेप्रत्ययसंज्ञासंनियोगेनैटोविधीयमानमाद्युदात्त
त्वंसीयुटएवस्यादतःआगमानुदात्तत्वंवक्तव्यमित्याद्युदात्तश्चेतिसूत्रस्यभाष्यकैयटसंगतिःस्थानिकत्वेनदेशांशेनिराकांक्षत्वेनपर
श्चेत्यस्याप्रवृत्तौप्रत्ययइत्यस्याप्यप्रवृत्तौतत्संनियोगकथनासंगतेरितिदिक्। परश्च। गुप्तिज्किद्भ्यइत्यादावपादानत्वासंभवाद्दि
ग्योगलक्षणापंचमी। तत्रपरःपूर्वंवेत्यनियमेनाध्याहारेप्रसक्तेपरएवेतिनियमार्थमिदंगापोष्टगित्यादावपि। षष्ठ्यर्थेअनं
तर्येपूर्वपरसाधारणमित्यनियमोस्त्वेव। अत्रतस्मादित्तिपरिभाषोत्तरंगविकलाप्रवर्ततेइत्यव्यवहिताएवप्रत्ययाः। न
चैवंपक्षांशविकलंसंपूर्णसूत्रमुपतिष्ठतांकिंपरश्चेत्यनेनेतिवाच्यंप्रकृत्यर्थमात्रविवक्षायांकेवलप्रकृतेःपच्यदित्यादेःप्रयो
गोमाभूदितिप्रत्ययःपरोभवत्येवेतिनियमार्थत्वात्तेननकेवलाप्रकृतिःप्रयोक्तव्यानापिकेवलःप्रत्ययइतिसिद्धं। अनुकरणे
कुम्भेदविवक्षयार्थवत्त्वाभावात्प्रातिपदिकत्वाभावेनप्रकृतित्वाभावात्गवित्ययमाहेत्यादौनानुपपत्तिः। प्रकृतित्वंप्रत्य
यविधावुद्देश्यतावच्छेदकाक्रांतत्वं। अयंन्यायःशास्त्राबोधितान्यतरप्रयोगविषयेततएवहिरिइयानित्यादौनदोषोनप्रकृति

विशेषोद्देशेनैव प्रत्ययानां विधानान्नापि केवल इति न्यायमूलकं। एतन्मूलकमेव च पठ्यते ऽपदं न प्रयुञ्जीतेति। अपरिनिष्ठितमिति तदर्थः। परि
निष्ठितत्वं चाप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रांतत्वं। निहते तिङन्तादावव्याप्तिवारणाय प्रवृत्ते तिवै कल्पिके ऽडागमोद्देश्यतावच्छेद
काक्रांते सेद्धेत्यादावव्याप्तिवारणाय नित्येतीति दिक्। ङ्याप्प्रातिपदिकात्। समाहारद्वंद्वः। ननु परश्चेत्यनेन प्रकृतेराक्षेपात् प्राति
पदिकाधिकारो व्यर्थः। तिङन्तात्तु न द्वितीयादि। संख्याभावात्। संख्यायास्तिङोक्तत्वाच्च। धातुभ्यस्तु न। तिङामपवादत्वात्। तस्येत्यादि
समर्थविभक्तिनिर्देशात्तमब्विधौ तिङश्चेति ज्ञापकाच्च न तेभ्यस्तद्धितव्यावृत्त्यर्थ इति चेन्न। तदभावे स्वार्थद्रव्यलिंगसंख्याकारकष
युक्तकार्यैः संस्कृतस्य बहिर्भूतापत्यादियोग इति कुत्सितइति सूत्रभाष्योक्तन्यायेन तस्यापत्यमित्यादेस्तत्संबंध्यपत्यमित्याद्यर्थे
प्रथमोच्चारितबोध्यात् प्रत्ययइत्यर्थस्य सत्त्वेन च सार्थकतद्धितानां सुबंतादुत्पत्त्यानुदात्तादेरित्यस्य प्राधान्यादुपस्थितसुबंत
विशेषणत्वापत्तौ सर्वस्य विकारः सार्वइत्यत्राञनापत्तेः। सर्वस्य सुपीत्याद्युदात्तत्वात्। तदधिकारसामर्थ्यात्तु प्रातिपदिकस्यैव त
द्विशेषणमिति न दोषः। सर्वशब्दस्यौञ्छादिपाठेनांतोदात्तत्वात्। स्पष्टं चेदमत्र भाष्ये। न चांतरंगानपीति न्यायेन लुक्निमित्तप्रत्य
यात्पूर्वमाद्युदात्तत्वाप्राप्त्या तस्य सुबंतविशेषणत्वेपि न दोष इति वाच्यं। तेन न्यायेन धर्मिग्राहकमानादंतरंगनिमित्तविनाशकलुक
एव प्राबल्यबोधनेन दोषात्। सर्वस्य सुपीत्यत्र सौवरीणं सप्तमी नांतदंतसप्तमीत्वात् प्रत्यये परतः पूर्वकार्यत्वाभावेन न लुमतेत्य
स्याप्रसौ प्रत्ययलक्षणेन सुबंततया तस्यांतरंगनिमित्तविनाशकत्वाभावात्। अतएव सर्वस्तोमादिबहुव्रीहेराद्युदात्तत्वसि
द्धिः। न चानुदात्तादिप्रकृतिकपक्ष्यंतादित्यर्थेन न दोष इति वाच्यं। गर्गादिभ्य इत्यादौ सुबंतं प्रति गर्गादीनां विशेषणत्वासंभवाद्गत्या लक्षणस्वीकारे
पि प्रकृतेर्लक्षणायां मानाभावात्। वस्तुतस्तत्रापि न लक्षणा। गर्गादिरूपात् प्रातिपदिकात्तत्संबंध्यपत्यमित्यर्थे प्रत्ययइत्यर्थे प्रातिपदिकात्परस्तत्व्य
वधानेन भविष्यति तद्व्यतिरिक्तव्यवधाने तु न मानाभावात्। एतच्च मतुप्सूत्रे कैयटे स्पष्टमित्यन्यत्र विस्तरः। लिंगविशिष्टस्येति। इयं च प्रातिपदिकसंज्ञा

न्यग्रहणेन तद्विशिष्टग्रहणेच। अनयैव परिभाषया ङ्याप्ग्रहणवैयर्थ्यस्य भाष्ये शंकितत्वात्। विशेषविषये बहुतरोदाहरणदानाच्च। स्त्रीप्रत्ययसमभिव्या
हारे प्रातिपदिकत्वं तद्व्याप्यधर्माः विशिष्टेनेनातिदिश्यंते। अतएव बहुव्रीहेरूधस इति सूत्रभाष्ये नद्यृतश्चेत्यस्य नद्यंतबहुव्रीहेरित्यर्थे कुंडोघ्नी
त्यत्र सकबापादितः। अन्यथा तु ङ्यंतस्य बहुव्रीहित्वाभावात्तदसंगतिः। नद्यंतानां यो बहुव्रीहिरित्यर्थेन च परिहृत इत्यन्यत्। समासांतेषु तत्प
रिभाषाभावस्तु ङ्याप्सूत्रभाष्योक्तोवयवविषय एव। समुदायविषये तत्प्रवृत्तावविशेषाभावेन तदंशे तत्प्रवृत्तौ न मानमित्याशयः। ङ्या
बंतादिति। ङ्याप्ग्रहणं स्त्रीप्रत्ययमात्रोपलक्षणं। तेन ब्रह्मबंधूतरा युवतितरेत्यादेः सिद्धिः। जातेश्चेति निषेधान्न पुंवत्त्वं वयोवाचिनां वैकल्पि
कजातिकार्यस्य वक्ष्यमाणत्वात्। तद्धित इति। एतच्च समासांतप्रत्ययाद्यतिरिक्तपरं। व्याख्यानात्। तेन पूर्नीतिर्बहुगोमतीकेतिस्यादिप्रत्यया
न्ता। एवं च स्त्रीप्रत्ययेषु अपत्यंतस्वार्थिकानारभ्य तद्धितेषु च ङ्याप्ग्रहणासंबंधो व्याख्यानात्। अतएव वक्ष्यमाणहिनिकेत्येतत्सिद्धये लोहिता
ल्लिंगबाधनं वेति चरितार्थमस्यंतस्वार्थिकानां सुबुत्पत्तेः पूर्वमुत्पत्तिरिति सर्वस्य द्वे इति सूत्रे भाष्ये स्पष्टं कैयटे च। तत्र हि पदस्येत्यस्याप्र
योजनं द्विपदिकेत्यादौ द्विचसंख्यायुक्तपादार्थस्य वीप्सितत्वात् वीप्सायामेकवचनरूपसंख्याया अनंतर्भावात् समासाद्विभक्त्यभा
वेन पदत्वाभावात् प्राक् द्वित्वोत्पत्तेः द्विर्वचनाभाव इत्युक्तं। पुंयोगादिति सूत्रे भाष्येपि एतत्स्फुटं। तत्र हि गतिकारकोपपदानामित्यस्याः
सांकूटिनमिति प्रयोजनमुक्तं। तत्र हि अभिविधौ भावइनुणि कूटिनशब्दादणप्रत्ययविभक्त्योः प्राप्तयोः स्वार्थिकत्वेनांतरंगत्वादण
णि कूटिनित्यस्यैव द्विः स्यात् इत्युक्तं तस्यापि सुबंतादुत्पत्तौ तु पूर्वं सुपि इनुणं तद्वद्रूपाधिकसापेक्षत्वेन बहिरंगतयाणः पू
र्वं समासे विशिष्टादणि रूपसिद्धौ भाष्यासंगतिः। प्राक्सुबुत्पत्तेः समासे कृते उक्तरीत्यैवांतरंगत्वात्पूर्वं समासे तस्माद्विशिष्टादणि
ति सांकूटिनसिद्धिरित्यन्यत्र विस्तरः। स्वौजस। सूत्रे समाहारद्वंद्वः। टङ्पाश्चेत इति। न च फलाभावः लोपस्यैव फलत्वात्। तत्र तत्रेतरव्या
वृत्त्या चरितार्थानां लोपपक्षे च स्त्रीकारे बाधकाभावात्। काम्यजादौ तु लोपे सति वर्णोच्चारणवैयर्थ्यान्न तन्मात्रफलिके संज्ञेति बोध्यं।

न विभक्ताविति निषेधोपपत्तेः। गिनी विभक्तिसंज्ञामाह। विभक्तिश्च। चकार एकसंज्ञाधिकारे पि पुरुषवचनसंज्ञाभ्यां समावेशार्थो न्यथा पर्यायः स्या
त्। सुप इति सूत्रं तिङः स्त्रीलीति सूत्रात्तिङ इति चानुवर्त्तते प्रथमयोरित्यादिव्याख्यानात् प्राचां वैयाकरणानां प्रथमाद्वितीयापदवाच्ययोर्य
हणं बोध्यं। अन्यथा औजसोः पूर्वस्येव वदेत्। विभक्तिग्रहं शेषु सु सि ङि इति नवकं शाकं यत्र तत्रेत्यादौ यदाद्यत्वानापत्तेः। तेषां सुप्संज्ञाया
शक्या। एतदीत्यादौ सुपि चेति दीर्घापत्तेः। तसन्यतामिति। स्त्रीलिंगादिति शेषः। प्राचां वैयाकरणानां तेषामाणां। इहापि अस्मिन् व्याकरणेपि सुपः।
सु विति प्रत्याहारास्यत्र। द्व्येकयोः। नियमार्थमिदं। इह सूत्रे द्व्येकशब्दौ संख्यापरौ न संख्येयपरौ बहुवचनापत्तेरित्याह। द्व्येकयोरि
ति लौकिकप्रयोगेत्वादरात्तः संख्या संख्येय इति कोशाभाष्याद्युक्तेः संख्येयपरत्वे एव प्रायः साधुत्वं क्वचित्संख्यापरत्वेपि संख्येयगत
संख्यारोपेण साधुत्वं अत एवैकस्य द्विवेद्ययापर्थैकयोर्द्वयोः केषां बहुष्विति भाष्ये प्रयुक्तमिति बोध्यं। एकशब्दो द्विशब्दसाहचर्यात्संख्या
वाच्येव। एकग्रहणं त्यक्त्वैकवचनमुत्सर्गः कर्त्तव्यस्तेनाव्ययेभ्यः पचतिकल्पमित्यादौ च व्यर्थैकवचनप्रयोगसिद्धिरिति तद्धितस्थे
तिसूत्रे भाष्ये स्पष्टं। बहुषु। बहुशब्दोत्र त्रित्वादिपरार्धान्तसंख्यानां व्यापको यो धर्मविशेषो बहुत्वं तत्परः बहुवचनं त्वाश्रयगतं
बहुत्वं धर्मे आरोप्य कृत्तं। तेन वैपुल्यवाचिनो न ग्रहणं। दारा इत्यादौ त्ववयवादिगतबहुत्वस्यावयविन्यारोपो बोध्यः। स च कोशाद्य
व्यवहारानुसारेणैवेति नातिप्रसंगः। भर्त्तृदारयोरत्र तेजसोरित्यादौ वृत्तौ तु द्विवचनमेवारोपे मानाभावात्। अत एव द्व्येकयोरिति
संगच्छते। एतेनैकस्मिन्नपि गुरवः समागता इत्यादि समर्थितं। अन्वर्थसंज्ञयैव सिद्धे इदं सूत्रद्वयं स्पष्टार्थं। रामः इति। सत्वे एक
देशविकृतन्यायेन सुबंततया पदत्वादिसर्गः। सरूपाणाम्। वृद्धो यूनेति सूत्रादेवकारोपकृष्यत इत्याह। सरूपाण्येवेति। तेन जननी
परिच्छे[illegible]त्ववाचिनोर्मातृशब्दयोर्भ्यां मिनेकशेषः। न चैकविभक्ताविति व्यर्थं। यानि सरूपाण्येवेत्युक्त्यैवोक्तदोषवारणादिति वा
च्यं। हरिणस्त्रीवाचकहरिणीशब्दस्य हरितवर्णविशिष्टस्त्रीवाचकहरिणीशब्दस्य चैकशेषानापत्तेः। पुंवद्भावेन तद्धिता

सवरूप्यात्। हसानीति। लौकिके प्रयोगे इति शेषः। एकशेषश्चायमनैमित्तिकत्वेनांतरंगत्वाद्विभक्त्युत्पत्तेः पूर्वमेवेति तद्विषये द्वन्द्वश्चा
तिरेव नेति बोध्यं। ननु तंत्रेणैव सिद्धेरिदं व्यर्थं। यथा अक्षा भज्यंतां भुज्यंतां दीव्यंतामित्यत्राक्षा इति कारकस्य सकृदुपादानेपि स
र्वत्रान्वयः। तंत्रकारणं तु शब्दानां तुल्यरूपता। एवमक्षो भज्यतां भुज्यतां दीव्यतामित्यपि। तंत्रं द्विधा। शब्दतंत्रमर्थतंत्रं च। शब्द
स्य पर्यायपरित्यज्य सहत्वे पाद्यं। यथा पश्व इत्यादौ। तत्सहत्वेकत्वं। यथापरा इत्यादौ। तत्राक्षो भज्यतां भुज्यतामित्यादावन्व
यि पदार्थभेदाद्बुद्ध्यारूढस्यैव बोधः उच्चारणं तु तंत्रेण। अन्वयि पदार्थस्यैकत्वे तु एकोपस्थित्यैवान्वयो यथादौ नाश्य परान्य
स्येत्यादावितिचेत्सत्यं। सरूपाणामेकशेष एवेति नियमार्थत्वात्। तत्फलं तु प्रत्ययशब्दनिवेशस्यापि दर्शनेन कदाचित्तादृश
प्रयोगे प्राप्तद्वन्द्वस्य निवृत्तिः स चायं नियमो विभक्तौ यानि सरूपाण्येव तद्विषयः सहविवक्षाविषयश्च अत एव विभक्त्यंताना
मेकशेष इति पक्षे द्वन्द्वप्रतिषेधो वक्तव्य इत्याशंक्यानवकाश एकशेषो द्वन्द्वं बाधिष्यत इति भाष्ये उक्तं किंचासहविवक्षाया
मपि तत्प्रवृत्तौ सहविवक्षायां द्वन्द्वस्यैवान्यत्र कर्मधारयस्यापि बाधापत्तौ सारवसारवो भिन्न इत्यादिप्रयोगविरोधा
पत्तिः असहविवक्षाविषयेण विभक्त्यंततंत्रेण ब्राह्मणाभ्यां कृतं देहि यथाजरयतीत्यादिनी लोत्पलस्य धिनी नेत्रेतन
वहिरेदिति वद्धिहन्मानसहंसेति च स्वमेवेति बोध्यं। न चासहविवक्षायां तंत्रसत्वे इदं स्तदिति गुरुनिर्देशो व्यर्थः अप
न्यपदार्थाविगत्तयेतत्सत्वात्। इयस्यधातोरितिकरणे तु गौरवं। एतच्च सूत्रं भाष्ये प्रत्याख्यातं अर्थविशेषौ प्रतिपदर्थान
र्थानुप्रतिचयन्तरपि प्रत्यर्थमेवेत्याश्रयणेन। अनेकघटादिपदानां साहित्ये प्रवृत्तिरेवनानभिधानात् एकस्यैव वचने
कार्थस्य तत्प्रवृत्तिरभिधानस्वाभाव्यादिति तदाशयः द्विवचनेचीत्यादावेकशेषशब्दस्तु भाष्ये तत्परः स चोभावरसि
तुर्बहुस्याद्वृत्तिरेवेति बोध्यं। एकविभक्ताविति नैकपदंकुस्य स्पष्टार्थं। एकस्यामपि विभक्तौ यानि विरूपाणि नेत्यर्थो

धयितुं।ध्वनितं चेदं विभक्तिः सारूप्य उपलक्षणमिति भाष्ये।एकपदानुच्चारणेन समाहारद्वंद्वविषये तु जैकशेषः एकवच्चास्यान्यतरस्या
मित्यनेनैकशेषविषयपदानां समाहारद्वंद्वभावबोधनात्।न ब्राह्मणहन्त्यादिष्वितीत्याद्ये तु जातिपक्षे तौ नैव निर्वाहः।अत एव तत्र व्यक्ति
पक्षे।यत्के चिद्ब्राह्मणमहत्वा कुली स्यादिति दूषणं भाष्ये उक्तं।एकशेषस्य वार्थश्चेतरनिवृत्तिपूर्वकमवस्थानं तदाह।एकए
वेति।एके तिलुसविभक्त्यंतपर्यकं पदं।अत एव तत्र सरूपाणामित्यस्यान्वयः।तत्रार्वस्थानस्य सिद्धत्वया निवृत्ति
रेव विधेया।तत्र शिष्यमाणं लुप्यमानार्थाभिधायीति न्यायेन श्रूयमाणयस्यैवार्थबोधः।धातुष्वतु नास्य प्रवृत्तिः एकस्मिन्ननेकव्यापारा
णामिवानेकनिनामप्येकधातुत एव निर्वृत्तभेदानां प्रतीत्यानेकधातुप्रयोगाप्रसक्तेः।सरूपाणां किं।घटपटौ।शेषश्चेत्तन्मात्रोक्तौ
द्विवक्तारपि शेषः प्रसज्येत एकद्वयेतावद्वक्तोश्चैक आदेशः इत्यर्थः स्यात् तथा चाश्वश्चाश्वश्चेत्यादौ।कदाचित्घुदात्तव
त्स्वरूपसाम्यमादायोभयत्र स्वरितकादेशः प्रसज्येत।नचाह स्यादेव नस्येति फिट्सूत्रेण शाकटादे आद्युदात्तस्य देवनादेः फि
षइत्यंतोदात्तस्य चैकशेषे कदाचिदंतोदात्तस्यापि शेषः स्यादिति वाच्यं।स्वरभिन्नानां यस्योत्तरः स्वरविधिरिति वचनेनैव
निर्वाहात् एकादिदशांतसंख्यावाचिनामेकशेषद्वंद्वावनभिधानान्नभवतः विंशत्यादौ त्विष्ट एवैकशेष इत्यलं।चुटू।आ
दिर्ञिटुडव इत्यत आदिरिति षः प्रत्ययस्येत्यतः प्रत्ययस्येति चानुवर्त्तते तदाह।प्रत्ययाद्या विति।तेन वाचारेनेत्वं प्रत्य
येति किं चामराशा वित्वं माभूदिति किंतु वचणेपो चीदित्वात्पर निमित्तयलोपस्य बहिरंगासिद्धत्वात् प्रत्ययादित्वाभावान्नेत्वं।
नविभक्तौ।हलंत्यमित्यस्य निषेधोयं।अपनित्यमिदं थमोमकारपरित्राणार्थादुदित्करणात्।तेन किमोत्केति सिद्धं।प्रागदि
शीयत्वादयं विभक्तिः अत एव दानीमोमस्य नेत्वमिति तिन व्याः।भाष्ये तु प्रागदिशीये प्रत्याप्रवृत्या बुद्धिच ज्ञापकमित्युक्तात
नेंत्रेति सूत्रे लोपोव्योरिति लोपेन यकारं प्रविधिनेत्संज्ञावारिता अन्यत्रानित्यत्वस्य फलाभावाच्चैवमेवोक्तं लोपस्यासिद्धत्वा

चनांत्यत्वमिति बोध्यं।विभक्तौ किं।अचोयत्।अतो गुणे।उस्यपदांतादित्यतोपदांतादिति एङि पररूपमित्यतः पररूपमिति चानुवर्त्तते।पू
र्वादिति।अत एव नादिचीति जरयहणां चरितार्थं तद्धि रामाः रामा नित्यादौ निषेधाभावाय पररूपेण पूर्वसवर्णदीर्घबाधेहि तदैव यथ्य
स्य रूपमेव।नौ रामानिति।अनंतरापेक्षयोत्तरान्न व्यवहिता नित्यर्थः।एकवचनं सं।सु संबुद्धिरित्युचितं संबोधनेचेत्यतः संबोध
न इत्यनुवृत्तेः सप्तमी बहुवचनेन दोषः संबुद्धौ अंगस्य गुण इति व्यवहारान्न तदंतस्य संज्ञा।तस्मात्पारायणादावहस्यार्थमेवं न्या
स इति बोध्यः।संबुद्ध्याक्षिप्तस्येति संबुद्धेः प्रत्ययत्वेन यस्मात्स विहितस्तदादी त्यंशोपस्थितिः स चात्र योग्यतया पंचम्यंत इति
भावः।प्रत्ययग्रहणमात्रे यस्मात्स विहितइत्याद्युपतिस्ततइतिप्रत्ययग्रहणे यस्मात्स विहितइत्यादिपरिभाषार्थइत्यंगस्येति सू
त्रे भाष्ये स्पष्टं।अनुमानरूपाक्षेपस्तु नात्र फलाभावात् यथा पीनत्वानुपपत्त्यानुमीयमान रात्रिभोजनत्वोपपत्तिः फलं न तथाप
तत्सूत्रे तदनुमानेन संबुध्युपपत्तिर्भवति।किंच प्रत्ययस्योपस्थितावंगापेक्षत्वे पिज्ञाने तदपेक्षत्वाभावेन शास्त्रेत दाक्षेपमानाभावः
अत एवांगस्येति सूत्रे तत्स्थाने प्रत्ययइत्यधिकारः कार्यइति पक्षे प्राकरोदित्यादौ उपसर्गा सर्वमडादिस्यादित्याशंक्य प्रत्यये य
णि यस्मात्स विहितस्तदादेरिति परिभाषोपस्थित्या समाहितं भाष्येन त्वंगाक्षेपेणेति दिक्।एङ्गस्वात्।उक्तस्यार्थस्य हल्ड्या
बिति सूत्राद्धलियनुवर्त्तते।हे कतर इति।प्रकृत्यकारस्यादिलोपेनापहारादिति भावः।नन्वंगात्परस्याः संबुद्धेरवयवस्य हलो
लोप इत्युचितं।संबुद्ध्याक्षिप्तस्य संबुध्येवान्वयस्यौचित्वादत आह।कुलेतीति।अत्र परत्वात्पूर्वरूपे उभयत आश्रयतो
तादिवद्भावाभावाच्चास्वीकारेपि ह्रस्वसंबुध्योः पौर्वापर्यव्यवहारासंभवात्ताडुप्पानतिदेशाच्च ह्रस्वात् अंगात्परसंबुद्धेरभावान्मलोपो
नस्यादेवं चरस्वानुरोधादन्याक्षिप्तस्याप्यन्यत्रान्वय इतिभावः।एतदर्थमेव ह्रस्वात्पते संबुद्धेश्चेदितिव्याख्यातं।मस्यसंबुद्धिवा ना२
भावात् अपर्धा विकारेत्तेकदेशविकृतन्यायेनापिन संबुद्धित्वं।एकवचनं संबुद्धि संज्ञयोरुक्तपरिभाषा निहृत्त यातयोस्तेन न्यायेनासा

माच्च मकारस्यादेशित्वाभावाच्चनात्रस्थानिवद्भावः।अत एव रामनित्यादौ सुपि चेति दीर्घो न।न च संबुद्धित्वस्य सकारमात्रनिष्ठत्वेन
स्थानिभूतासधर्मत्वेनामः संबुद्धित्वाभावे कथमस्य संबुध्यचयकत्वमिति वाच्यं सुसंज्ञाया उकारविशिष्टसत्वेन तद्रूपस्यापि जायमा
नैकवचनसंज्ञाया विशिष्टसत्वेन संबुद्धिसंज्ञायामितसंज्ञो कारविशिष्टस्यैवोद्देश्यत्वेन तस्यान ल्विधित्वात्।एतेनादडादेशो नैवन
पुंसकत्वाभिव्यक्तौ कुलेतीति व्यर्थमित्यपास्तं।एङ्ग्रहणं किमिति।हरे विष्णोइत्यादौ अंगाधिकारस्थात्परनिमित्तापेक्षाच्च गुणात्पूर्वं ह्रस्वांतत्वा
देव सिद्धिः।सेत्रभ्रत्तीनां संबोधने प्रयोगसत्वे एङ्ग्रहणे नैव सिद्धेः त्याहारग्रहणं व्यर्थमिति प्रश्नः।हरे इति।सामर्थ्यादिवात्रसं निपातपरिभा
षाना।गुणात्संबुद्धेरिति वक्तव्ये एङ्ह्रस्वग्रहणसामर्थ्याच्च।अत एव हे सक्थि इत्यादौ लोपसिद्धिः।परत्वादिति।अभ्युच्चयः।नित्यत्वाच्चेति।
विनानवकाशत्वसंग्रहः नपुंसके त्रयोइत्यादावस्यापि लुकाबाध इत्यन्यत्र।अमिपूर्वः।पूर्वसवर्ण इत्यनुवृत्त्यैव सिद्धे पूर्वग्रहणं तु रामनि
त्यादौ द्विमात्रवारणाय।दशाकु।समाहारद्वंद्वः।अत द्विति किं कर्णसखा टालकनसंकारकार्तिकाकिरवपसंखा इत्यादिः।स्यात।अपरिग्रहणा इङः
पाकनोन।तस्य किंचे गुणेनस्यात्।तस्माद्।पुंसीति पंचम्यर्थे सप्तमी पुंसो विहितस्येत्यर्थः।तत्र विद्यमानाद्विहितस्येत्यर्थो वा।तस्मादिति
किं एतान् गाः पश्य पुंसि किं मती।अदूकु।बाधितुमिति।तिनपर्याण इमित्यत्रोपसर्गादिसमासे पीति णत्वसिद्धिरिति भावः।अयोगवाह
नामिति।न विद्यते योगो वर्णसमाम्नाये येषां ते ऽयोगाः अनुपदिष्टत्वात्।उपदिष्टैरगृहीतत्वाच्चेत्यर्थः ते च ते वाहयंति प्रयोगं निर्वाहयंति ते वा
हाः ते चानुस्वारविसर्गजिह्वामूलीयोपध्मानीययमाः अत एव उरः केणेत्यादौ कुनाति प्रसंगः अड ति रिक्त व्यवायात् तस्मादित्युपस्थि
तं निर्दिश्यग्रहणमेतत्समभिव्याहारे ऽडादिव्यतिरिक्ताव्यवहितपरं।तदुक्तं।एतेऽन्यव्यवाये प्रतिषेधो वक्तव्यो नवान्येन व्यवेतत्वादि
तिग्रंथेन।एतदुत्तरमटा व्यवायसत्वात् प्राप्नो येव।अपरैव व्यवाये इत्यर्थादित्यादि भाष्यमेकदेशिनो रुक्तिप्रयुक्तिपरं चुटुतु न श
र्व्यवायेनेति प्रतियोगिज्ञानसापेक्ष निषेधबोधक गुरुन्यासेन सिद्धे अट्कुप्वाङ्नुम्व्यवायेऽपीत्युत्या एतैरेव व्यवाये इत्यर्थवदतात स्यास्तदुक्ति

॥५२॥ विसर्गव्यवधाने पि णत्वसिद्धिः।तदुक्तं भाष्ये नार्थो नुम्ग्रहणेनानुस्वारे कृते शर्व्यवाय इत्येव सिद्धमिति।आदर्शेनेत्यादौ ४ ॥५२॥

व्यवधानात्।एतद्वार्तिकमतं।भाष्ये तु रषाभ्यामिति सूत्रे ऋवर्णात्तस्येत्यस्य प्रत्याख्यानाय व्यवाये इति योगं विभज्य अट्कुप्वाङ्नुम्भिरिष्ये
तदेतैरेवाक्षरसमाम्नायिकैर्व्यवायेनान्यैरित्यर्थकं व्याख्यातं तत्र दशवादर्शेनेत्यादौ प्राप्तिरेव नेति बोध्यं।एत्वेदति।एकार इत्यर्थः।परं
तस्य।न भाभूइति सूत्रान्नेति वर्त्तते।अत्र सूत्रे ऽनंतरस्येत्यादिव्यवस्थापकन्यायानामप्रवृत्तिर्बोध्या।अपदांतस्येत्यनुवृत्त्यैतस्य भाषि
त्र्याख्यानात्।यस्मात्प्रत्ययः यस्मादिति तदादीति तच्छब्दाकांक्षापूरणाय।तदादीति।तत्प्रकृतिरूपमादिर्यस्येत्यर्थः।प्रत्यासत्ति
न्यायलब्धार्थमाह।तस्मिन्प्रत्यये इति।गुणः कृतात्मसंस्कार इति न्यायेनात्रापि तस्मिन्निति परिभाषाप्रवृत्तिः प्रकृतिमात्रस्य तु व्य
पदेशिवद्भावेन तदादित्वं बोध्यं।स्त्रीइयतीति।इदम्शब्दात्तु पिवस्य किमिदंभ्यां वो घ इति घादेशे तस्येयादेशे इदं किमोरिती श्री
यस्येति लोपे ङीपि इयतीति रूपं।न च तत्र परत्वात् स्त्रीशब्दस्येयङ्याप्तिरूपो दोषो न यस्येति लोपस्याभीयत्वाद सिद्धत्वेनात्रावर
वाद्धेरिति वाच्यं।व्याश्रयत्वेनाभीयासिद्धत्वाप्राप्तेः।तत्र हि समानाश्रयत्वमसिद्धत्वाश्रयशास्त्र संबंधि निमित्तसमुदायान्यूना
नतिरिक्ताश्रयकत्वमस्ति च यस्येति लोपे पि पेक्षया स्त्रियाइति सूत्रेधिकस्य स्त्रीशब्दस्यापेक्षा।प्रत्यासत्त्या जादिप्रत्ययनिरूपि
तांगएवेयङ्प्रवृत्त्या स्त्रीशब्दस्य सुनिरूपितांगत्वे पि न दोषः विधिग्रहणाद्स्वभुनक्ती त्यादावदंतो दीर्घो यञीति न।तदादित्र
हणं करोमीत्यादौ विकरणस्य गुणार्थं।प्रत्ययविशिष्टस्येति।तथा सति अंजेनप्रत्ययपरत्वसाभानापत्तौ व प्रश्नेत्यसिद्धिः।
किं च राजपुरुष इत्यादौ न लुमतेति निषेधात्पूर्वपदे पदत्वाभावेन नलोपानापत्तिरिति भावः।ततोधिकस्य वेति।देवदत्त अोद
नमपाक्षीदित्यादौ देवदत्ताविदिशाब्दोत्तरसुपं निमित्तीकृत्य लुङ्पर्यंतमंगत्वात्तस्य लुङ्परत्वेन देन देवा सूर्वमप्यडापत्तिः।
अंगसंज्ञायाः प्रत्ययनिमित्तत्वाभावेन लुङादिनिरूपितांगस्येत्यर्थस्य दुर्लभत्वादिति भावः।टाङसि।अंगस्येति षष्ठ्या

अ०५।०४।०

अकारान्तस्य रेषामंगसंज्ञानिमित्तयादीनामित्यर्थ इति पदोत्तरं भाष्ये। किंच अदंतादंगादित्यर्थे पि आल्लणि मिन्नेत्यादावतिप्रसंग आल्लणेत्यस्या
पियुवोरनाकावितिसूत्रभाष्योक्तरीत्यांतर्वर्त्तिविभक्त्यांगत्वात्। अर्थवत्परिभाषाया प्रत्ययग्रहणपरिभाषया वा प्रत्ययस्यैव भिसो ग्रहणे
चेषामंगाधिकारेपागेत्यर्थः। भिसः प्रत्ययस्यैव ग्रहणे हि प्रत्यासत्यात न्निरूपितांगस्य ग्रहणमिति युज्यते वक्तुं नान्यथा इदमेव हि अ
तो भिस इत्यत्रांगाधिकारस्य प्रयोजनं भाष्ये दत्तमित्यलं। सुपि च। अतो दीर्घो यञि। इति अनुवर्त्तते यञीत्यनेनालत्वात्तदादिविधि
रित्याह। यञादाविति। ङे र्यः। चतुर्थ्येकवचनस्यैव ग्रहणं व्याख्यानादित्याह। ङ्यस्य तस्येति। संनिपात्तेति उपजीव्यविरोधन्यायमू
लेषा। संनिपात। संश्लेषस्तन्निमित्तको यो विधिः स तं संनिपातं यो विहंति तस्य विघातस्य तस्यानिमित्तमित्यर्थः। नचयञादित्वसापेक्ष
दीर्घस्य बहिरंगतया सिद्धत्वान्नात्र संनिपातविघात इति वाच्यं। आरोपितासिद्धत्वेपि वस्तुतस्तद्विघातस्य जायमानत्वेनतत्प्र
वृत्तेः। किंचांतरंगे कर्त्तव्ये बहिरंगासिद्धत्वेपि तत्र कृते ऽसिद्धत्वे मानाभावः। किंवातिदेशिकसंनिपातविघाताभावमादायैतत्प्र
वृत्तौ गोरीत्यादौ संबुद्धिलोपेपि स्थानिवत्त्वेन सह स्वनिमित्तविघाताभावात्तत्रैतस्या अप्रतिव्याप्तिपरभाष्यासंगतिः। संनिपातस्या
शास्त्रीयत्वान्नात्र स्थानिवत्त्वमिति चेत्तत्रासिद्धत्वमपि कथमिति विवदतः कार्यस्य निमित्तं ययोः संनिपातस्तयोः सूत्रे उपादत्तत्वम
पेक्षितमिति तु नाग्रहः। अत एव दाक्षि इत्यत्राकारांतप्रकृतीञ्संनिपातनिमित्तांगसंज्ञानया परिभाषया लोपस्य निमित्तं
स्य शीनेपूर्वकालत्वेनैव जनकत्वं॥ एवं स्तोकं पचतीत्यादौ फलस्यापि। घटं करोति स्म इतीत्यादौ बोद्ध घटादेः पूर्वकालत्वेन स्त्यादि निष्पादकत्वं बोध्यं। कर्त्तुरीप्सि। ईप्सि
तशब्दोत्र क्रियापरो नाभिप्रेतपरो रूढः स्पष्टं चेदं वारणार्थानामित्यत्र भाष्य कैयटयोः। कर्त्तुरिति क्तस्य च वर्त्तमाने इति कर्त्तरि षष्ठी। आप्नोतेः सन्नंतान्मतिबु
द्धीति वर्त्तमाने कर्मणि क्तः मतिरिच्छा तितत्राकारः एवं च कर्त्रा सुमिष्यमाणं कर्मेत्यर्थः। आसिश्चात्र संबंधः स च कर्त्तृपदार्थविशेषणीभूत व्यापार द्वारक एव।
उपस्थितपरित्यागेनानुपस्थितकल्पने मानाभावात्। एवं च कर्त्तृनिष्ठ व्यापार प्रयोज्य फलेन संबंधमिष्यमाणमित्यर्थः यथा तंडुलं पचतीत्यादौ फल
स्यापि व्यपदेशिवद्भावेन फलसंबंधित्वात्कर्मत्वं। अत एव तत्समानाधिकरणे स्तोकं पचतीत्यादौ कर्मत्वसिद्धिः क्तप्रत्ययोपात्त वर्त्तमानत्वं तु न विवक्षि
तं तेन कटं कृतवान् करिष्यतीत्यादि सिद्धिः। कारकं कर्मसंज्ञं स्यादिति। कारके इति प्रथमार्थे सौत्री सप्तमी तेन कारकं सत्कर्म संज्ञमित्यर्थः। संज्ञि
नः क्रियाजनकत्वं तु महासंज्ञयाक्षिप्तं। यद्वा सप्तमी यथाश्रुतैव कारकपदं च क्रियापरं। करोतीति कर्त्तृकर्मादि व्यपदेशानिति व्युत्पत्तेः जनकमित्य

× आधाराभावानुकूलव्यापारोर्थः इत्यत्र प्रवृत्तिनिमित्तधानाः ईप्सितत्वं इत्युभयत्रापि क्रियाश्रयत्वं नच संयोगानुकूलं

व्याहारः विषयत्वं सप्तम्यर्थः कारकग्रहणं च स्वरितप्रतिज्ञयैतदधिकारोक्तकर्त्रादिग्रहमेव। तेन नटस्य शृणोतीत्यादौ न कृदुत्तरपदप्रकृतिस्वरः ग्रामे वासइत्या
दौ च तत्पुरुषे सिद्धिरित्यन्यत्र विस्तरः। कर्तुः किमिति। तदभावेपि केनानुमित्या काङ्क्षायां कारकाधिकाराद्व्यापाराश्रय इति प्रश्नः। माषेष्विति। माषेषु अश्व
म् अश्वं माषनाशोमाभूदिति इत्यन्यत्र बध्नातीत्यर्थः। तदाह। कर्मण इति। तमप्ग्रहणं किमिति। अवयवद्वारा समुदायस्य प्रश्नः। कर्त्रुद्देश्यं कर्मैवास्ति
ति भावः। पयसौदनमिति। यदा कृतभोजनोपि पयोलाभेनौदनभोजने प्रवर्त्तते तदेदं प्रत्युदाहरणं तत्क्रियायाः पयउद्देश्यकत्वात् ईप्सिततमं श
ब्दस्य तु क्रियाशब्दत्वात्प्रत्ययस्तद्धा फलाश्रयत्वेनाविवक्षणान्नदोष इति भावः। तमस्य फलं नैर्मल्यवत्वं वारयतीति। तदभावे हि वारणार्थानामिति
सूत्रमस्यापवादः स्यात् एवं च माणवकस्य कर्मत्वं न स्यात् न चाग्नेरितरत्तु तार्थत्वं स्यात्पिदित्युपस्थाप्य संयोगरूपफलाश्रयत्वात्वारयतेश्च संयो
गाद्यनुकूलव्यापारजन्य इति तत्र कर्मत्वप्राप्तिरिति वाच्यं। कर्तृव्यापारवाचकधातूपात्तफलाश्रयत्वमित्यर्थस्यैव तेन लाभात्। तमग्रहणेऽपी
प्सितमात्रे सावकाशत्वपरत्वादीप्सिततमेनेन बाधः ईप्सिततमत्वं च प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनो
द्देश्यत्वं तच्च नाग्न्यादौ फलव्यापारयोः प्रकृतधात्वर्थत्वं तु प्रत्यासत्तिलभ्यं तेन यदा पुरुषार्थं माषभक्षणाय माषक्षेत्रे एवाश्वं बध्नन् तदा माषेष्वश्वं
बध्नातीत्यादौ माषाणां न कर्मत्वं बन्धनप्रयोज्यभक्षणफलाश्रयत्वेपि भक्षणस्य बध्नात्यर्थत्वाभावात् प्रयोज्यत्वनिवेशाद्गां दोग्धीत्यादौ भाग वि
नुकूलव्यापारानुकूलव्यापारार्थकदुहियोगे पयसः कर्मत्वसिद्धिरिति स्पष्टं भाष्ये। कर्मेत्यनुवर्तमाने इति। अधिशीङ्स्थासामिति सूत्रात्। आधा
र इति। कर्तृकर्मद्वारा क्रियाश्रयो हि सः तदाह। गेहमित्यादि। अनुक्ते कर्मणीति। कर्मपदेनैव बोधितकर्मसंज्ञकं कर्मत्वशक्तिमत्त्वं ग्राह्यं। सर्वकर्मवि
हितद्वितीयादीनां कर्मत्वशक्तिमानर्थः क्रियाकारकभावः संबन्धश्च तदर्थः राज्ञः पुरुष इत्यत्र राजपुरुषयोः संबन्धस्य षष्ठीवाचिका कुम्भश्रित इति क्रि
याकारकयोः संबन्धस्य द्वितीया वाचिकेति समर्थसूत्रस्थभाष्यात्। एवं च हरिं भजतीत्यादौ हरिकर्मकं भजनमिति बोधः। अभिहितेचेति। अनभि ११६
हिताधिकारादिति भावः। पंचकं प्रातिपदिकार्थपदे कर्मणि द्वितीयेत्यादेः षष्ठी चेत्यादेश्च नियमत्वमेतदभावेपि स्यादि सूत्रेणानिर्दिष्टार्थाः प्रत्य

याः स्वार्थ इति कर्मादौ संख्यायां च स्वादीनां सिद्धेः तत्र यदा कर्मणीत्यादेः षष्ठी कयोरित्यादेश्चैकवाक्यतायामेकस्मिन् कर्मणीत्यन्वयेन सूत्रजबोधे कर्माद्यर्थस्य प्राधान्यं त
दानार्थेन तेन सूत्रजबोधविषयप्रधानविषये अनुक्तार्थानामिति न्यायेन सिद्धेः यद्यपि द्विवर्द्धं सुबद्धमिति न्यायेन द्वौ ब्राह्मणौ अयतिलुनीत इत्यादौ द्योतकवाच
कयोर्द्योतकयोश्च समुच्चयो दृष्टस्तथापि प्रकृते तस्यानुसारादुक्तार्थानामिति न्यायानुसरणस्यैव वक्तुं शक्यत्वात् एवं च कर्मादीनां द्योत्यत्वमेवायु
दातु कर्मगत एकत्व इत्यन्वयेन संख्याया स्तत्त्वं तदा सूत्रमारब्धव्यं। भाष्ये एषु विभक्त्यर्थ च व्यवहारो द्योत्यतयैव न त्वेतावता तात्त्विकत्वमेवात्र मितवी
नियमस्यानुपपत्तेरिति स्पष्टं बहुषु बहुवचनमिति सूत्रे भाष्यादिषु द्योतकविषये प्युक्तार्थानामिति न्यायो धिपरीतिसूत्रे भाष्ये दृश्यते तत्र ह्यध्यागच्छतीत्यादा
वागच्छतीत्यनेनानधिकार्थयोरधिपर्योः प्रयोगस्योक्तार्थानामिति न्यायेनाभावमाशंक्य पूर्वोक्तविषये साधुत्वं उक्तार्थानां प्रयोगदर्शनेन समाहितं।
तत्र हि द्विरशब्दापूपशब्दयोर्वाचकयोः प्रकृतिप्रत्यययोर्वाचकद्योतकयोर्द्वित्व तयोर्वाचकानुवादकयोश्च समुच्चयः अत एव द्विरशब्दा
त्यादौ समासेन सुजर्थस्योक्तत्वान्न सुजिति भाष्य उक्तं। तत्र हि समासः सुचेत्युभयमपि द्योतकं सुजर्थस्य जन्मेति तत्रैव वक्ष्यते। तथा तद्धितद्विर्वचनयोर्द्योतकयो
स्तद्धितेनोक्तत्वाद्वीप्सायां न द्विर्वचनमाशंक्यादावित्ति सर्वस्य द्वे इति सूत्रभाष्ये उक्तं एवं च धातोरपि क्रियात्वक्रियाकालकारकसंख्यारूपं पंचकमर्थः।
अत एव तद्विषयेपि षष्ठी कयोरित्यादेर्भावकर्मणोरित्यादेश्च नियमत्वं भाष्यसंमतं संगच्छते अत एव दधि अजर्घौ अवेदि साद्गौ प्रातिपदिकधातुभ्यामे
व सर्वबोधः अत एव भावकर्मणोरित्यस्य तद्धातोरित्यर्थः स्नुक्रमोरिति सूत्रे भाष्ये दर्शितः द्योत्यवादेनोभयत्रापि प्रत्ययार्थस्य विशेषणत्वमेवे
त्यन्यत्र विस्तरः। प्रथमैवेति। साद्धिप्रातिपदिकार्थस्य तेनोक्तत्वेपि भवत्येवेति भावः। अत एवाभिहिते प्रथमेति वार्त्तिकं संगच्छते। तिङ् कृदित्यादि।
परिगणनादेव कटं भीष्मकुर्वित्यादौ विशेष्याद्युत्पन्नद्वितीयया गतार्थत्वेपि विशेषणात्साधुत्वात्स क्रियादशायां कटोपि कर्मभीष्मोपि श्र
यणात्। कटस्य विशिष्टकटनिष्ठकर्मत्वोक्तावपि भीष्मत्वादिगुणविशिष्टनिष्ठस्य तस्य बोधार्थं ततोपि सा। बोधस्तु परस्परं तयोर्विशिष्य विशे
षणभावेनैव कारकाणां भावनान्वयव्युत्पत्तिः साक्षात्स्वाश्रयद्वारा वान्वयविषये तितदापरिगणनं भाष्ये प्रत्याख्यातं। तिङ् कृतौ स्वप्रकृत्य
र्थं प्रतियस्य कर्मता तस्य सर्वस्यापि कर्मता मा हृतु रितिकृतः कटः सुन्दर इत्याद्युदाहरणं द्वितीयेतिदिक्। शेषइति। अत्र वदन्ति॥

कर्मादिपदेष्वात्रापि न विभक्तिवाच्यतावच्छेदकरूपेण कर्मादेर्भानमत औपगवश्चित्रगुरिति युक्तं प्रत्युदाहर्तुं तत्र च संबंधस्य येन रूपेण षष्ठ्या भानं तेनैव त
द्धितांतादिभिः समुदायशक्त्या एतदधिकाराभावे च घट इत्यादौ षष्ठ्यवाच्यत्वेन दृष्टानामेव प्रातिकार्थपदेन ग्रहणं स्यात्तद्भिन्नस्यैव च षष्ठिविधायके
शेषपदेन ग्रहणं स्यादित्यत्र यसंबंधस्य षष्ठीवाच्यत्वेन दृष्टतया प्राप्तां षष्ठीं वारयितुं सः। वस्तुतस्तु करं भीष्ममिति परिगणनेन फलमुक्तं तत्र व्या
ख्यानाच्छेषत्वान्नात्र शेषलक्षणा षष्ठी अन्यानभिहितकर्मादीनाम भावाच्चेनान्याद इत्याशंक्य न केवला प्रकृतिरिति समयः कृतो न चान्योन्य
पमाना एतमभिसंबंधमुत्सृहत्वैवक्तुमिति कृत्वा द्विरीयेत्युक्तं भाष्ये। तेनौपगवादावपि षष्ठी वारितैवेति तयोः प्रत्युदाहरणत्वमेव। तद्भुक्ते
मनेकमित्यत्र भाष्ये। चित्रगुरित्यत्र षष्ठ्यर्थस्य नियमेन भानात् षष्ठी प्राप्नोतीत्याशंक्याभिहितः सोर्थ इति भूतः प्रातिपदिकार्थः संपन्न इति प्रथमेत्युक्तं अ
नेन अशेषत्वरूपं षष्ठ्याः प्राप्तिबीजमुक्तं मंत भूत इत्यनेन चित्रग्वादौ संबंधस्यैव वृत्तिनिमित्तत्वेन प्रातिपदिकार्थपदेन ग्रहणयोग्यतोक्तेति बोध्यं। पो
कृष्टत्य इत्यादौ कारकान्वययोग्यतावच्छेदक साध्यत्वेन न क्रियादेर्भानमत एव न तत्रेतरकारकाणामन्वयः। इदं च कर्तृकर्मणोरित्यत्र निरूपयिष्यते एवं प्रा
प्तानंद इत्यादौ यत्कर्मक प्राप्तिकर्त्रानंद इति विग्रहतो बोधे समासतश्चानंदकर्तृक प्राप्तिकर्मेति बोधे विशेष्यविशेषणभावव्यत्यासेनैकार्थीभाव
कल्प्यः स्यात्। वृत्तिविग्रहयोः समानार्थत्वभंगश्च। किंच तथा सति बहुव्रीह्युपजीव्यस्यैकधर्मिबोधकत्वरूपसमानाधिकरण्यस्य हानिः। किंचैवं
प्राप्तभार्यं स प्राप्तभार्य इत्यादौ पुंवत्त्वानापत्तिः पूर्वोत्तरपदयोरेकविशेष्यकप्रतीतिजनकत्वरूपस्य सामानाधिकरण्याभावात्। तस्मात्
कालाः परिमाणिनेत्यादिसूत्रभाष्योक्तस्य वृत्तिविग्रहयोः समानार्थत्वस्य निर्वाहार्थं च वृत्तिविग्रहयोः प्राप्तिकर्त्रानंद कर्मेत्येव बोधः विशे
ष्येतन्निरूपकत्वबाधेन तु विशेषणभूतप्राप्तौ तत्पर्यवसानं स्वगृध स्त इतिवत्। शाब्दबोधस्तु विशिष्टे तदारोपेणोपपाद्यः एवं चात्र शाब्दात्के
मदिः क्रियाजनकत्वेन विभक्तिवाच्यतावच्छेदकीभूतशक्तिमत्त्वेन च न भानमतो न विभक्तिप्रसक्तिरत एव गतिकारकोपपदादिति सूत्रे गति ११७
कारकोपपदादिति किमर्थं परमं कारकं परमकारकमिति प्रतीकमुपादाय यथा संप्रदानादयः शब्दाः न कारकरूपतां प्रतिपादयंतीति तथा का

रकशब्दोपीति कदंता हि क्रियायोग्यता विशिष्टद्रव्यवाचिनो न तद्भूतां कारकशक्तिं प्रतिपादयंतीति कैयटेनोक्तं। अत एव तस्य कर्मत्वस्य न क्रियान्वयनियमः अ
न्यथा कारकशक्तेः क्रियाविशेषणत्वनियमेन कर्मादिप्राधान्यानापत्तिः एवं कर्मादिपदैरिव पचकादिपदैरपि न विभक्तिप्रयोजकरूपेण कर्मादीनां
भानं तिङ्कृत्तद्धितसमासैरभिधाने इत्यस्यायमर्थः यत्तैरभिधाने तत्तच्छक्त्यावच्छेदेन न भानमिति विभक्त्यप्रसक्तिरत्रै[illegible]नभिहित इति तात्पर्य
ग्राहकं। धेनित्तं चेदं सुप आत्मन इति सूत्रे भाष्ये तत्र हि इष्टः पुत्र इष्यते पुत्र इत्यर्थे क्यच मास्तु क्य स्वशब्देनोक्तत्वान्नेति स[illegible]माहितं इष्टशब्दस्य सामाना
धिकरण्यात्तु तार्थे कर्मत्वावगतावपि पुत्र इति सुबन्तं न कर्मवाचीति न ततः क्यच् इति तद्भावः स्वं कर्मत्वं तद्वाचकशब्देन पुत्रगतं कर्मत्वमुक्तं न तु पुत्र
शब्दस्य तत्र वृत्तिरित्यस्य स्वरार्थः सुप आत्मन इति सूत्रस्य कर्मत्वविशिष्टबोधकसुबंतादित्यर्थ इति तदाशयः वस्तुतः कर्मत्वविशिष्टयोर्थस्तद्बोधक
दित्यर्थे इह भवंत इत्यादिना समाध्यंतरमुक्तं वाक्ये फलं विशेष्यं वृत्तौ व्यापार इति समानार्थत्वाभावात्तत्रार्थे वृत्तिर्नेतीत्याहुः। व्याख्यानुसारेणोक्तस्य
प्रायेणास्य फलमाह। कचिदिति। परे तु अत्र तु मुनः साधुत्वायेष्यत इत्यध्याहार आवश्यकः अन्यथा क्रियोपपदत्वाभावाच्छकादियोगाभावा क्रियोर्थ
च्चेसदुर्लभः स्यात्। अध्याहारे तु इच्छार्थेषु तुमुनिति सुलभः। विषयत्वेपि संबध्यच्छि तुमिष्यत इति यत्तत् साधुतमन्याय्यमित्यर्थः एवं चाध्याहृत
तिङाभिधानान्न द्वितीया। तादृशेच्छाया अन्याय्यत्वं च तद्विषयस्यान्याय्यत्वेन। एवममुं नारद इत्यबोधि स इत्यादौ नारद इति तिस्त्रीकल्पिज्ञानाकारा
नुकरणं। नारद इत्येतच्छब्दाभिलप्यमानाकारो बोध इत्यर्थ इति प्रथमा तस्या प्रातिपदिकत्वान्न तत्र द्वितीया अत एवाधिहरीत्यादौ समासः तद्वचन
सामर्थ्येन हि अस्य परिगणनत्वकल्पनैव युक्ता। अत एवाभ्रे अपौ अप इत्यादौ सप्तमी। किंच निपातेनाभिधाने पि प्रातिपदिकाद्भूत तत्तच्छक्तिमत्त्वे
नैव [illegible] भानमिति तत्र विभक्तिः सुलभा शब्दशक्तिस्वभावादस्यैवार्थस्य द्योतको हि निपातः अत एव परिगणनं व्याख्याने पि न दोष इत्याहुः।
तथा युक्तं। तत्त्वं च स्वसमभिव्याहृतधात्वर्थप्रधानव्यापारप्रयोज्यतद्धात्वर्थफलाश्रयत्वरूपं। पराधीनतया विषं भुंजाने पि भुजिक्रियाफलाश्र
यत्वेनोद्देश्यत्वात्पूर्वसूत्रेणैव सिद्धं तदुक्तं भाष्ये अपातश्च विषमीप्सितं यस्तु भक्षयतीति तस्माच्चोरान्पश्यतीति द्योदाहरणे विषयेंद्रियसंबंधा
दृश्यमाना अपि तेन दर्शनोद्देश्याः अपि तु अनिच्छन्दर्शना एवेति स्पष्टं भाष्यकैयटयोः। एवं च तत्र पूर्वेणाप्राप्तौ वचनं। अनीप्सितमनुद्देश्य

११८ तच्चवेधमुपासीनं च। ध्रुवमिति। यथा स्पृश्यमानस्य गंगादेः स्पर्शादिजन्यसंयोगादिफलाधारत्वं तथैव तरणादेरपीति भावः। अनीप्सितपदाभावे ई
प्सितस्य प्रकर्षहीनस्याप्यनेन संज्ञा प्राप्तौ वारणार्थानामित्यनवकाशं स्यात्। तथायुक्तमिति किं। विषौदनं भुंक्ते इत्यादौ करणत्वमात्रविवक्षायां
विषस्य मा भूत्। प्रयागात्काशीं गच्छतीत्यत्र प्रयागस्य च मा भूत्। तस्य चेतु प्रकृतधात्वर्थफलाश्रयत्वरूपतत्त्वाभावान्न दोषः। अपादानादि
विशेषैरिति। तद्रूपेणाभासमानमित्यर्थः। अकथितशब्दो ह्यसंकीर्तितपरो नाप्रधानपर इति भावः। एवं च पूर्वविधिविषयप्रसक्तिपू
र्वकं तदविवक्षायां सर्वथा पूर्वविधेरप्रसक्तौ चेतत्प्रवृत्तिरिति बोध्यं। अपादानत्वादिविवक्षायां पंचम्यादेव। केन रूपेण तर्हि विवक्षे
ति चेत्कर्मत्वेनेति गृहाण कारकत्वव्याप्यसंज्ञानां स्वबोध्ये र्थे कर्मत्वादिशक्तिमत्त्वबोधकत्वात्बोधोपित थैव। तत्त्वपष्ठ्याभावे सर्वत्र षष्ठी
प्राप्त्या सर्वासां तदपवादपवादत्वेन तदपवादत्वमात्रेण संबंधार्थकत्वं न युक्तं। अत एव कर्मणि द्वितीयेत्यस्य न वैरूप्यं। अत एवैतत्सू
त्रशेषे भाष्येऽनेनैव सिद्धे अपायसूत्रद्वयवैयर्थ्यमाशंक्येप्सितमात्रस्यानेन संज्ञायां वारणार्थानामिति सूत्रस्यानवकाशत्वेमाणव
कादपि पंचमी स्यादिति दिद्र्दीप्सिततममित्याद्यारब्धव्यमित्युक्तं। एतेन दुहादीनां व्यापारद्वयार्थत्वे कर्तुरिति कर्मत्वेतत्त्वेनाविवक्षा
यामप्यनेन कर्मत्वमिति परास्तं वदतो व्याघातात्। अत एव कर्तुरित्यनेन सिद्धिमाश्रित्यास्य वैयर्थ्यं भाष्येनाशंक्तं। कारकमिति।
क्रियाजनकमित्यर्थः। नन्वेवं नरस्य स्थणोतीत्यादावतिप्रसंगः सर्वथा तत्रतदप्राप्तेः गीतद्वाराच तस्य क्रियाजनकत्वं न च तस्य कर्मत्व
कृत्वाभावस्तद्दशायां पि परिगणनलभ्यत्वात नरस्यापादानत्वविवक्षातु न कदापि। आख्यातेति सूत्रे उपयोगग्रहणेनानुपयोगे आख्यातुरपा
दानत्वाविवक्षाया बोधनात्। ततः परिगणनमाह। दुह्याचीति। कर्मयुगिति। कर्मयुक्त धात्वर्थव्यापारात्प्राकृतदनंतरं वा तत्संबद्धत्वं तत्र बुद्धि
शास्यतिरिक्ते धात्वर्थव्यापारात्प्रागेव तत्संबद्धत्वं तद्विषये तु तदनंतरं तत्संबद्धत्वं बोध्यं तत्र सति संभवे प्राकृतत्संबद्धमेव यात्यं एतेन यथा ११८
स्यादेरपि तद्व्यापारादनंतरं पयः संबद्धत्वेन कर्मत्वं तेषां दुर्वारमित्यपास्तं तेन गां पयो दोग्धि स्थाल्यां स्थाल्यामित्यादौ स्थाल्यादेरधिकरणत्वा

न१ विवक्षायामपि नानेन कर्मत्वं। एवं चापादानादीत्यादिशब्देनापादानसंप्रदानाधिकरणान्यव। करणं तु न गृह्यते हस्तादेः करणस्य पय आदिकर्म युक्ता
भावात्। यद्यपि गां दोग्धीत्यादेर्गोः पयस्त्यजति गवा पयस्त्याजयतीत्याद्यर्थप्रतीत्या कर्तुरीप्सिततममित्येव सिद्धं प्रधानकर्मत्वं च गवादीना
मिति तत्रैव लादिसिद्धिः प्रधानकर्मत्वं च कर्तृप्रत्ययसमभिव्याहारे कर्तृनिष्ठप्रधानव्यापारविशेषणफलाश्रयत्वं एवं तविषये ईदृशात्प्र
धानस्य कर्तृत्वप्रकृते च पयो निष्ठविभागानुकूलो यो गोष्ठनिष्ठो व्यापारस्तदनुकूलव्यापारस्य शब्दतः प्राधान्यात्तगर्गोः शतं दंडयतामित्यत्रगा
र्गाणामेव तत्त्वमुद्देश्यत्वरूपमार्थप्राधान्यं तु शतस्येत्यनुद्देश्यत्वे नाप्रधानगर्गानुरोधान्न शतात्प्रवृत्तिरिति तिनयद्धि सूत्रस्य भाष्यविरोधः एव
मेव शाकारमसि चोदितइत्याद्युपपत्तिः अत एव प्रधानकर्मत्याख्येयेलादीनाहुर्द्विकर्मणां प्रप्रधानेदुहादीनां एयंते कर्तुश्च कर्मण इत्युक्तं
उत्तरार्धोपात्तातिरिक्ताद्विकर्मकाः केइति प्रश्ने नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च द्विकर्मकेषु ग्रहणं द्रष्टव्यमिति निश्चयइत्युक्तं तत्रान्यादिग्रह
णं तव कुर्विवन्ममव्यापारद्वयार्थकधातूपलक्षणं। एवं चेदं सूत्रं व्यर्थं तथापि यदा पयोनिष्ठविभागानुकूलव्यापारादि [illegible] रेव धात्वर्थस्तदापाद
नत्वाद्यविवक्षायामन्येनासिद्धकर्मत्वार्थमिदमावश्यकं तदा चाप्रधाने दुहादीनामित्युक्ते प्रधाने गवादावेव लादयः अप्रधानकर्मत्वं चोक्तप्र
धानकर्मभिन्नकर्मत्वं। तच्चोक्तार्थे गवादीनामस्त्येव फलानाश्रयत्वात्। गां दोग्धीति। अंततः स्थिताद्गवद्रव्यनिष्ठविभागानुकूलव्यापारो दुहे
रर्थः तत्र गोरपादानत्वाविवक्षायामनेन कर्मत्वं। तद्विवक्षायां पंचमी गोः पयस्यन्वये षष्ठी द्विकर्मकेषु गवादीनां कर्मत्वाविवक्षायां क्रियान्व
ये षष्ठी न अनभिधानात्। षष्ठ्यंतस्यस्यान्वययोग्यनामसमभिव्याहारे तत्रैवान्वयस्यौत्सर्गिकत्वेत्युत्सर्गशक्त्या। अत एव तंडुलानामोदनं पचतीत्यत्र षष्ठ्यर्थश्चैव पचिर्विकारयोगे षष्ठीत्येव कर्तुरिति सूत्रे भाष्ये उक्तमिति दिक्। बलिं याचतेइति। यद्यपि स्वत्वनिवृत्तिस्वत्वोत्पत्त्युभयानु
कूलो व्यापारो याचेरर्थः स्वत्वेबले निरूपकतयान्वयस्तदानेन कर्मत्वं पूर्वविषयस्य कस्याप्यभावात्। न चात्रापादानत्वप्रसक्तिः विभागस्य धात्व
र्थत्वाभावात्। न याचनादेवापायो भवति याचितायदि ददाति तदापायेन युज्यतइति भाष्योक्तेः असंकीर्तितपर्यायाकथितग्रहणे गां दोग्धि गां

प०२१०२१०क०१०

११९

ग्धीति न याचिपृच्छिभिक्षियोगे कर्मसंज्ञेत्येषा व्यवस्थेति च कैयटोक्तेश्च। व्यापारद्वयार्थत्वे तु कर्तुरिति कर्मत्वं बोध्यं। वसुधायास्स्वामित्वसंबंधात् कर्मयुक्तं।
अविनीतमिति। याचेः स्वीकारानुकूलव्यापारोर्थः स्वीकारश्चेदमवश्यं करिष्यामीति शब्दप्रयोगजनको ज्ञानविशेषः विनयेन च तद्विषयज्ञानस्य
संसंबंधः। तंडुलानिति। तंडुलान्विक्लेदयन्नोदनं निर्वर्तयतीत्यर्थस्य कर्तुरिति सूत्रस्थभाष्यकैयटसंमतत्वेन कर्तुरित्येव कर्मत्वसिद्धेर
स्यैतदुदाहरणत्वं चिंत्यं। एवं स्वस्वसंप्रदानकदानानुकूलव्यापारानुकूलशासनरूपव्यापारार्थकदंड्यादियोगे पि तेनैव सिद्धं एवं व्यापारद्वयार्थत्वेन स
ति प्रयोगे बहूनां धातूनां द्विकर्मकत्वं बोध्यं। व्रजमिति। निर्गमप्रतिबंधपूर्वकयत्र किंचिदधिकरणकचिरस्थित्यनुकूलव्यापारो वरुधेरर्थः व्र
जे गौस्तिष्ठति तत्र तां निर्गमप्रतिबंधपूर्वकं चिरं स्थाययतीति संप्रत्ययात्। अधिकरणत्वाविवक्षायामनेन कर्मसंज्ञा। व्यापारद्वयार्थत्वे
कर्तुरिति कर्मत्वं। पंथानमिति। जिज्ञासाविषयार्थज्ञानानुकूलः केन यथा गंतव्यमित्यभिलाषादिरूपो व्यापारः पृच्छेरर्थः ज्ञानविषयत्वेन पथः कर्मत्वं मा
णवकेन च तज्ज्ञानाश्रयत्वसंबंधः अपादानत्वं तु नात्र न प्रश्नादेवायाथो भवति पृष्टो सौ यद्याचष्टे तदा पायेन युज्यते इति भाष्योक्तेः संप्रदानत्वमपि
न कर्मसंबंधवत्वेनेच्छाविषयत्वाभावात्। व्यापारद्वयार्थत्वे तु कर्तुरिति कर्मत्वं। विभागपूर्वकादाने चिनूचूरुष्फलान्यादत्ते इत्यर्थात् अपादानत्वा
विवक्षायामनेन कर्मत्वम्। धर्मं ब्रूते इत्यादि। ज्ञानानुकूलः शब्दप्रयोगरूपो व्यापारो ब्रूञर्थः प्रवृत्तिपर्यवसायी सशासेः स च धर्मं कुर्वित्यादि
विधिघटितोपदेशरूपः विषयतोच्च फलतावच्छेदकः संबंधः वचनादिकर्मणा धर्मेण माणवकस्याभिप्रेयमाणत्वात्तस्य संप्रदानत्वं। तदविव
क्षायां चानेन कर्मत्वं। प्रयत्नकर्तृव्यापारानंतरं तज्ज्ञानाश्रयत्वरूपो माणवकस्य धर्मेण संबंधः नयतेः संयोगानुकूलव्यापारानुकूलव्यापा
रोर्थः स एव स्कंधग्रहणादिपूर्वो वहेरर्थः गत्यनुकूलव्यापारविशेषः कृषेः बलात्कारग्रहणपूर्वकं देशांतरप्रापणं हरतेः एषु कर्तुरिति कर्मत्वं ११९
बोध्यं। एवं च भाष्यानुक्तानामत्र ग्रहणं पाचामनुरोधेनेति तत्वं। भाष्योक्तादिदुहियाचिरुधिप्रच्छिभिक्षिचिञ्ब्रूशासयः। अर्थनिबंध
नेयमिति। इदमपि कैयटानुरोधेन। वस्तुतो येषां मते दर्थानां द्विकर्मकत्वमिष्टं तेषां व्यापारद्वयार्थत्वेन कर्तुरित्येव सिद्धमन्यथा।

अख्यातोपयोग इति सूत्रभाष्योक्तपरिगणनत्वभंगापत्तिः किंच भाष्ये भिक्षिग्रहणवैयर्थ्यापत्तिः उभयार्थकयाचिग्रहणेनैव सिद्धेरित्यन्ये। अकर्मकधातुभि
रिति। तेषां स्वकरणकव्यापनेच्छा व्याप्तिरूपफलाश्रयत्वेन कर्तुरिति कर्मत्वं मासमास्त इत्यादे मासमासनेन व्याप्नोतीत्यादिक्रमेणार्थ इति भावः। यत्किंचने
व कर्मसंज्ञाविधायकमिति तन्न। भाष्ये तादृशवचनानुपलंभात्। अकथितं चेति सूत्रे ऽकर्मकप्रकृतिकण्यंतानां कथं द्विकर्मकत्वमिति शंकायां कालभा
वाध्वगंतव्याः कर्मसंज्ञा ह्यकर्मणामिह श्च इति भाष्ये उक्तं तच्च न विधायकं। हिशब्दघटितत्वात्। किंच कालाध्वनोरिति सूत्रे कालाध्वनोः कर्मवदिति वक्तव्य
मिति वार्त्तिकप्रत्याख्याने प्राकृतमेवैतत्कर्म यथा कटं करोतीत्युक्तं अस्य वचनत्वे उक्तं वा प्राकृतं वेति विवदेत तस्मात् उत्तरीत्या कालादीनां तद्योगे
कर्मतया द्विकर्मकत्वमित्येव तत्तात्पर्यं। अत एव समासमां विजायत इति सूत्रे समायां समायां विजायत इति विग्रहकथनपरं भाष्यं संगच्छते अन्य
थाने न द्वितीयाया एव तत्र साधुत्वेन तदसंगतिः स्पष्टैव। अत एवोक्तभाष्यार्थानुवादिका हरेः कारिका। कालभावाध्वदेशानामंतर्भूतक्रियांतरैः सर्वै
रकर्मकेष्वपि कर्मत्वमुपजायत इति सकर्मकविषयेप्यनेन प्रकारेण कालादिकर्मणा सकर्मकत्वं तुल्यन्यायात्। तेन मासमोदनं पचतीति भवति तत्र कालादि
कर्माप्रधानं द्रव्यकर्म तु प्रधानं कालस्याधारत्वेन द्रव्यद्वारैव क्रियासंबंधात्। किंच कठिनयाकस्य महापरिमाणस्य बहुसंख्यस्य च चिरेण पाको
न्यस्याचिरेणेति द्रव्यधर्मपर्यालोच्य क्रियासु कालयोग इति सबहिरंगः। अपि च साधनसंबंधे जाते क्रियायाः परिच्छेदकत्वात् कालस्या
दृतेति सबहिरंगः। अकर्मकव्यवहारस्तु धातूनां द्रव्यकर्माभावनिमित्तक एव अत्र बीजं वक्ष्यते। तदुक्तं अपतस्तेः कर्मभिर्युक्तो धातुर्द्व्यैरक
र्मकः। तस्य कर्मणि भावे च निमित्तत्वाय कल्प्यत इति। गतिबुद्धि। [illegible] शब्दः कर्मकारकं येषामित्यर्थः व्याख्यानात् तेन ह्वाययति जंदयणो
र्नायणा विति। णिचनुत्पन्नेडर्थः। अत्र णिजहेतुमत्स्येव स एव विपत्र्यापि स एव व्याख्यानात् अत एव भट्टेर्निधपरितार्थः सहि नित्यण्यं तच्छुरादि रि
ति बोध्यं। अन्यानधीनत्व स्वरूपार्थप्राधान्यशब्दप्राधान्ययोः प्रयोजकव्यापारे सत्वेन तदनुरोधि कर्मत्वस्यांतरंगत्वादपि कर्तृत्वबाहुल्यत्वेन कर्तुरित्येव
सिद्धे णिजर्थेनाप्यमानस्य चेदुत्यर्थादीनामेवेति नियमार्थमिदं तेन पाचयत्यादियोगे नेति हेतुमति चेति सूत्रे भाष्यकृतः प्रधानकार्यं सर्वतो बलवदिति
व्याकडारसूत्रे कैयटे स्पष्टं तेन गत्यादियोगे प्रयोज्यस्य कर्मत्वशक्तिमत्ता पाचयत्यादियोगे कर्तृत्वशक्तिमत्वमेवेति बोध्यं। गमयति देवदत्तेनेति। यज्ञ

तीति। शब्दं करोतीत्यर्थे शब्दवैरेत्यादिकाः ताच्छिल्ये। परेतु शब्दक्रियाणामित्यर्थेऽत्रायय तिशब्दाययर्द

१२० सत्तकर्मकगमनानुकूलदेवदत्तकर्तृकव्यापारानुकूलो विष्णुमित्रकर्तृको व्यापार इतिबोधः। अत्र देवदत्तस्य न कर्मत्वं। नियंत्रिति। नियंतर्कर्तृकं यत्तत्प्रकृति
सत्तकर्मकगमनानुकूलदेवदत्तकर्तृकव्यापारानुकूलो विष्णुमित्रकर्तृको व्यापार इति बोध इति ग्रामं प्रापय इत्यादौ तत्राप्ते गतिं विनाऽसंभवाद्धि लगत्यापि गत्यर्थत्वमित्यभिमानेन वार्त्तिकारंभः प्रभुत्वं
भूतस्येत्यर्थः। प्रापणार्थवहेर्गत्यर्थत्वाभावेपि ग्रामं प्रापय इत्यादौ तत्प्राप्ते गतिं विनाऽसंभवाद्धि ... एवं ग्रामं प्रापयति देवदत्तेनेवेति ध निर्तं नगतीति सूत्रेनवेति सूत्रे च भाष्ये नयतेस्तु
प्रास इत्यादौ नश्शहारूपः तत्र कर्तृरिक्त प्रादिकर्मत्ति बोध्यः। अत एव ग्रामं प्रापय तिदेवदत्तेनेवेति धनिर्तं नगतीति सूत्रेनवेति सूत्रे च भाष्ये नयतेस्तु
प्रास इत्यादौ न शहारूपः तत्र कर्तृरिक्त प्रादि कर्मत्ति बोध्यः। आदिखाद्योरिति। अत्यवसानार्थत्वात् प्राप्तिः प्रत्यवसानं भक्षणं
याप्रापण इत्यादेरिव गत्युपसर्जनं प्रापणं वाच्यमिति तस्य गत्यर्थत्वमेवेति बोध्यं। आदिखाद्योरिति। अत्यवसानार्थत्वात् प्राप्तिः प्रत्यवसानं भक्षणं
भक्षयति बलीवर्दानिति। हिंसार्थे भक्षणे भक्षेर्वृत्तिः। परकीयसस्यभक्षणेन परो हिंसितो भवतीति तत्स्वामिनोत्र हिंसाऽऽस्था। जल्पयतीति।
पुत्रो धर्मं जल्पति तत्बोधकवाक्यानि कथयति देवदत्तो जल्पयति धर्मं पुत्रमित्यर्थः। शब्दाययतीति अनेन स्यतीनां प्रतिषेध उक्तो भाष्येन तु शब्दकर्मकाणामि
तिपक्षे एवं च तत्र पक्षे भाष्ये शब्दापयतो प्रतिषेधानुक्त्याऽकर्मकशब्दाययतिसत्वेन मानं शब्दस्य धात्वर्थसंगृहीतत्वे पिबहिर्भूतपुत्रादिकर्मणो भावे मानाभावात्
इयता विवेति चिंत्योयं निषेध इत्याहुः। येषामिति। अयंभावः गतिबुद्धिप्रत्यवसानार्थशब्दकर्मकाणामणि कर्तासणविति सूत्रं नियमस्य सजातीयापेक्षत्वा
सकर्मणां चेदेषामेवेति नियमपरं एवं सिद्धेऽकर्मकग्रहणं सामर्थ्याद्देशकालादिभिन्नकर्माभाववतोकर्मकग्रहणेन ग्रहणार्थं तत्र सामान्यापेक्षं ज्ञापकं शास्त्रे
अकर्मकपदेने दृशानामेव ग्रहणमिति तेन मासमास्यत इत्यादौ भावे लो भवति। न त्विति। तदविवक्षाहि द्विधा तदन्वययोग्यधात्वर्थस्यागात्। सत्वे च तत्रसे
बंधित्वेनान्वयविवक्षणाद्वेति भावः। इदं कैयटानुरोधेन। परेतु अविवक्षितकर्मणामप्यकर्मकपदेन ग्रहणं। त्वादीनामविवक्षितकर्मकेभ्यः कृतपूर्वी
कटमित्यादौ भाष्यकृता कैयटेन चांगीकारात्। लुनातेर्निवृत्तप्रेषणात् निचिलावयति केदारं देवदत्त इत्यादौ केदारस्य कर्मणि द्वितीयांतस्य ण्य
णाविव तत्र कैयटेन प्रयोगाच्च। न चात्रार्थांतरे वृत्त्याऽकर्मकत्वं नत्वविवक्षयेति वाच्यं तल्लप्रत्यभिज्ञायार्थांतरत्वाभावात्तदुदाहरणं तु स्यंदत इत्याद्यर्थ
कं नदी वहतीत्याद्याकरे स्पष्टं। अधीगर्थेति सूत्रे कर्मणः शेषत्वविवक्षयाऽकर्मकत्वे मातुः स्मर्यत इत्यत्र भावे लस्य भाष्येऽदाहृतत्वाच्च। यत्तु प्रकृत ११२०
सूत्रे भाष्ये कालकर्मणामुपसंख्यानं कर्त्तव्यं न चैके चिकालभावाध्वभिरकर्मका इत्येवं विज्ञास्यामः क्वचिद्येकर्मका इतीत्युक्तं कचिदित्यस्य कालादेः
कर्मसंज्ञाप्रयोजकव्याख्यादिरहितेर्थ इत्यर्थः तस्यायंभावः कुरूनिति या कर्मकपदसामर्थ्यात्तत्र शास्त्रेऽकर्मकपदस्यावस्थांतरे कर्मरहितेइत्यर्थ

६

इतितादृशार्थं च सर्वथाऽप्यकर्माभावात् तदविवक्षणाद्वेत्युभयविधमपि कृतपूर्वीत्यादिभाष्याद्वित्वं विनिगमनाविरहाच्च। अत एवाकर्मकाधिकारे शुश्रूषस्यादिभ्य आ
त्मनेपदविधानं संगच्छते अकर्मकशब्देन च धातुरेवान्यपदार्थः अर्थभेदेन च शब्दभेदः कर्मत्वेन कालाद्यतिरिक्तकर्मान्वय्यर्थकत्वं च तत्त्वमिति बोध्यं। न च केचिद्
इतिभाष्येण धातुमात्रस्य कालकर्मकार्थवृत्तित्वमिति दर्शितं यद्या। यत्कर्म भवति न च भवति तेनाकर्मकाणां न चैतत्कर्मकं चिदपि न भवतीति भाष्योक्तपक्षो
तरे एतत्सामर्थ्यात्त्व्यभिचारि इत्यकर्मरहितेत्यर्थो बोधितः एवं च मासादिप्रयोगेपि तदवस्थायामेवाकर्मकत्वं बोध्यं एतेनात्र सूत्रे न च केचिदिति प्रतीक
मुपादाय कालादेरविवक्षयातोऽकर्मकत्वसंभवोस्त्येवेत्याशंक्य यंता विद्यमानकर्मकाणामेवात्र स्त्वेऽकर्मकपदेन ग्रहणमन्यथापचारीनामविवक्षितक
र्मत्वेलादयः स्युरिति यत्कैयटेनोक्तं तत्परास्तं। अतिप्रसंगस्त्वनभिधानाद्वारणीय इति वदंति। हृक्रोः। तत्राप्यपूर्वस्य हृरतेर्भक्षणार्थत्वादिकारार्थक
रोतेश्चाकर्मकत्वात्प्राप्तेर्थांतरे चाप्राप्ते उभयत्र विभाषेयं। अभिवादि। हेतुमण्यंतस्याभिवादेर्दृशिप्रकृतिकण्यंतस्य चेत्यर्थः। अधिशी। आधार इ
त्यनुवर्त्तते तस्यैव कर्मत्वप्राप्तिमत्तानेन बोध्यते। अभिनि। व्याख्यानादभिनीतिद्वंद्वे तत्पूर्वो विशितिसमासः अभिनिवेश आग्रहः। सन्मार्गविषयका
ग्रहवानित्यर्थः व्यवस्थितेतिपरिक्रयण इत्यतोन्यतरस्यांग्रहणानुवृत्तेरस्य वैकल्पिकत्वं अतिप्रसंगस्त्वनभिधानाद्वारणीयः एतच्चैवर्थे सूभिनिविशा
नामितिप्रतीके समर्थसूत्रे कैयटे। परे त्वेतद्भाष्यप्रयोगादभिनिविशित्यानुपूर्व्या अविकृतायाय अश्रवणं तत्रैवेतत्सूत्रप्रवृत्तिरन्यतरस्यांग्रहणानुवृ
त्तौ व्यवस्थितविभाषाश्रयणेऽवचनमानमित्याहुः। उपान्वि। अनुग्विकरणत्वाभ्द्वादेरेव ग्रहणमित्याह। वसतेरिति। भाष्येऽस्यर्थस्य नेत्युक्तं मशकार्थो
धूम इतिवद्दृशि निवृत्त्यर्थस्येति तदर्थस्तत्फलितमाह। अभुक्त्यर्थस्येति। उपोष्य रजनीमेकामित्यादौ कालाध्वनोरिति द्वितीया ग्रामे उपवसतीत्य
त्रग्रामे वसन् त्रिरात्रमुपवसतीत्यर्थ इति इदं न कार्यमिति भाष्ये स्पष्टं। उपपद विभक्तिमाह। उभेति। उपपद विभक्तीनां संबंधोर्थः विशिष्यार्थानुक्तेः प्र
स्थपवादत्वाच्च। उभसर्वयोस्तसौ विति विग्रहः उभौ उभयशब्दनिष्पत्तिः प्रकृतित्वमुभशब्दे आरोप्यतत्प्रकृतिकत्वं तस्यार्थः उभयशब्द सर्वशब्दप्रक
तिकतसंतयोगे इत्यर्थः। आम्रेडितांतेष्विति। कृतद्विर्वचनेष्वित्यर्थः। धिकूलेति। धिगर्थो निंदा। कृत्साभक्तसंबंधि निंदेत्यर्थः। उपर्यादीनां सामीप्य
धर्मशादिवृत्तित्वमर्थः। अभितः परितः इत्यत्र पर्यभिभ्यां चेति तसिल्। तत्राद्यस्योभयत इत्यर्थो अंत्यस्य सर्वत इत्यर्थ इति पर्यभिभ्यां चेत्यत्र भाष्ये।

श०श०का०
१२१

अंतरांतरे। अंतरेणेत्यत्राबंतसाहचर्यादिंतरेत्यत्राबंतं अंतरेणत्यत्र तृतीयांतसाहचर्यादंतरेणेत्यत्र तृतीयांतं साहचर्यं सादृश्यं तच्च यथास्य गोर्द्वितीयेनार्थ इति गोरेवानी
यते नाश्वोन गर्दभ इति दृष्टांतपरभाष्येण सदृशानामेव प्रयोगे सहायत्वेत्यर्थस्य प्रतिपादनात् तेन किमनयोरंतरेणज्ञातेनेति सिद्धमंतरेण विशेषेणेत्य
र्थः एवं चैतयोरव्यययोरेव ग्रहणं। यद्यंतराशब्दस्य प्रथमैकवचनांतस्यानभिधानादंतराशब्दस्यानुपूर्वीकमव्ययमेव प्रयोगेषु दृश्यत इति तत्साहचर्या
दंतरेणेत्यप्यव्ययमेव। तदुक्तं भाष्येंतराशब्दोयमदृष्टापचारो निपात एवेती तिबोध्यं। अत्र वस्तुतः संबंधो मध्यस्यान्वयी मध्यार्थांतराशब्दयोगे द्वि
तीयार्थः तस्यैव संबंधत्वेन बोधे षष्ठी। हर्यादि पदात्तु न द्वितीया। उपपदविभक्तेरिति न्यायेन तत्र प्रथमाया एव प्राप्तेः युक्तग्रहणं तु स्पष्टार्थं। अधिक
येति। विभाषाकृञीत्यंतमिति बोध्यं। महासंज्ञाकरणं त्वन्वर्थत्वाय कर्म क्रियां प्रोक्तवंतः कर्मप्रवचनीयाः बाहुलकात्कर्तरि भूते नीयर् तेन संप्रति क्रियां न
द्योतयंति किंतु क्रियानिरूपितं संबंधविशेषं द्योतयंति कचित् संबंधविशेषद्योतके पि वचनसामर्थ्यात्संज्ञा यथाधिपरी अनर्थकौ सुःजायामिति च। नि
पातसंज्ञया समावेशस्त्वस्या अप्युक्तः। लक्षण इति। तत्संबंधे लक्ष्यलक्षणभावरूपे ऽनुना द्योत्ये इत्यर्थः। अपवाद इति। तद्योत्यसंबंधस्य क्रियान्व
यात्तयोः प्राप्तिः तेन प्रकृते नो गति र्गताविति निघातो न द्वितीयार्थो लक्ष्यलक्षणभावः संबंधो हेतुश्चेत्यनुना द्योत्यते लक्षणत्वं च ज्ञाजनकज्ञानविषय नर्द
हेतु ३० त्वं जपज्ञानेन हि कालविशेषविशिष्टाय इष्टिज्ञानप्यते तया भिन्नं ज्ञानजन्यज्ञानविषयो वर्षणमिति बोध इत्याह। हेतुभूतेति। परापीति। कर्मप्रव
चनीयसंज्ञा बाधको ऽपि हेतुत्वाविवक्षायां हेतु तृतीया बाधकाशोधनेन कुलमिति प्रकृते चहेतुत्वविवक्षायां परत्वात्तृतीया प्राप्ता सिद्धिरिति भावः। पुनः संज्ञेति। लक्ष
णेत्थंभूते त्येव सिद्धे पुनः संज्ञाकरणबोधितपुनर्द्वितीया विधानसामर्थ्यादित्यर्थः एतेन संज्ञया विजातीयत्वाद्विभक्तिबाधः कर्तुमशक्य इति परा
स्तं स्पष्टं चेदं भाष्ये। तृतीयार्थे। तृतीयाशब्देन तन्निमित्तशब्दः सहयुक्तेत्यत्रोपात्तो नंतरत्वात् सहशब्दो लक्ष्यते तदर्थः साहित्यं द्योत्य इत्यर्थः। सा
हित्यरूपः संबंधो नुद्योत्यो द्वितीयार्थस्तदाह। नद्येति। त इति कर्तरीति भावः। उपोधिका इति। समभीति। यस्मादधिकमित्यनेनेति भावः। उप
स्वार्यं ज्ञेण इति यथा स्वार्यपेक्षाधिकत्ववान्द्रोण इत्यर्थः तेनोभयमस्तीति पक्षति। इत्थंभूतः कंचित्प्रकारं प्राप्तः स आख्यायते नेनेतीत्थं १२१
थंभूताख्यानं प्रकारविशेषनिरूपकं भागशब्देनार्थं आख्यायते तेन तत्स्वामी उच्यते। वीप्सायां द्विर्वचनविशिष्ट इत्यशब्दबोध्यत्वात् इति।

विषयभूतेच्छिति। रक्षं प्रतीति। रक्षप्रकारेण विष्णु द्योतयेत्याज्ञानाह द्रौ ल इति। रवदं वक्रमिति। वृक्षस्य व्यापकता संबंधेनान्वयो यद्यपि द्विर्वचनबलादेव तथापि प्र
त्यादिसत्त्वे सोपि तन्निर्णायक इति संबंधपरिच्छेदकत्वं बोध्यं। वृक्षादीनां सेचनेकर्मत्वेपि तत्वेनाविवक्षायामनेन द्वितीया। किं च यद्यत्र कर्मत्वे द्वितीया स्यात्तु लक्ष्य
प्रतिनासामर्थ्याभावात् प्रतिरक्षमिति समासानापत्तिः। किं च प्रत्यादेः क्रियाविशेषकत्वेन चर्यतया कर्मप्रवचनीयसंज्ञाया एवानापत्तिः अत एव भाष्ये किमर्थं पुन
रिदमुच्यते नचोपसर्गसंज्ञाबाधनार्थं क्रियायोगाभावादित्युक्तो द्वितीयार्थमिति सिद्धांतितं। अत एव प्रत्ययार्थ इत्यादावर्थस्य निवेशो न क्रिया नि
रूपिताधिकरणत्वेप्यर्थमर्थं प्रतीति विग्रहो भाष्ये दर्शितः वृत्तिविषये प्रतिरेववीप्साया अपि द्योतक इत्यन्यदित्याहतां। फलांतरं अप्याह। अप्येतेति। यद
त्वेति। यदत्र मम भागः स्यादित्यर्थः। कुतोधीति। कुत इत्यपादाने पंचमी द्वितीया तु न कर्मप्रवचनीययोग्यसंबंधप्रतियोगित्वरूपस्य कर्मप्रवचनीय
युक्तत्वस्याभावात्। गतिसंज्ञाबाधादिति। धात्वर्थमात्रद्योतकत्वेन क्रियायोगात् गतित्वं प्राप्तं विशेषद्योतकत्वाभावात्त्वनर्थकत्वव्यवहारोपीति भावः।
सुसिक्तमिति। सेकगतपूज्यत्वद्योतकः सुक्रियापूज्यत्वरूपेत तत् क्रियाकर्तुः पूज्यत्वेगम्य एवेषा संज्ञा अत एव सुसिक्तं किं तवेत्यत्र न। अतिसिक्त
मितिनित्यादधिकानुष्ठानं चात्रपूजायामित्यनुवर्तते। अतिदेवानिति। देवेभ्योधिको देवपूज्य इति वार्थः द्वितीये कुगतीति समासस्याभावस्तु अनभिधानात्। आ
येतुप्राप्तिरेव न स्वतीपूजायां नेत्युक्तेः। अपि पदार्थः। पदस्याप्रयुज्यमानपदांतरस्य अर्थः पदार्थः। सर्पिषोपीति। अत्र बिंदुरित्यादेः पदस्यार्थोपि द्योत्यः
तद्दुक्तं वृत्तौ। मात्राबिंदुः स्तोकमित्यस्यार्थे पि वर्तते इति। संभावनायां लिङिति। उपसंवादाशंकयोश्चेति सूत्रभाष्ये पक्षिणोपसंवादाशंकयोर्लिङि त्यनेनत
स्याशोकसाधारणमित्यपि तत्रैव भाष्ये स्पष्टं। तत्राशंकोत्प्रेक्षा संभावना प्युत्कटकोटिकाशंकैवेति भावः। कर्मप्रवचनीयत्वाद्योत्यसंबंधमाह। तस्य
एवेति। संभावनाया एवेत्यर्थः कर्तृदोर्लभ्यमिति षष्ठीतत्पुरुषः कर्तृपदं प्रकृताभिप्रायं सर्पिषोपि प्रविषेदित्यादौ कर्मदोर्लभ्येत्यादि बोध्यं तत्र बिंदोस्तद्दोर्लभ्यप्र
युक्तदोर्लभ्यसंबंधस्य च द्योतकोपिः। संबध्यते इति। स्यात्पदवाच्यक्रियायामपि द्योत्य बिंदोः कर्तृतया तद्योत्योक्तसंबंधेन चान्वयादिति भावस्तदाह। अपि
शब्दबलेनेत्यादि। एवं च सर्पिरवयवबिंदुदोर्लभ्यप्रयुक्तदोर्लभ्यवती तत्कर्तृका संभावना विषयासत्तेति बोधः विशिष्टसत्तायाः संभावना विषयत्वबोधे
दोर्लभ्यस्यापि संभावना विषयत्वमनुभवसिद्धं। नन्वेवं कर्मप्रवचनीययोग्यत्वेर्थे सर्पिषोन्वयेन तस्य कर्मप्रवचनीययुक्तत्वाद्द्वितीया स्यादत आह। द्विती

श०प्र०व्या०

१२२ याचितेति। मत्वपिनेति। बिंदुनायोगेप्यपिद्योत्यसंबंधेनान्वयइत्यर्थः कर्मप्रवचनीयद्योत्यसंबंधप्रतियोगित्वमेवतद्धत्वं प्रकृतेचापिद्योत्यस्योक्तसंबं
धस्यबिंदुः प्रतियोगीनसर्पिरितिभावः यदास्यप्रतिपदायेऽपिद्योत्यस्यापिबिंदोः प्रयोगस्तदापिद्वितीयांबाधित्वोपपदविभक्तेरितिप्रथमैवतत्रका
रकविभक्तित्वं क्रियाजनकत्वार्थकविभक्तित्वमितिदिक्। संज्ञाफलमाह। अनुपसर्गत्वादिति। अपिस्तुयादिति। पूर्ववल्लिङ् क्रियाविषयशक्यत्वा
दिनासंभावनमपिद्योत्यंप्रकृतेऽवादुःमनसगोचरं विस्तुमपिस्तुयादितिशत्युत्कर्षाविष्करणं प्रस्तुतिःसंभाव्यार्थं संभावनंसंभावनप
दस्येदृशार्थकत्वेव्याख्यानमेवशरणं। विस्तुविषयायाःशक्यत्वसंभावनेचान्यविषयानिश्चयेनशक्यंकर्तुमितिफलति। शक्त्युत्कर्षमित्यौ
चित्योत्कर्षद्योतनात्संभावितोचित्यस्यचानुस्तानमयुक्तमिति अस्यस्वार्थेतात्पर्याभावोधर्मशास्त्रोक्तः संगच्छतेकामचारइच्छयाप्रवृत्तिः स्तुहिमावाय
यंकुर्वितियावत्। अपातिसर्गेतिलिङ्। अपिस्तुयाद्धपलमिति। उपसंवादेतिसूत्रपठितवार्त्तिकेनपरेणांतरंगेणचगर्हायांलडपीतिबाधित्वासं
भावनेलिङ् क्रियागतंगर्हत्वमपिद्योत्यंवृषलपदसमभिव्याहारास्तुतेगर्हात्वेपलतितद्देवधिगित्यादिनानूद्यते। अपिसिंचेत्यादि। अपिद्वयेनमिलितेन
समुच्चयद्योतनात्प्रत्येकंसंज्ञायामुभयत्रापिषत्वाभावः। कालाध्व। अत्यंतसंयोगोनिरंतरंसंबंधः सचगुणक्रियाद्रव्यैरभावेनचतेनमासंभोजनाभावइत्या
दिःसंग्रहः गुणादिभिःकालाध्वनोरत्यंतसंयोगेप्रत्यासत्याकालाध्ववृत्तिभ्यांद्वितीयेत्यर्थः। मासमधीतइति। वह्निस्थयावद्वयवसंबंधरूपाव्याप्तिर्द्वितीयार्थः।
एकादश्यांरात्रौजागरयादित्यादावधिकरणत्वविवक्षणान्नद्वितीयाइतिद्वितीया।। ।।स्वतंत्रः। कारकाधिकारात्क्रियाजननेस्वतंत्रइत्यर्थस्तदाह। कि
यायामिति। स्वातंत्र्यंचकर्तृप्रत्ययसमभिव्याहारे [illegible] प्रधानीभूतधात्वर्थाश्रयत्वं। यथा स्तंडुलोदेवदत्तेनेत्यत्र फलस्यप्राधान्येपिदेवदत्तस्यक
र्तृत्वसिद्धयेकर्तृप्रत्ययसमभिव्याहारेइति णिचस्तुवाचकत्वमेवात्स्वाच्यएयंतधातुतत्प्रकृतिधात्वोतदुभयवाच्यव्यापारयोःस्वस्वार्थप्रतिप्राधान्या
द्देवदत्तेनयज्ञदत्तःपाचयतीत्यादौप्रयोज्यव्यापाराश्रयस्यापिकर्तृत्वसिद्धिर्द्योतकत्वेतुनेतत्सिध्येत्कारकइतिसूत्रभाष्यात्स्वक्रियाकारकप्रव १२२
र्तकत्वंस्यात्तं अमितिलभ्यतेप्रकृतसूत्रभाष्याच्चेतिमंजूषायांनिरूपितं। प्रकृष्टेति। यद्व्यापाराव्यवधानेनक्रियानिष्पत्तिस्तत्प्रकृष्टं। तमप्प्र

हणंकिमिति। कारकाधिकाराकरणल्युडंतंकरणेतिमहासंज्ञयाचसाधकत्वेलब्धेसाधकग्रहणमेवसाधकतमार्थंभविष्यतीतिप्रश्नः। गंगायामिति। अ
धिकरणमित्यधिकरणल्युडंतमहासंज्ञयैवसिद्धे आधारग्रहणंसामर्थ्यात्सर्वावयवव्याप्त्यार्थं आधारःसोधिकरणमित्यर्थःस्यात्एवंचेदंसूत्रंतिलेषु
तैलमित्यादावेवप्रवर्तेतनत्विंगंगातीरंवासर्वावयवैर्व्याप्त्यातीरधर्मस्यघोषाधारत्वस्यात्यंतसामीप्यात्प्रवाहेआरोपोत्रबोध्यः यदातुव्यवहितोगंगाघो
षस्तदागंगाशब्दस्यतत्तत्तीरलक्षणात्तमग्रहणेनशब्दसामर्थ्यगम्यःप्रकर्षोनाश्रीयतइतिज्ञाप्यतइतिगौणाधारस्याप्यधिकरणसंज्ञासिध्य
तिएवंगंगायांगावइत्यप्युदाहरणंसर्वावयवव्याप्त्यभावेनमुख्याधारत्वाभावात्। गौणमप्याधारत्वादिससम्यादिशक्यमेवेतिबोध्यंइदं
प्रकृतसूत्रेभाष्यस्पष्टंयदितुमहासंज्ञयातदाहेपिकरणसमर्थंप्रति आधारादिपदं चरितार्थंसाधकशब्दस्ययद्व्यापारादनंतरमव्यवधानेनफ
लोत्पादस्तत्रशक्तिराधारशब्दस्यचाध्रियंतेयस्मिन्नितिव्युत्पत्त्याकर्तृकर्मणोधारणेक्रियांप्रतिसर्वावयवव्याप्त्याथ आधारस्तत्रशक्तिरित्यु
च्यतेतदोक्तप्रयोगादिसाधनायकारकप्रकरणेउद्देश्यवाचकेपदेस्वरितत्वप्रतिज्ञयागौणाधारादेर्ग्रहणंवाच्यंस्वरितेनाधिकंकार्यमित्यर्था
त्तमपातुप्रकृतेतदभावोबोध्यते। एवंचव्यवधानेनफलोत्पादकेकरणत्वोपचारेणतृतीयांतप्रयोगस्यासाधुत्वबोधनंतमपफलंएतेनचामवश्य
दिवान्यत्रस्वरितत्वमितिज्ञायतेइतिदिक् स्पष्टंचेदंस्वरितेनेतिसूत्रेभाष्ये। रामेणेति। कर्तृतृतीयायाःकर्तृत्वादिशक्तिमान्कर्तृक्रियाभावः सं
बंधश्चार्थःकरणतृतीयायाःकरणशक्तिमान्क्रियाकरणभावःसंबंधश्चार्थस्तास्तत्रशक्तिमत्वंचव्यापारवत्त्वेव। रामकर्तृकबाणकरण
कप्राणवियोगाश्रयोवालीतिबोधः। अकथितंचेति। इदंयथायोगंसर्वविभक्त्यपवादः। दिवःकर्मचेतिचेनसंज्ञयोःसमावेशःतेन [illegible]ःसाधकतमस्यश
क्तिद्वययोगोबोध्यतेतेनअक्षैर्दीव्यतइत्यत्रतृतीयापरत्वात्कर्मत्वाच्चाकर्मकत्वप्रयुक्तपरस्मैपदाभावः अत्रविप्रतिषेधशास्त्रबलात्तृतीयैवशा
क्तिद्वयबोधिकाप्रशस्तप्राणंफलाश्रयत्वसमानाधिकरणकर्मत्वविवक्षातदाक्षान्दीव्यतीत्यादिसाधु अक्षाणांदेवितेत्यादौतृतीयातःपरत्वात्षष्ठ्य
योगसहणाषष्ठी। मनसादेवइत्यादौहेतुतृतीयांतेनपचायजंतेदेवशब्दस्यसमासःनचशक्तिद्वयस्वीकारेत्रकर्मणिलकारकरणेचशक्तेरनुक्त

०४१५कौ०

११२

चेनत्वृतीयापत्तिरितिवाच्यमपादानमुत्तराणीत्यस्योदाहरणं गां दोग्धीत्यादौ तत्र कर्मणि षकारे पंचम्यापत्तिवारणायैव द्रव्यगतानेकशक्तिमध्ये एकस्या अभि
हितत्वे परस्या अपि तद्वत्प्रकाशो नाऽतः एकैव शक्तिः संज्ञाद्वयोपयोगिनीति तु चिंत्यं कर्मादिपदानां कर्मत्वादितत्तच्छक्तिरूपेण बोधकतया तयोर्भेद
स्यैवोचित्यादिति मंजूषायां विस्तरः। फलप्राप्तिरिति। तस्यां च सत्यां प्रयोजनाभावादेव न क्रियाप्रवृत्तिरिति फलप्राप्तिशब्देन तत्पूर्वकस्त्यागउच्यते।
त्यागस्य च फलप्राप्तिर्व्यंग्येत्यन्यत्र विस्तरः। नायातइति। अनेन फलाप्राप्तिरेव स्फुटमुच्यते। सहयुक्ते। पृथग्विनानानाभिरितिवत्सहेनेत्येव सिद्धे
युक्तेग्रहणं शब्दविशेषानादरेणार्थयोगे भवत्वित्यर्थमित्याह। सहार्थेनेति। अतएव क्वचित्सहयोगं विनापि भवतीत्याह। विनापीति। न्यायसिद्धे
र्थे लिंगमप्याह। वृद्ध इति। सहार्थः साहित्यं तच्च स्वसमभिव्याहृतक्रियादिसमानकालत्वं क्रियादिमत्त्वं क्वचित्समानदेशक्रियावत्त्वं अतएव माषवापे
चरंतत्रैव हेत्रेति लवापे तिलैः सहमाषान्वपतीति भवति यद्यपि पुत्रेण सहागत इत्यादौ आगमनक्रियाकर्तृत्वादेव पुत्रात्तृतीयासिद्धा तथापि
पुत्रेण सह स्थूल इत्याद्यस्य मुख्यउदाहरणमिति भाष्यस्वरसः। अंगेन। अवयवेन इदं संनिधानलब्धं। अंगिनोवयविनः सूत्रे अंगशब्दोर्शआ
द्यजंतो व्याख्यानादिति भावः। अक्ष्णा काण इति। यद्यप्यक्ष्ण एव काणत्वं तथाप्यवयवधर्मस्य समुदाये आरोपाच्छरीरे तद्विच्छिन्ने च व्यवहारो निरू
ढ इति ध्येयं। यद्यपि काणशब्दो दृगतविकारवाचक एव तथापि द्वौ विप्रावितिवद्दृशेति प्रयोगस्य साधुत्वं। ईदृशानीत्येदृशानां साधुत्वे चेदमेव मानं। षष्ठ्य
पवादोयमित्याह। अक्षिसंबंधीति। अंगविकारः किमिति। अंगग्रहणप्रयोजनप्रश्नः। अक्षि काणमिति। अथ मां बाधित्वा त्रैवस्यात्तदेशतोपि दर्शनसाम
र्थ्यहीनत्वं काणत्वं। इत्थंशब्दः प्रकारमात्रपरः आत्ययोभ्भुवः कर्तरि क्तः कर्मविभक्त्यंतेनेत्थंशब्देन भूतशब्दस्य समासः लक्षणशब्दः करणसाधनः
तस्य कर्म वक्ष्यंते तेनेत्थंभूतशब्देन समास इत्याह। कंचिदित्यादि। जटाभिरिति। यद्यपि तापसो ज्ञातइत्यर्थे ज्ञानक्रियायां करणत्वादिदं सिद्धं तथापि
करणत्वाविवक्षायां लक्ष्यलक्षणभावमात्रविवक्षायां तृतीयार्थमिदं इत्थंभूतस्य यत्र लक्षणं वा चकात् पृथगुपस्थितिरेव तत्रैवानेन तृती
या। तेन कमंडलुपाणिश्छात्र मद्राक्षीदित्यादौ कमंडलुपदान्न तृतीया। न चोत्पन्नायास्तृतीयायाः सुपोधात्विति लुक् इति वाच्यं कृते समासे तस्याउत्पत्त्या। ११२

६

समासप्रातिपदिकानवयवत्वादिति कैयटे स्पष्टं कमंडलुः पाणौ यस्येति बहुव्रीहिः। परेतु अंकमंडलुपाणिशब्दात्तत्र तृतीयापत्तिः कमंडलुयुक्तपाणिरूपस्य कमंडलुपा
णित्वस्य लक्षणत्वेन तस्यैव तद्वाचकत्वात्। तदुक्तं मनुर्लक्षण इति सूत्रे भाष्ये स्वरूपसौ कमंडलुपाणिश्छात्रोदृष्टस्य तदेव लक्षणं भवतीति तदेवेत्यस्य
कमंडलुपाणित्वमेवेत्यर्थः कमंडलोर्लक्षणत्वे हि स एवेति वदेत् किंच तन्मध्यपतितन्यायेन द्विशिष्टस्य प्रातिपदिकत्वेन तस्य तदनवयवत्वोक्तेरनौचित्ये
न लुको दुर्वारत्वं अतएव नरं मन्य इत्यादौ खिजंतस्योत्तरपदपरत्वाय पूर्वं सुपोलुकि उत्पन्नस्यामः सुपोधात्विति लुक् अम् विधिसामर्थ्येन वारितइ
व एकाचोमिति सूत्रे भाष्ये इत्याहुः। संज्ञा। देवादिकस्य जनेर्न ग्रहणं तस्याकर्मकत्वात्तदाह। जानातेरिति। कर्मत्वशक्तेरेवात्र तृतीयार्थः। हेतौ। हेतु
रिह कारणं न शास्त्रीयः तस्य कर्तृसंज्ञाया अपि सत्त्वेन कर्तृतृतीययैव सिद्धेः। ननु लौकिकहेतुरपि करणमित्यत आह। द्रव्यादीति। आदिना गुण
क्रिये। साधारणमिति। तज्जनकेपि वर्त्तत इत्यर्थः करणं तु क्रियाजनकमेवेति भावः। वैषम्यांतरमाह। निर्व्यापारेति। करणं तु व्यापारवदेति भावः। एवं च क
रणत्वशक्तेर्भिन्नैव हेतुत्वशक्तिरत्र तृतीयार्थ इति तात्पर्यं स्फुटप्रतिपत्तये करणे वैलक्षण्यमाह। करणत्वं चेति। हेतुहेतुमद्भाव एतत्तृतीयार्थः दं
डव्यापारसत्त्वेपि क्रियाजनकत्वाभावान्न करणत्वं पुण्ये क्रियाजनकत्वेपि निर्व्यापारत्वान्न तत्त्वं। फलमपीति। इह एतत्सूत्रोदाहरणे। केचित्फलस
मपि हेतुत्वेन विवक्ष्यत इत्यर्थः तस्यापि स्वज्ञानद्वारा जनकत्वात्। एतच्च प्रत्यय इत्यादिसूत्रे कैयटे स्पष्टं। नन्वलं श्रमेणेत्यादौ क्रियावाच
कपदाभावात्क्रियायां अप्रतीत्या कथं करणत्वमत आह। गम्यमानापीति। श्रमेणेत्यादिपदजबोधविषयापीत्यर्थः न तूच्चार्यमाणतद्वाचक
पदजबोधविषयैवेति भावः। अलंशब्दो निषेधार्थस्तदाह। साध्यं नास्तीति। ननु साध्यमित्यर्थज्ञानेपि तस्य श्रमेणेति नामार्थत्वेन न क्रि
यात्वमत आह। इहेति। स्ववाच्यक्रियां प्रति स्वस्य करणत्वमित्यर्थः। स्पष्टं चेदमिग्यणः इति सूत्रे प्रविश पिंडीमिति वाक्यार्थवाक्यैकदेश
प्रयोग इत्यादिना भाष्ये इति मंजूषायां विस्तरः। अशिष्टेति। अशिष्टानां संकीर्णचाराणां यो व्यवहारः क्रियातद्बोधकप्रयोगेष्वभ्यास
यायत संबंधेन व्यवहारस्य संकीर्णचारत्वं तद्वाचकाच्चतुर्थ्यर्थे तृतीयेत्यर्थः। दास्येति। दासीसंप्रदानकं रतिफलकं दानमिति बोधः।

इति तृतीया ॥ दानस्येति । दाधात्वर्थस्येत्यर्थः । इदं उपलक्षणं क्रियामात्रस्य । कर्मणेति । संबंधुमितिशेषः । अभिप्रेतेति । इच्छतिकर्मणा संबंधश्च स्वत्वादिरूपः
संप्रदानत्वप्राप्तिमान् संप्रदान चतुर्थ्यर्थः स एवोद्देश्य इत्युच्यते । क्रियाकारकभावः संबंधश्चेत्यर्थः । विप्रसंप्रदानकं दानमिति बोधः । कर्मणेति किं ।
तदभावे हि कर्मणोप्युद्देश्यत यांतरंगत्वात्तस्यैव संज्ञा स्यात् कर्मसंज्ञया तु पर्यायो भविष्यतीयं संग्रहणं किं । तदभावे क्रियाकर्मणा योमिप्रेतिब्राह्मणा
दिः तस्यैव स्यात् कर्तृसंज्ञात्वकर्मकविषये सावकाशा । न च कर्तुः कर्तृत्वाभावे कथं गोः कर्मत्वं । कर्मसंज्ञायां कर्तृग्रहणस्य स्वतंत्रोपलक्षणत्वात् ।
अत एव साधीयतइत्यत्र कर्तुरपादानत्वेपि कर्मणि लकारः सिद्धः । ननु कर्मणेत्युक्त्वा वकर्मकक्रियोद्देश्यस्य संप्रदानत्वं न स्यादत आह । क्रिय
येति । कर्मरहितक्रिययेत्यर्थः । सकर्मकेषु कर्मसंज्ञा अस्या बाधिकेत्याशयेनाह । पत्ये शेत इति । न च दारी नां तादर्थ्यात्तादर्थ्ये चतुर्थ्येव सि
द्धे किमनया संज्ञेतिवाच्यं दाशगोघ्नौ संप्रदान इत्यर्थत्वात्तत्संप्रदानकं दानमिति बोधार्थं तदावश्यकत्वात् । अत एव तादर्थ्ये चतुर्थ्यो दान
कर्मणो गवादेः संप्रदानार्थत्वेपि दानक्रियायास्तदर्थत्वाभावेन चतुर्थ्यैतादर्थ्यस्य दानक्रियान्वयानापत्तिरिति वीहेलाराजः । तादर्थ्ये चतुर्थ्येव सिद्धे
चतुर्थी संप्रदान इति सूत्रं रुच्यर्थानामित्यादि विषये चतुर्थ्यर्थमिति भाष्ये स्पष्टं । पशुनेति । कर्मत्वे तृतीयार्थः । संप्रदानं च तुर्थ्यर्थः एतच्च दाना
र्थकयजधातुविषयं पूजार्थत्वे तु पशोः करणत्वं न्यायसिद्धं । इदं छांदसमिति कैयटः । अन्यकर्तृक इति । अभिलषतिकर्तृपिइत्यान्यदभि
लषतिकर्मतत्कर्तृक इत्यर्थः । यत्किंचिद्विषयकप्रीत्यनुकूलव्यापाराश्रयो भिलषतिकर्त्ता हरिर्भक्तिमभिलषतीति प्रत्ययात् । यत्किं
चिन्निष्ठप्रीत्यनुकूलः प्रीतिव्यधिकरणो यो व्यापारस्तदाश्रयो रोचतेः कर्त्तेति अभिलषतेरुच्यर्थत्वाभावान्न तद्योगे संप्रदानत्व
मिति भावस्तदाह । हरिनिष्ठेति । पचतीति । न च प्रीयमाणपदाभावे सूत्रस्य क्रियाजनकत्वमात्र विवक्षायां संज्ञां तराप्राप्तिविषये चारितार्थ्येन १२४
परत्वादधिकरणसंज्ञया बाधसिद्धेः कथमेतत् इति वाच्यं देवदत्ताय रोचते इत्यस्याप्यापत्तेरित्याशयात् । तत्सत्त्वे तु अस्य कर्मसंज्ञापवादत्वान्न
दोषः । गोपीस्मरादिति । श्लाघादेः स्तुत्यादिना बोधनमर्थः । स्मरादिति हेतौ पंचमी स्तुत्या मानुरागं कृष्णं बोधयतीत्यर्थः । स्तुतिश्च कृष्ण

स्यैव । एवं ह्नुत्या स्वानुरागं कृष्णं बोधयतीत्यर्थः । ह्नुतिः सपत्न्यादिभ्यः कृष्णस्यैव । एवं स्थित्या शपथेन च कृष्णं स्वानुरागं बोधयतीत्यर्थः । यद्वा स्तुत्या ह्नुत्या च कृ
ष्णं स्वसखी जनं बोधयति स्थित्या शपथेन च कृष्णं तं बोधयतीत्यर्थः । ज्ञीप्स्यमानपदं एयर्थकर्मणः श्रकृत्यर्थकर्मणश्च ग्रहणादित्यत्र विस्तरः । स्तुत्यादिमा
त्रार्थत्वे कृष्णं श्लाघते कृष्णं ह्नुत इत्येव ज्ञीप्स्यमान इति ज्ञापनवचनाद्वये । हनंताकर्मणि स्थानं च । धारेरु । धङ् अवस्थाने इति एयंतस्य ग्रहणं व्याख्या
नात् । भक्ताय ति । ध्रियमाणं स्वरूपेणावतिष्ठमानं मोक्षं हरिः प्रयुंक्त इत्यर्थः । प्रेरणाया भक्तासत्त्वेऽभावात्तस्यापि प्रेरणाजनकत्वेन कारकत्वं बोध्यं ।
अवश्यदेयत्वेन मोक्षेपि ऋणत्वं बोध्यं । उत्कर्षविवक्षायां त्विति । फलाश्रयत्वेन विवक्षायामित्यर्थः । परत्वादिति । इदं सूत्रं विषयतया क्रियाजनकत्व
मात्र विवक्षायां चरितार्थमिति भावः । पुष्येभ्यः संप्रदानिकेष्टे तिचतुर्थीसममित्याहारे बोधः । कुमार्यै इव कांतस्य त्रस्यति स्पृहयंति चेत्यत्र क्रियासंबंधित्व
मात्र विवक्षया षष्ठी अन्ये तु भार्यायै पत्ये कांतायेति विभक्तिविपरिणामेन वा व्याख्येयमित्याहुः । स्पृह धातुरिच्छामात्रवाची फलवच्छिन्नेच्छावाची
सं चाद्यं पक्षे दानत्वमस्येकर्मत्वं । ईप्सितत्वं धात्वर्थजन्यफलाश्रयत्वं न तु फलस्य धात्वर्थत्वपर्यंतमाग्रहः कर्मसंज्ञायां तु यथातत्त्वाभस्तयोक्तं । भार्यामीर्ष्य
तीति । नात्र भार्यां प्रतिकोपः किंतु परैर्दृश्यमानां तां न सहत इत्येव एवं चात्र न कोपजन्येर्ष्या किंत्वन्यपुरुषदर्शनजन्येति भावः । हरेः क्रोध इत्यादिना प्यामि
च्छा विषयत्वाभावात्क्रियया यमित्यनेन न सिद्धिः न ह्यकुपितः क्रुध्यतीति भाष्येण प्रकृष्टकोप एव क्रोध इति कुपेस्तदर्थभावेन न तद्योग इदं । कुप्य
तिकस्मै चिदित्याद्य साधेव । उपसृष्टयोरित्यस्यार्थमाह । सोपसर्गयोरिति । वैयाकरणनिकाये एव एतदर्थकत्वेन प्रसिद्धः पूर्वसूत्रापवादोयं । यस्य
इति । यदीयशुभाशुभसंबंधीत्यर्थः । राधीक्ष्योः प्रश्नविषयपर्यालोचनमर्थः कर्मणः प्रश्नविषयस्य धात्वर्थेनोपसंग्रहात्कर्मकावेतौ । अत ए
व प्रश्न राधोकर्मकादेवेत्युक्तेः कृष्णसंप्रदानकं शुभाशुभपर्यालोचनमर्थः । प्रत्याङ्भ्यां । व्याख्यानात् प्रत्येकं निमित्तत्वमित्याशयेनोदाहरति । गां
प्रतिशृणोतीति । अनयोः प्रवर्त्तनापूर्वको भ्युपगमोर्थः तत्र विप्रस्य कर्तृप्रयोजकत्वेन हेतुत्वे प्राप्ते वचनं । अनुप्रतिगृ इति । भिन्नं परं क्लृप्तं पंचम्यं
तं । गृणइति । एतानुकरणात् षष्ठी । शंसितुः शंसनविषयहर्षानुकूलव्यापारलक्षणं प्रोत्साहनमनयोरर्थः । पूर्वव्यापारस्येति । शंसनस्येत्यर्थः ।
प्रोत्साहयतीति । अन्ये यामेत्यादिशब्दैरितिशेषः । प्रातायेति । करणस्यैव संप्रदानत्वेन भानमत्र प्रातव्यापारश्च दानरूप एवेति बोध्यं । तादर्थ्ये । ताद

र्थमुपकार्योपकारकभावरूपः संबंधः। यदातादर्थ्यस्य संबंधत्वेन भानं तदा षष्ठी गुरोरिदं गुर्वर्थमिति। अत्र भाष्ये स्पष्टं। क्लृप्तीति। सप्तमी। अर्थग्रहणं चा
चार्थं पत्तिरूपत्ति क्लृप्त्यर्थधातुयोगे उपसंख्यमाने ऽर्थे वर्त्तमानाच्चतुर्थीत्यर्थः। हितयोगे च। चात्सुखयोगे पि। क्रियार्थोप। क्रियाऽर्थः फलं यस्य
तत् क्रियार्थं तेन स्ववाचकं लक्ष्यते क्रियाफलकार्थवाचकमुपपदं यस्येत्यर्थः। सोर्थश्च प्रत्ययास्तस्याः क्रियारूप एव। स्थानिशब्दश्चाप्रयुज्यमानवा
चीवैयाकरणानां नैतिकायेप्रसिद्धः। क्रियार्थक्रियोपपदत्वं चतुमुनादेरेवेत्याह। क्रियार्थक्रियेति। फलेभ्यो यातीत्यादौ फलकर्मकाहरणफल
कयानमिति बोधः। यथा वा क्यार्थवाक्यैकदेशप्रयोगस्थले प्रविश पिंडीमित्यादौ तस्यैव पदस्य संपूर्णवाक्यार्थशक्ततातथात्वस्य समुदायस्याहरणघटितोक्ता
र्थशक्तिरेतच्चप्रयोगबलात्स्थानिन इत्युक्ते स्तत्प्रयोगे नेति बोध्यं। अयमेवार्थाध्याहारः। नमस्कुर्मो नृसिंहायेति। नमःस्वस्तीत्यनेन तु न सिद्धिः उपपदवि
भक्तेरिति न्यायेन द्वितीयापत्तेः पिंडीमित्यादौ अप्रयुज्यमानभक्षणक्रियाकर्मत्वि चतुर्थीवारणाय। क्रियार्थोपपदस्येति। तुमर्थाच्च। तुमशब्देन तदर्थो
लक्ष्यते सोर्थोयस्येत्यर्थः। इति सूत्रेणेति। भाववचनाश्चेति। भाववचनाश्चेति सूत्रेणेति। भाववचनाश्चेति। क्रियार्थक्रियायामुपपदे भविष्यति स्युरिति तदर्थः। यागायेति। यागफलकं या
नमित्यर्थः। उपपदविभक्तेरिति। वाचनिकमेवेदं भाष्ये पठितमिति केचित्। क्रियाकारकयोः संबंधोंतरंगः उपपदार्थेन तु यत्किंचित्क्रियाकारकभाव
मूलकः संबंध इति तन्निमित्ता विभक्तिर्बहिरंगेति। अंतरंगांतरेणेति सूत्रे कैयटः। अत्राहुः। एवं सति नमस्यति देवानित्यादौ नमःपदार्थे क्रियाकार
कभावेनैवान्वये परत्वाच्चतुर्थीप्राप्तौ प्रयाणेनवारणस्य भाष्योक्तस्यासंगतिः एतेन प्रधानत्वात्क्रियायाः स्तत्संबंधनिमित्तकत्वेन बलवत्त्वाम
त्यपि परास्तं। कारकविभक्तित्वं च क्रियाजनकत्वसमानाधिकरणकर्त्रादिषट्कान्यतमार्थत्वं। अन्याभिहितानुभूतकर्त्राद्यन्यतमार्थत्वं प्रथमा
या अपि। अभिहिते प्रथमेति वार्त्तिकस्वारस्यादतः प्रथमापि कारकविभक्तिरिति बोध्यं। द्वावित्यादौ द्वित्वादेरिव देवः पचतीत्यादावुभाभ्या
मेकस्यैव कर्तृत्वस्य बोध इति न तद्बोधादतिः। नमस्करोति देवानिति। नुत्क इनिरोधः स्वनिष्ठापकृष्टत्वबोधस्तदनुकूलव्यापाररूपनमस्कारफलस्यतादृ
शबोधस्याश्रयतया देवानां कर्मत्वस्य शब्देन प्रयोक्तानमःशब्दस्य साक्षात्प्रभृतिषूर्यादिषु वाडेपाठेन गतित्वात्सत्वं। एकस्या एवोपपदविभक्तेः का
रकविभक्तित्वे चायं न्याय इति तु न युक्तं। नमस्यति देवानित्यत्रैतत्परिभाषोपन्यासपरभाष्यविरोधात्। सह युक्ते इत्यादिसूत्रस्य भाष्यविरो

धाच्च। अलमितीति। अलमित्यनेन पर्याप्त्यर्थानां ग्रहणं व्याख्यानादित्यर्थः। तत्र ज्ञापकमप्याह। तस्मै प्रभवतीति। वक्ष्या अपि साधुत्वेबीजं। स एषामिति। आशीर्विव
क्षायामिति। आशीर्विषयत्वविवक्षायामित्यर्थः। स्वस्त्यर्थः। कुशलं मंगलं वा स्वस्तियोगे चतुर्थ्या अवकाशः स्वस्ति ओं स्मा या स्तीति तत्वकथनं। कुश
लार्थैराशिषीत्यस्यावकाशः स्वस्ति भिन्नाः कुशलार्थाः स्वस्तिशब्दो नव्ययमपि। प्रतिग्रहामि ते धेनुं कुर्वार्थविशेषतः स्वस्तिर्भवतु मे नित्यं सुखं चा
नुत्तमं तथेति भविष्योत्तरे प्रयोगात्। मन्यकर्मणि। तिरस्कार इति। अनादरो नादराभावमात्रमपि तु नञो धर्मादावि व प्रतिपक्षवाचित्वात्ति
रस्कार इति भावः तत्रानादर इति मन्यकर्मविशेषणं तद्द्योतकं यत्कर्मेत्यर्थः तेन युष्मत्क्षुद्राच्चतुर्थी न। तिरस्कारश्च व्याख्यानादपकृष्ट
निरूपितोपमेयत्व स्याप्य भावरूपउपमेये त्रगृह्यते तेन त्वपकृष्टसादृश्यरूपः तत्प्रतीतिश्च नञ्समभिव्याहार एव तृणतुल्यमपि न
मन्ये इत्यर्थः। तृणाय मत्वा रघुनंदनोपीत्यादौ नञोध्याहार इत्याह। नत्वां तृणमिति। कर्मात्र चतुर्थ्यर्थः। श्वनेति। नतु यको व्याख्याना
दिति भावः श्वत्रूपसंग्रहणं तेन सिंडाद्यावपि भवति तदुद्धनयन्नाह। तानादिकयोगे नेति। नौकाकेति। भाष्येषु प्राणिषु नेष्यते तेनावाद्यो
भविष्यतीति ये छित्ति बहुवचनेनत्व्युदाहरणबलेन चैछ्वानिछिनिर्णय इति भावः। गत्यर्थकर्म। कर्मात्रापि चतुर्थ्यर्थः। गत्यर्थेति किं मो
दनं पचति। कर्मणीति किं अश्वेन गच्छति। चेष्टायां किमिति। धात्वर्थस्य क्रियारूपत्वात् प्रश्नः शारीरक्रियाया एव ग्रहणमित्युत्तरं। प
थानमिति। अध्वशब्दोर्थपरो व्याख्यानादिति भावः। अधिष्ठित इति। शब्दप्रयोगसमकालिकं गंतृव्यापारजन्यफलाश्रय इत्यर्थः।
अध्वपदेन गंत्रप्राप्योर्थ उच्यते तेन गंत्र[illegible] युक्त स्त्रियां स्त्रियं गच्छतीत्यादौ नस्य संचेदं भाष्ये। उत्पथादिति। उत्पथं संत्य
ज्येत्यर्थः। इष्यत इति। नत्वाक्रांत इत्यर्थः। उत्पथेनेति। गंतुमशक्त इति शेषः। इति चतुर्थी॥ ध्रुवम्। ध्रुवं स्थिरं अपायो विभाग
जनको व्यापारस्तदनाश्रयमिति यावत्। विभागश्च न वास्तवसंबंधपूर्वको वास्तव एव किंतु बुद्धिपरिकल्पितसंबंधपूर्वको बुद्धिकल्पि

॰श॰श॰का॰

तेपि। माथुरास्तु पाटलिपुत्रकेभ्य आढ्यतरा इत्यादौ बुद्धिकल्पितापायाश्रयत्वेन भाष्ये पंचमीसाधनात्। कर्त्तृवारणाय ध्रुवमिति। अन्यथा कर्त्तृसंज्ञाया
इयमपवादः स्यात्। अपायविषयत्वाकारकं तद्रूपक्रियाजनकं तदपादानमित्यर्थस्य भवात्। कर्त्तृसंज्ञा तु पचत्यादियोगे चरितार्था। हरिरप्याह। अपाये यदुदासी
नं चलं वा यदि वाचलं। ध्रुवमेवातदावेशादिति स्पष्टं चेदं कैयटादौ। भाष्यानुसारिणस्तु एवं हि त्रस्तादश्वात्पतितो धावतः पतित इत्यादौ ध्रुवत्वाभावादपादानत्वं न
स्यादित्याशंक्य ध्रौव्यस्याविवक्षितत्वमत्र सतोप्यविवक्षा भवतीति समाहितं भाष्ये तदसंगतं स्यात्। किं च उक्तध्रुवत्वस्य पतधात्वर्थव्यापाराश्रयत्वस्यात्रासत्वेन स
तो ध्रौव्यस्याविवक्षेत्यस्यासंगतेः सिद्धांतेपि लक्षणे ध्रुवपदार्थकथनमनौचित्यमिति तदसंगतिश्च लोकसिद्धातिरिक्तेर्थे ध्रुवपदस्य शक्तिकल्पने गौरवं च अतस्त्व
वेशादित्यस्य हरिकारिकायां तदावेशाविवक्षणादित्यर्थः। तस्मादपायो गतिविशेषस्तत्रियत् ध्रुवमवधिभावोपगमाश्रयत्वे सति तदतिरिक्तस्यावधित्वोपयो
गिव्यापारस्यानाश्रयं तदपादानमिति सूत्रार्थः। ग्रामादेरवधित्वोपयोगित्वाश्रयत्वेन शंकावृक्षात्पर्णं पतत्यादौ तस्यासत्वान्न तदुपयोगित्वं तस्य प्रकृते वि
द्यमानस्यापि तस्याविवक्षितत्वान्न तदुपयोगित्वं तस्येत्युत्तरं। ध्रुवमपाये इति तु वृक्षस्य पर्णं पततीत्यादौ वस्तुतस्तस्य पर्णद्वारा पातजनकत्वात्प्राप्ता
पादानत्ववारणाय एवं चापाये इति कारके इत्यस्य क्रियाजनकत्वेन विवक्षितमित्यर्थे तात्पर्यग्राहकं बोध्यं। ध्रुवग्रहणं तु कारकांतरागामिवापादानस्या
वधिभावोपगमातिरिक्तव्यापाराभावबोधनायेत्याहुः। अपादानत्वशक्तिश्च प्रकृतधात्वर्थविभागाश्रयत्वसमानाधिकरणेति अपादानसमभि
व्याहारे विभागोपि धात्वर्थ इति बोध्यं। एवं च वृक्षात्पततीत्यादौ तदपादानकविभागपूर्वकः संयोगः पर्णवृत्तिरिति बोधः वृक्षाद्भूमिं पततीत्यादौ
वृक्षापादानकविभागपूर्वकः संयोगानुकूलो व्यापार इति बोधः परस्परस्मान्मेषावपसरत इत्यादौ मेषपदोपात्तयोरेव क्रियाश्रयत्वात्कर्त्तृत्वं
परस्परपदोपात्तयोरेव विभागाश्रयत्वादपादानत्वं मेषपदोपात्तेतरविवक्षणात् प्रयोगानुसारित्वाद्विवक्षायाः विभागपूर्वकं पृष्ठतो गमनं त्वप
सरणं आत्मानमात्मनेत्यादावंतःकरणाद्युपाधिकृतभेदवत्पृथक्त्वोपाधिकृतभेदाग्रहणे मानाभावात् शब्दालिंगितार्थभानस्यैव सत्त्वा १२६
च्चैवमन्यत्र विस्तरः। यत्त्वपसरत इति सृधातुना गतिद्वयस्याप्युपादानादेकनिष्ठगतिं प्रतिकृतस्यापादानत्वमविरुद्धमिति तन्न। वस्तुतस्तन्निष्ठव्यापारयोर्भे

७३२।।

देपि सृधातुनानिरूपणाभेदस्यैवापायस्योपादानादुभयोरपि तत्क्रियाश्रयत्वेन परत्वात्कर्त्तृत्वापत्तेः अत एवैकशेषसूत्रे भाष्ये उक्तं। नवेति ङितान्येकशेषारंभप्रयोजनं
तिक्रियाया एकत्वादिति धनुषा विध्यतीत्यत्र निःसरणरूपजन्यवेधार्थत्वाद्धनुषोपादानत्वकरणत्वोभयप्राप्तौ परत्वात्करणत्वं बोध्यं। ग्रामास्यायातीति। अपायातो
विभागपूर्वकोत्तरदेशसंयोगानुकूलो व्यापारार्थः वृक्षं त्यजतीत्यादौ व्यापारव्यधिकरणविभागस्यैव धात्वर्थत्वेन कर्मसंज्ञयापादानत्वस्य बाधः स्पंदेस्तु न वि
भागोर्थ इति यद्वक्ष्यते स्पंदत इत्येव। चलतेस्त्वासनाच्चलित इति प्रयोगात्तस्यैव विभागार्थत्वं सार्थाद्धीयत इत्यत्र सार्थस्य धात्वर्थ प्रधानव्यापाराश्रयत्वेनाप
पादाने चाहीयरुहोरिति ज्ञापकात् कर्मप्रत्ययांतहीधातुप्रयोगेपादानत्वं कर्मसंज्ञायां च कर्तृपरं स्वतंत्रोपलक्षणमिति कर्तरि लकारः सार्थेन त्यज्यते
देवदत्त इत्यर्थः। धावत इति। क्रियावि[शि]ष्टस्याप्यश्वस्य प्रकृतधातूपात्तगत्यनावेशात् धावनस्याविवक्षितत्वाद्वा ध्रुवत्वं बोध्यं। जुगुप्सेत्यादि। जुगुप्सादीनां यद्वि
षयकत्वेन विवक्षा तदपादानं। तस्यैव विषयस्य क्रियाजनकत्वरूपकारकत्वेनाविवक्षायां संबंधित्वेन विवक्षायां पापस्य जुगुप्सत इति षष्ठी भवत्येव सत्यभि
धाने एवमुत्तरसूत्रेष्वपि बोध्यं। एषां धातूनां स्वार्थपूर्वकबौद्धविश्लेषजनकनिवृत्तिलक्षणया सूत्रेणैव सिध्येदं वार्त्तिकमुत्तरसूत्राणि च प्रत्याख्यानीति
भाष्ये स्पष्टं। भयं भीत्याणं त्रास इत्याह। भयार्थानामिति। हेतुतृतीयापवादोयं। अपरत्वे इति। भयार्थानां योगे कारकमपादानमित्यर्थः विशेष
सर्वसंज्ञापवादोयं स्यादिति भावः। पराजेः। असोढो ग्लानिविषयः एवं च पराजेरकर्मकत्वे उदाहरणं तदाह। ग्लायतीत्यर्थ इति। अभिभवतीति।
तिरस्कारानुकूलो व्यापारो धात्वर्थ इति भावः। प्रवृत्तिविघात इति। भरणसंयोगादिजनकव्यापाराभावानुकूलो व्यापार इत्यर्थः। ईप्सित इति।
वारणार्थधात्वर्थफलाश्रय इत्यर्थः उदाहरणे च तद्धात्वर्थव्यापारजन्यसंयोगादिरूपफलाश्रयत्वाद्यवानामपादानत्वं ईप्सित इत्यनेन प्रधानाप्र
धानान्यतरव्यापाराश्रयमात्रस्याक्षेपः कर्मलक्षणे तु तमग्रहणात् प्रकृतधात्वर्थप्रधानभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयस्य ग्रहण
मिति भावः। अंतर्धौ। अंतर्धिरन्यकर्तृकस्वकर्मकदर्शनाभावानुकूलो व्यवहितदेशस्थितिरूपस्तत्र घटकं यत्कर्तृकदर्शनाभावमिष्यते तत्तदपा
दानमित्यर्थस्तत्फलितमाह। व्यवधाने सतीति। येनेत्यत्र कर्त्तृकर्मणोरिति षष्ठी न सोत्र्यात्। आत्मन इति प्रत्यासत्तिलभ्यं। मातुर्निलीयत इत्यादा
वादेपलभ्येच्छा बोध्या। चौरानिति। चोरकर्मकदर्शनेच्छाभाव इति शाब्दोर्थः। स च चोरकर्तृकस्वदर्शनाभावायेति प्राप्तिः इच्छामात्रस्याक्षेप

संभवत्यद्रव्यविशिष्टस्यापि उपलभ्यत्वेपि स्यादिति भावः। प्रकृतेनांतर्द्धिरिति न दोषः। येनेत्यस्याभावे हि स्वकर्मकदर्शनाभावं यदिच्छतीत्यर्थे कर्तुरेव स्यात् तस्मात्। इच्छतिग्र
हणं किमिति। अंतर्धौ सति यत्कर्तृकदर्शनस्याभावस्तदपादानमित्यर्थोस्त्विति भावः। मत्स्य पिदधति। अदर्शनेच्छयात तदनुकूलव्यापारकरणेन एव वशात् तद्दर्शनसंभ
वीत्यर्थः। अन्यथा यत्र दर्शनाभाव एव तत्रैव स्यादिति भावः। नियमेति। उपयोगशब्दस्य तत्रैव रूढेर्नियमो ब्रह्मचर्यादिः। नटस्येति। नटजन्यश्रवणमिति बो
धात् कारकत्वं। नियमपूर्वकविद्यास्वीकाराभावान्नेयमुत्तरं। जनिक। प्रकृतिरुपादानकारणं ब्रह्म च मायाशबलं जगदुपादानकारणं हेतोर्हेतुपरमप्युपा
